वासवदत्ता ।

महाकवि-सुबन्धुविरचिता ।

पण्डितकुलपतिना, वि, ए, उपाधिधारिणा

श्रीमज्जीवानन्द-विद्यासागर-भट्टाचार्य्येण

विरचितया

तथा

तदात्मजाभ्यां

पण्डित-श्री-आशुबोध-विद्याभूषण-

पण्डित-श्री-नित्यबोध-विद्यारत्नाभ्यां

प्रतिसंस्कृतया च व्याख्यया समलङ्कृता प्रकाशिता च ।

द्वितीय संस्करणम्

कलिकातामहानगर्य्यां

वाचस्पत्ययन्त्रे

मुद्रिता ।

इं १८३३ ।

सर्वे स्वत्वं संरक्षितम् ।

मूल्यं राजतमुद्रामात्रम् ।

प्रकाशक— { पण्डित-श्रीआशुबोधविद्याभूषण
तथा
पण्डित-श्रीनित्यबोधविद्यारत्न ।

प्राप्तिस्थान— { २न०, रमानाथ मजुमदार ष्ट्रीट्, आम्हार्ष्ट-
ष्ट्रीट् पोष्ट-अफिस । कलिकाता ।

प्रिण्टर—वि, वि, मुखर्जी ।
२ न०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता ।

वासवदत्ता।

करबदरसदृशमखिलं भुवनतलं यत्प्रसादतः कवयः।
पश्यन्ति सूक्ष्ममतयः सा जयति सरस्वती देवी॥
क्लान्तोऽसि मुञ्च शैलं बिभृमो वयमिति वदत्सु गोपेषु।
करभुग्नविततबाहुषु गोपेषु हसन् हरिर्जयति॥

प्रारिप्सितस्य निरन्तरायपरिसमाप्त्ये कृतं मङ्गलं शिष्यशिक्षार्थं निबध्नाति। करबदरेति। यत्प्रसादतः सूक्ष्ममतयः कवयोऽखिलं समस्तं भुवनतलं भुवनस्वरूपं करे बदरं बदरीफलम। फले लुगिति लुक्। तत्सदृशं पश्यन्ति। सा सरस्वती देवी वागधिदेवता जयति सर्वोत्कर्षेण वर्त्तते। स्वरूपानुद्योतलक्षणमिति कटः। अथ:स्वरूपयोरस्त्री । आर्याछन्दसम। लक्ष्मीतत सप्तगणा गोपेता भवति नेह विषमे नः। ऽयं नलघू वा प्रथमेऽर्धे नियतमार्याया:। षष्ठे द्वितीयलात् परके नूले सुखलाश्च दनियमः। चरमेऽर्धे पञ्चमके तत्रादिह भवति षष्ठो लः इति लक्षणात। ग्लौति। हे कृष्ण खिन्नोऽसि। गोवर्द्धनधारणादिति भावः। शैलं गोवर्द्धनं मुञ्च त्यक्षम इति गोपेषु वदत्सु शिथिलभुजः शिथिलबाहुः। भरेण गिरिभरेण भुग्नाः कुटिला बाहवो येषां तादृशेषु सत्सु हसन् हरिः कृष्णो जयति। भुजो कौटिल्ये। ओदितश्चेति निष्ठानत्वम। यस्य च भावेन भावलक्षणमिति गोपेष्विखत्सप्तमी। एकेन त्वयेदं धृतं किमस्माभिर्न धार्य्यत इति सगर्वतया वयमिति बहुवचनाभिधानमुद्दीपनविभावः। तथा च भरतः। विपरीतालङ्कारैर्विकृताचाराभिधानवेषैश्च। इति। भुजकौटिल्यमनुभावः। तथा च भरतः। विकृताकारैर्वाक्यैरङ्गविकारैश्च विकृतवेषैश्च। इति। विकासितकपोलान्तमुत्फुल्लाननशोभनम्। किञ्चिल्लक्षितदन्तार्यं हसितं तद्विदो

कठिनतरदामवेष्टनलेखासन्देहदायिनो यस्य।
राजन्ति वलिविभङ्गाः स पातु दामोदरो भवतः॥
स जयति हिमकरलेखा चकास्ति यस्योमयोत्सुकाविहिता।
नयनप्रदीपकज्जलजिघृक्षया रजतशुक्तिरिव॥
भवति सुभगत्वमधिकं विस्तारितपरगुणस्य सुजनस्य।
वहति विकाशितकुमुदो द्विगुणकरं हिमकरोद्योतः॥
विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः।

विदुः॥ इति भरतः। कथ्यविषयरतिरूपभावस्य हास्यरसोऽङ्गमिति रसवदलङ्कारोऽयं। कठिनेति। कठिनतरं यद्दामवेष्टनं तेन लेखा रेखाभासा सन्देहदायिनो यस्य स्फटिकविभङ्गास्त्रिवलिपङ्क्तयो राजन्ति। स दामोदरो भूतपूर्वगत्या दामोदरता। भवतः युष्मान् पातु। वलिस्त्रिवलिदैर्घ्ययोरिति विश्वः। दामोदरविषयरतिरूपभावस्य पराङ्गत्वात् प्रेयोऽलङ्कारोऽत्र। स इति। उमयोत्सुकादौत्कण्ठ्यात्। नयनं भालनेत्रं तदेव प्रदीपो दीपस्तस्य कज्जलजिघृक्षया तदौपकज्जलग्रहणेच्छया रजतशुक्तिरिव रौप्यशुक्तिरिव। कज्जलवटा इति भाषायाम्। लिहिता व्याप्ता। यस्य हिमकरलेखा चन्द्ररेखा चकास्ति स शिवो जयति। विशेषणद्वारा विशेष्यप्रतिपत्तिरिति हरो लभ्यते। अत्र सुधर्मिता गुणः। यत्र विशेषणद्वारा विशेष्यलाभः सा सुधर्मिता इत्यलङ्कारस्य। उत्सुकशब्दोऽत्र भावप्रधानः। यद्वा। अलति बध्नातीत्यत्। उत्सुकस्यानुत्सुकान् उत्कण्ठाबन्धनकर्त्री। अथ उत्कण्ठादिकेति यावत्। अति अदि बन्धने। क्विप्। हिमकरलेखाविशेषणम्। यङ उपादाने। सन्। अः प्रत्ययादित्यकारप्रत्ययः। अ सामयिक इति तु जगद्धरस्य प्रमाद एव। औत्सुक्यमत्र शृङ्गाररसस्य व्यभिचारिभावः। उत्सुक लिहितेति क्वचित् पाठः। परोपकृतये सर्वथा यतनीयमिति खलान् प्रत्याह। भवतीति। विस्तारिता अनेकेषां श्रुतिपथं नीता परेषां स्वातिरिक्तानां गुणाः सरस्वतीलक्ष्मीचमादिजनिता येन तस्य सुजनस्य सुभगत्व सौभाग्यमधिकं भवति। अनुपकृत्यवस्थापेक्षयेत्यर्थः। विकाशितानि कुमुदानि येन तादृशः। अरत्कालिक इत्यर्थः। हिमकरोद्योतस्चन्द्रातपो द्विगुणकरं च यथाकालिकातपेक्षयाधिकां कान्तिं वहति। अर्थान्तरन्यासोऽलङ्कारः। उक्तिरर्थान्तरन्यासः स्यात् सामान्यविशेषयोः। प्रकाशो द्योत आतप इत्यमरः। विषधरत इति। विषधरतोऽपि सर्पादपि खलो दुर्जनोऽतिविषमोऽतिक्रूर इति विद्वांसः पण्डिता मृषा

यदयं न कुलद्वेषी सकुलद्वेषी पुनः पिशुनः ॥
अतिमलिने कर्त्तव्ये भवति खलानामतीव निपुणा धीः।
तिमिरे हि कौशिकानां रूपं प्रतिपद्यते चक्षुः ॥
ध्वस्तपरगुणानां भवति खलानामतीव मलिनत्वम्।
अन्तरितशशिरुचामपि मलिनमुचां मलिनिमाभ्यधिकः ॥
इक्षुरिव भूतिमलिनो यथा यथा लङ्घयति खलः सुजनम्।
दर्पणमिव तं कुरुते तथा तथा निर्मलच्छायम् ॥

मिथ्या न वदन्ति अपि तु तथ्यमेव। यद्यतोऽयं सर्पः न कुलं द्वेष्टुं शीलमस्य तादृक्; व्यालापराधी तमेव दशति न तु तत्कुलद्वेष्टेत्यर्थः। पिशुनो दुर्जनः पुनः सकुलद्वेषी। ऽस्य द्वेषविषयस्य सकुलस्यार्थं द्वेष्टीत्यर्थः। पक्षे सकुलो द्वेषी द्वेष्टा शत्रुर्यस्य। स प्रसिद्धः पिशुनः कुलद्वेषी स्वकुलद्वेष्टा। पिशुनो दुर्जनः खलः। व्यालोविषो विषधर इति हलायुधः। समङ्गयोरर्थयोरन्यतरस्यासंयोः सङ्करः। सामान्यं वा विशेषो वा तदन्येन समर्थ्यते। यत्र सोऽर्थान्तरन्यासः। अविद्यालिङ्गयोगात्समत्वाङ्गाङ्गिभावे तु सङ्करः ॥ अतिमलिन इति। खलानां पिशुनानां धीर्बुद्धिरतिमलिने सतामनुपादेये कर्त्तव्ये कार्य्येऽतीवात्यन्तं निपुणा स्वविषयग्रहणपटुर्भवति। हि यतस्तिमिरेऽन्धकारे कौशिकानामुलूकानां चक्षु रूपं स्वविषयं प्रतिपद्यते गृह्णाति। यद्वा। रूपं विषयग्राहकत्वरूपं स्वभावं प्रतिपद्यते प्राप्नोति। रूपं स्वभावे सौन्दर्य्ये शुक्लादिपदभेदयोः। इति विश्वः। अतीवेत्यव्ययसमुदायोऽतिशये। महेन्द्रगुप्तलुलुक-व्यालयाहिषु कौशिक इत्यमरः। काव्यलिङ्गमलङ्कारः। समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम्। विध्वस्तेति। विध्वस्तपरगुणानां खलानामतीव मलिनत्वं भवति। अव्ययानामनेकार्थत्वादपि हेतौ। अपि यतोऽन्तरितशशिरुचां छादितचन्द्रकान्तीनां मलिनमुचाम्। हेतुगर्भम्। वर्षाकालिकमेघानां मलिनिमा। इमनिजन्तः। मालिन्यमधिकं भवति। परिकरालङ्कारः। अलङ्कारः परिकरः साभिप्राये विशेषणे। दुर्जनोऽयान् स्वोत्कर्षार्थं निन्दति तस्याभिनिवेशो व्यर्थ एवेति प्रदर्शयन्नाह। इक्षुरिवेति। खलो भूतिमलिनो इक्षुरिव यथा यथा सुजनं खलयत्यर्थं लङ्घयति। पक्षे। घर्षयति। तं सुजनं दर्पणमिव तथा तथा निर्मलच्छायमुज्ज्वलकान्तिं कुरुते। भूतिर्भस्मनि सम्पदि। दर्पणे मुकुरादर्शौ। छाया सूर्य्यप्रिया कान्तिरिति विश्वमरः। पूर्णोपमा। साधर्म्यमुपमाभेदे। वर्त्तमानकालिकान् नृपतीन्

सा रसवत्ता विदुषा नवका विलसन्ति चरति नो कं कः।
सरसीव कौत्तिशेषं गतवति भुवि विक्रमादित्ये ॥
अविदितगुणाऽपि सत्कविभणितिः कर्णेषु वमति मधुधाराम्।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला ॥
गुणिनामपि निजरूपप्रतिपत्तिः परत एव सम्भवति।
स्वमहिमदर्शनमक्षोर्मुकुरतले जायते यस्मात् ॥

स्वस्तवनायोग्यान् ध्वनयन् विक्रमादित्यं स्तौति। सा रसेति। विक्रमादित्ये राजनि इ सीव सरोवर एव कौत्तिशेषं गतवति विरामं प्राप्ते सति भुवि पृथिव्यां सा पुरुषान्तरैः लभ्यमाना रसवत्ता वीर्य्यवत्ता विदुषा नष्टा। नवका: कुत्सित इति कन्। कुत्सित-राजा विलसन्ति विलासं कुर्वन्ति। अतः कः सबल: कं निर्बलं नो चरति न भक्षयति अत्यर्थं पीडयतीति यावत्। अराजन्वत्त्वादिति भावः। यद्वा। नवका अज्ञात इति कन्। अज्ञातनामगोत्रगुणा राजानो विलसन्ति। अतः को जनः कं व्यवहारं नो चरति न करोति। हेतुलुप्त एव। (यद्वा)। सा रसवत्ता शृङ्गारादिरसवत्ता गुणवत्ता वा ध्वनौ साभिलाषता वा विदुषा। अतो नवका अनुकम्पितनवीनक्षयो विलसन्ति। गुणग्रहीत्रभावेनाक्षादीनां प्रचारराहित्येनेति भावः। अतः कश्चाद्दक् पण्डितम्मन्यः कं मूर्खानं नो चरति न गच्छति नारोहतीति। अपि त्वारोहत्येव। (पक्षे)। सा रसवत्ता जलवत्ता विदुषा। अत एव नवका: कङ्का भाषायां बकुला इति ख्याता न विलसन्ति। कङ्को लोहपृष्ठः ककहड इति ख्यातो नो चरति। यद्वा। सारसः पक्षि-विशेषस्तद्वत्ता। कमलवत्ता वा। शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रसः। अथ वक्ष कङ्कः पुष्कराद्वस्तु सारसः। लोहपृष्ठस्तु कङ्कः स्यात्। कासारः सरसो सरः। कं शिरोऽम्बुनोः। सारसं सरसीरूढम्। इति षट्स्वमरः। चर गतिभक्षणयोः। सभङ्गाभङ्ग-श्लेषयोः संसृष्टिः। सेष्टा संसृष्टिरेतेषां भेदेन यदिह स्थितिः। अविदितेति। अवि-ज्ञाता गुणा ओजःप्रसादमाधुर्य्यरूपा यस्यास्तादृश्यपि सत्कविभणितिः कर्णेषु मधुधारां क्षौद्रधारां वमत्युद्गिरति। यथा क्षौद्रधारासङ्गादसनासुखमेवं सत्कविभणितिश्रवणात् कर्णयोः सुखमित्यर्थः। हि यतोऽनधिगतपरिमलाऽपि मालतीमाला दृशमनुघातस्थितस्य दृष्टिं हरति। गुणिनामपि। गुणिनामपि निजरूपप्रतिपत्तिः स्वरूपज्ञानं परत एव परस्मादेव सम्भवति। तेन निर्गुणानां स्वरूपज्ञानं परज्ञादव किमार्थ्यम्। यस्मा-

सरस्वतीदत्तवरप्रसादश्चक्रे सुबन्धुः सुजनैकबन्धुः।
प्रत्यक्षरश्लेषमयप्रबन्धविन्यासवैदग्ध्यनिधिर्निबन्धम्॥

अभूदभूतपूर्वः सर्ववीरपतिचक्रचारुचूड़ामणिश्रेणीशाण-
णिकषणनिर्मलीकृतचरणनखमणिर्नृसिंह इव दर्शितहिरण्य-

ाऽच्योः स्वमहिमदर्शनं स्वविस्तारदर्शनं सुकरतले जायते। सर्वदर्शनक्षमयोर्नेत्रयोः स्वमहत्त्वदर्शनं दर्पणाधीनमेवेत्यर्थः। सरस्वतीदत्तेति। प्रगतः सादोऽस्येति प्रसादः। रस्वतीदत्तेन वरेणाभीष्टेन प्रसादो विगतकाश्यं स्वीयाङ्गतोक्तिविभावनानन्दतुन्दिलत्वादित्यर्थः। सुहृदो। सरस्वतीदत्तवरेण प्रसादः प्रसन्नता यस्य सः। सर्वातिक्रान्ता मत्कृतिरिति प्रसन्नताविशिष्टत्वम्। अमुमेवार्थमभिसन्धाय वाणेनाप्यभाणि। कवीनामगलद्दर्पो नूनं वासवदत्तया। शक्त्येव पाण्डुपुत्राणां गतया कर्णगोचरम्॥ इति। प्रसादस्तु प्रसन्नतत्परः। वराऽभीष्टो देवतादेर्वरो जामाहविड्गयोः॥ श्रेष्ठेऽत्यवत् परिवृतो। प्रसादोऽनुग्रहे काव्य-प्राणस्वाम्यप्रसक्तिषु। इति हैमीविश्वप्रकाशः। सुजनैकबन्धुः सज्जनानामद्वितीयो भ्राता। प्रत्यक्षरश्लेषमयो यः प्रबन्धस्तस्य विन्यासे रचनायां वैदग्ध्यं नैपुण्यं तस्य निधिः सुबन्धुनामकः कविर्निबन्धं चक्रे। व्यापारान्तराविष्टमनसो मनसाप्य निर्माणे प्रवृत्तिर्न त्वन्यबन्धनःपणिधानपूर्वकमेवेति सुकरतां ध्वनयितुं लिटः प्रयोगः। उपजातिवृत्तम्। अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः। इति लक्षणात्। अनुप्रासेनाह। अभूदित्यादि। चित्तामणिर्नाम राजाऽभूदित्यन्वयः। पूर्वं भूता भूतपूर्वः सुप्सुपेति समासः। भूतपूर्वे चरडिति निर्देशाद्भूतशब्दस्य पूर्वनिपातः। पश्चाद्बहुव्रीहिसमासः। अभूतपूर्वः। तादृक् पूर्वं कोऽपि नाभूदित्यर्थः। सर्वेषामुर्वीपतीनां चक्रं समूहस्तस्य चारुचूडामणिश्रेणौ पङ्क्तिः सैव शाणो निकषस्तस्य कीर्णोऽयं तस्मिन् कषणेन निर्मलीकृतचरणनखो मणिरित्येतुपमितं व्याघ्रादिभिः सामान्याप्रयोग इति समासो व्याघ्रादेराकृतिगणत्वात्। स यस्य सः। जनावने समूहे च दम्भे भेदरथाङ्गयोः। शस्त्रभेदे च सेनायां चक्रं चापि विदङ्गके। इति रन्तिदेवः। चूडामणिः शिरोरत्नम्। वीथ्यालिरावलिः पङ्क्तिः श्रेणौ। निकषः कष इति विश्वसरः। श्रेणिरिति क्षत्रपाठे तु अयभागे च पङ्क्तौ च श्रेणिरुक्ता मनीषिभिः। इति विश्वः। छेकानुप्रासः। स्यात् पादपदवर्णानामावृत्तिः सयुतायुता। अनत्यदः स्याच्छेकानाम्। इति। ओजो गुणः। ओजः समासभूयस्त्वमिति। वैदर्भी रीतिः। एका भूयःसमासा स्यादित विपु

कश्मिपुक्षेत्रदानविस्मयः कृष्ण इव कृतवसुदेवतर्पणो नारायण इव सौकर्यसमासादितधरणिमण्डलः कंसारातिरिव जनितयशोदानन्दसमृद्धिरानकदुन्दुभिरिव कृतकाव्यादरः सागरशायीवानन्त-

---

वाग्भटालङ्कारः। काव्यप्रकाशरीत्या वृत्त्यनुप्रासः। एकस्याप्यसकृत् पद इति। काव्यादर्शरीत्या वर्त्यमाणाः समानोपमाः। सरूपशब्दवाच्यत्वात् तत्समानोपमा मता। बालिशोद्यानमालेयं सालकालनशोभिनी। इति। अलङ्कारशेखररीत्या श्लेषोपमेयम्। पदश्लेषनिबन्धनं साम्यं श्लेषोपमा। उक्तमेवोदाहरणं मतान्तरे। श्लेषोपमासङ्करेणाह। हरिणेव इव दर्शितो हिरण्यकश्मिपोर्दैत्यस्य क्षेत्रदानेन शरीरखण्डनेन विस्मयो येन सः। दोऽवखण्डने। पक्षे हिरण्यं सुवर्णं कश्मिपुर्भोजनाच्छादने क्षेत्रं केदारक्षेपां दानेन वितरणेन श्रेष्ठं प्राप्तवत्। एवमग्रेऽपि। कश्मिपुस्त्वन्नमाच्छादनं दृयनित्यमरः। अत्रवस्त्रदक्षिणाप्रद इति भावः। क्षेत्रं शरीरे केदारे सिडस्थानकलत्रयोः। इति विश्वप्रकाशः। वाच्यभेदेन भिन्ना यद्युगपद्वाक्षयसृग्रः। श्लिष्यन्ति शब्दाः श्लेषोऽसावक्षरादिभिरष्टधा॥ कृष्ण इव कृतं वसुदेवस्य तर्पणं तृप्तौ रक्षणं वा येन वरुणात् वा कंसाद् वा धातूनामनेकार्थत्वात् रक्षणार्थस्यापि:। तर्पणं प्रीणनावनतिरित्यमरः। पक्षे कृतं वसुभिर्द्रव्यैर्देवानां तर्पणं प्रीणनं येन। यद्वा कृतं वसूनां ध्रुवादीनां देवानां च तर्पणं येन। ध्रुवो धरस्य सोमस्य आपश्चैवानिलोऽनलः। प्रत्यूषस्य प्रभासस्य ह्यष्टौ वसव: स्मृताः। नारायण इव सौकर्येण सूकरभावेन समासादितमुद्धृतं धरणिमण्डलं येन। ब्राह्मणादित्वाद्भावे ष्यञ्। तालव्या अपि दन्त्याः स्युः सान्त्वसूकरपांसवः। इति प्रकारभेदः। पक्षे सौकर्येणानायासेन समासादितमाक्रान्तम्। सौकर्यं स्यादनायासे क्रियायां सूकरस्य चेति विश्वप्रकाशः। कंसारातिरिव जनिता यशोदानन्दयोः समृद्धिर्हर्षहेरधिक्यं येन। यशोदाया आनन्दसमृद्धिर्वा येन। पक्षे आनन्दकारिणी समृद्धिः प्राकृपार्थिवादिः। जनिता यशोदा कीर्त्तिप्रदानन्दसमृद्धियेन। षष्ठ्यातिरिक्ते निर्लोभ इति ध्वनिः। आनकदुन्दुभिरिव कृतः काव्यायाः पूतनायाः दरत्रासो येन। यद्वा। कृतकाव्यौ तत्पूतौ तयोरादरो यस्येति गृह्यचरणाः। वसुदेवोऽस्य जनकः स एवानकदुन्दुभिः। इति विश्वप्रकाशेऽमरः। दरत्रासो भीतिर्भीरिति च। काव्यं यत्ये पुमान् शुक्रे काव्याख्या पूतना मता। इति विश्वः। पक्षे कृतः काव्ये लोकोत्तरवर्णनरूपे कर्मण्यादरो येन। यद्वा कृतकाव्यानां कवीनामादरो यस्मात्। यथाऽसौ मनोभिज्ञतया कवीन् मानयति तथा नान्य

भोगिचूडामणिमरीचिरञ्जितपादपद्मो वरुण इवाशान्तरक्षणो-
ऽगस्त्य इव दक्षिणाशाप्रसाधको जलनिधिरिव वाहिनीशतनायकः
समकरप्रचारश्च हर इव महासेनानुगतो निवर्तितमारश्च मेरु-
रिव विबुधालयो विश्वकर्मांश्रयश्च रविरिव क्षणदानप्रियश्छाया-
सन्तापहरश्च कुसुमकेतुरिव जनितानिरुद्धसम्पद्रतिसुखप्रदश्च

इति भावः। सागरशायीव। नारायण इव। अनन्तभोगी शेषस्तस्य चूडामणिमरी-
चिभी रञ्जितपादपद्मः। शेषोऽनन्तः इत्यमरः। पक्षेऽनन्ता अनेके भोगिनो विलासिनः।
न केवलं स्वभृत्यैः सेव्योऽपि तु समन्तैः पौरैरपीति भावः। वरुण इव। आशा पश्चिम-
दिक् तदन्ते रक्षणं यस्य। दिशस्तु चतुरः काष्ठा आशाश्चेत्यमरः। पक्षेऽशान्तमविरतं
रक्षणं प्रजापालनं यस्य। अगस्त्य इव दक्षिणाशा दक्षिणदिक् तस्याः प्रसाधकोऽलङ्कर्ता।
पक्षे दक्षिणाया आशा तृष्णा। आशा तृष्णादिशोः प्रोक्तेति विश्वप्रकाशः। यद्वा दक्षि-
णानां कुशलानां परच्छन्दानुवर्त्तिना वाशाप्रसाधकः। दक्षिणः सरलेऽमि परच्छन्दानु-
वर्त्तिनि। वाञ्छितार्थप्रदे चापि यज्ञदानप्रतिष्ठयोः। इति विश्वप्रकाशः। जलनिधि-
रिव। वाहिनीशतस्य नदीशतस्य नायकः। मकराणां जलजन्तुविशेषाणां प्रचारेण
सहितत्वाट्टक्। अथ यादांसि जलजन्तवः। तद्भेदाः शिशुमारोद-गजकच्छपा मकरादयः।
इत्यमरः। पक्षे वाहिनीशतस्य सेनाशतस्य नायकः प्रभुः। समो हिताहितसाधारण-
करस्य राजयाज्यभागस्य प्रचारो यस्य। यद्वा समः सलक्ष्मीकः करस्य हस्तस्य प्रचारो
यस्य। तरङ्गिण्यां च सेनायां वाहिनी परिकीर्त्तिता। इति विश्वः। वलिहस्ताग्रयः
करा इत्यमरः। हर इव महासेनेन कार्त्तिकेयेनानुगतः। निवर्त्तितो मारः कामो येन।
कार्त्तिकेयो महासेनः। मदनो मन्मथो मार इत्यमरशब्दात्। पक्षे महत्या सेनयानु-
गतः। निवर्त्तितो मारयतीति मारो विघ्नो येन। मृङ् प्राणत्यागे णिजन्तादच्। मेरुरिव
विबुधानां देवानामालयः। विश्वकर्मा सूर्यो देवशिल्पी वा तदाश्रयः। विश्वकर्मा दैव-
शिल्पी विश्वकर्मा दिवाकरः। इति विश्वः। पक्षे विबुधानां पण्डितानामालयः। विशेषां
जनानां कर्म शिल्पादि तदाश्रयः। रविरिव क्षणदा रात्रिर्न प्रियेष्टा यस्य। छायाया
निशाख्यायाः सन्तापहरश्च। न प्रियेत्यत्र नञ्कथेत्यादिनिषेधार्थको न शब्दः। पक्षे क्षणेषूत्स-
वेषु दानं प्रियं यस्य। छायया स्वकान्त्या सन्तापहरः। एतल्लावण्यस्याह्लादजनकत्वादिति
भावः। अथ क्षण उत्सवौ मह उद्धव इत्यमरः। छाया सूर्यप्रिया कान्तिः प्रतिबिम्बजना-

विद्याधरोऽपि सुमना धृतराष्ट्रोऽपि गुणप्रियः क्षमानुगतोऽपि सुधर्माश्रितो बृहन्मलानुभावोऽप्यन्तःसरलो महिषीसम्भवोऽपि वृषोत्पाद्यतरलोऽपि महानायको राजा चिन्तामणिर्नाम। यत्र

तपः। इति हलायुधः। कुसुमकेतुरिव काम इव जनितानिरुद्धश्रीषापतेः सम्पत्त्येन। रतेः प्रियायाः सुखप्रदश्च। कन्दर्पः पुष्पकेतनः। पक्षेऽपि प्रकारेण रतिः प्रिया सुतोऽनिरुद्ध इत्यङ्ग उषेश इति विष्णुहैनः। पक्षे जनितानिरुद्धानिवारिता सम्पत्तिर्येन। रतौ सुरतेऽनेककामतन्त्रकलाभिज्ञतया सुखपटुः। विरोधाभासोऽयम्। विद्याधरोऽपि दैवयोनिविशेषोऽपि सुमना देव इति विरोधः। विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः। पिशाचो गुह्यकः सिद्धो भूतोऽमी देवयोनयः॥ सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः। इति हलायुधः। विद्याधरोऽष्टादशविद्यानिधिः। सुमनास्त्रिविधमानसपापरहित इति परिहारः। मानसं चोक्तानि मनुना। परद्रव्येष्वभिध्यानं मनसानिष्टचिन्तनम्। वितथाभिनिवेशश्च त्रिविधं मानसं स्मृतम्॥ इति। भाभासत्वे विरोधस्य विरोधाभास इष्यते। काव्यप्रकाशे त्वयमेव विरोध इति व्यवहृतः। विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः। इति। एवमग्रेऽपि। अपिरापाततो विरोधस्य द्योतकः। पक्षान्तरेऽनेकार्थत्वात समुच्चयस्य। धृतराष्ट्रोऽपि पाण्डोरयञ्जोऽपि गुणप्रियः। भीमप्रिय इति विरोधः। गुणोऽप्रधाने शुक्लादौ गुणः सूत्रे धनुर्दरे। इति विश्वः। धृतराष्ट्रो धृतराज्यः। गुणप्रियः सन्धिविग्रहादिषड्गुणप्रिय इत्यविरोधः। सन्धिर्नो विग्रहो यानमासनं द्वैधमाश्रयः। षड्गुणा इत्यमरः। क्षमानुगतोऽपि पृथिव्यनुगतोऽपि सुधर्माश्रितो देवसभाश्रित इति विरोधः। क्षमा शान्तिः क्षमा धरेति विश्वः। स्यात् सुधर्मा देवसभेत्यमरः। क्षमानुगतः शान्तियुक्तः सुधर्माश्रितः शोभनधर्माश्रित इत्यविरोधः। बृहन्महान् यो मलस्तत्भेदस्तत्रेवानुभावो यस्य। यथा यज्ञानपेक्षः सोऽभिवर्धते तथायमपौरुषः। तादृशोऽप्यन्तर्मध्ये सरलो यस्मिन्रहित इति विरोधः। बृहन्मलानुभावोऽर्जुनानुभावोऽन्तःसरल इति परिहारः। बृहन्मलो गुडाकेशे मलेऽपि कौशिकलम्बने। इति विश्वः। महिष्याः सम्भवो यस्य तादृशो महिषो वृषोत्पादो वृषभजनक इति महीत्पात इति विरोधः। महिष्याः ज्ञताभिषेकायाः सम्भवो यस्य वृषोत्पादो धर्मजनक इति परिहारः। ज्ञताभिषेका महिषी भोगिन्योऽत्या नृपस्त्रियः। पुण्यश्रेयसी सुकृतं वृष इत्युभयवामरः। अतरलोऽपि द्वारमध्यमणिभिन्नोऽपि महानायको द्वारमध्यमणिरिति विरोधः। तरलो

च शासति धरणिमण्डलं छलनिग्रहप्रयोगो वादेषु नास्तिकता चार्वाकेषु कण्टकयोगो नियोगेषु परीवादो वीणासु खलसंयोगः शालिषु द्विजिह्वसङ्कीर्तिराखुतुण्डिकेषु करच्छेदः कृषकरग्रहणेषु नेत्रोत्पाटनं मुनीनां द्विजराजविरुद्धता पङ्कजानां सार्वभौमयोगो दिग्गजस्याग्नितुलाशुद्धिः सुवर्णानां सूचीभेदो मणीनां शूलभङ्गो

हारमध्यग इत्यमरः। नायको नेतरि श्रेष्ठे हारमध्यमणावपि। इति विश्वः। अतएवो धीरो महान् नायको नेता महानायक इति परिहारः। परिसङ्ख्यायाह। काव्यादर्शनियमश्लेषोऽयम्। यत्र चिन्तामणौ। छलो वाक्छलो निग्रहः प्रतिज्ञाहान्यादिक्लेशो प्रयोगो वादेषु। पक्षे च्छलं कपटः। निग्रहो बन्धनम्। ताडनबन्धव्यपोहाय परिसङ्ख्या तु सा स्मृता। नास्तिकता परलोकाभावज्ञानत्वं चार्वाकेषु बौद्धविशेषेषु। भावे तल्। अस्तिनास्ति दिष्टं मतिरिति ठक्। तावानेव हि लोकोऽयं यावानिन्द्रियगोचरः। इति तस्सिद्धान्तः। मिथ्यादृष्टिनास्तिकतेत्यमरः। पक्षे नास्तिकता दरिद्रता। कण्टकः अनेनेदं भुक्तमिति तत्स्वामिनि कण्टकस्तस्य योगो नियोगेषु। नोहासिवा इति भाषायाम्। पक्षे। कण्टकः क्षुद्रशत्रुः। कण्टकः क्षुद्रशत्रौ च कर्मस्थानिकदूषणे। इति विश्वः। परीवादो वीणावादनवस्तु। पक्षे परीवादोऽपवादः। परीवादोऽपवादे स्यादीणावादनवस्तुनि। इति मेदिनी। खलं धान्यमर्दनभूमिः। खलं भूस्थानकक्लेशे क्रूरे नीचेऽधमे खलः। इति विश्वप्रकाशः। पक्षे खलः पिशुनः। पिशुनो दुर्जनः खल इत्यमरः। आखुतुण्डिकेषु व्यालग्राहिषु द्विजिह्वसङ्कीर्तिः सर्पसङ्कटः। व्यालग्राह्याखुतुण्डिक इत्यमरः। पक्षे द्विजिह्वः खलः। द्विजिह्वः पन्नगे पुंसि खले स्यादन्यलिङ्गकः। इति रभसः। अक्षितुण्डेन दीव्यति। तेन दीव्यतीति ठक्। कृषकरग्रहणेषु राजग्राह्यभागेषु करच्छेदस्तस्यैव न्यूनीकरणम्। पूर्वनिश्चितादपि प्रार्थनादिना न्यूनग्रहणमित्यर्थः। पक्षे करच्छेदो हस्तच्छेदः। बलिहस्तांशवः कर इत्यमरः। विरोधाभासपरिसङ्ख्यामङ्गरेषाह। मुनीनां यतीनां नेत्रमणि। पक्षे मुनीनां हस्तविशेषाणां नेत्रोत्पाटनं मूलोत्पाटनम्। तरुमूलाधिवस्त्रेषु नेत्रमर्थिगृहे रत्ने। मुनिर्यतौकदीचुत-प्रियालागस्त्यकिंशुके॥ इति द्वयोर्विश्वः। पङ्कजानां कमलानां द्विजराजचन्द्रविरुद्धता। द्विजराजः गरुडः इत्यमरः। पक्षे द्विजा ब्राह्मणाः पक्षिणो वा ते च राजानश्च। दन्तविप्राखुजा द्विजा इत्यमरः। सार्वभौमो दृढः सार्वभौमगजस्तस्योगो दिग्गजस्य। सर्वभूमिपृथिवीभ्यामिति व्युत्पन्नस्य तेतद्राजादिभिन्ने नास्ति प्रयोग इत्यर्थः।

युवतिप्रसवे दुःशासनदर्शनं भारते करपत्रदारणं जलजानाम्। महावराहो गोत्रोद्धरणप्रवृत्तोऽपि गोत्रोद्धलनमकरोत्। राघवः परिहरन्नपि जनकभुवं जनकभुवा सह वनं विवेश। भरतो रामे दर्शितभक्तिरपि राज्ये विराममकरोत्। नलस्य दमयन्त्या मिलितस्यापि पुनर्भूपरिग्रहो जातः। पृथुरपि गोत्रसमुत्सारण-

---

उक्तं च। न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते॥ इति बहुवचनालापाठे तु पक्षेऽर्थपरत्वं राजपक्षे पूर्ववच्छब्दपरत्वम्। सार्वभौमस्तु दिङ्नागे सर्वपृथ्वीपतावपि। इति विश्वमेदिन्यौ। पृथ्वादयः सार्वभौमः सुप्रतीकश्च दिग्गजाः। इत्यमरः। अग्निना तुलया च शुद्धिर्वर्णोत्कर्षापकर्षणम्। सुवर्णानाम्। व्यक्त्यभिप्रायेण बहुवचनम्। तादृशशुद्धियोग्यानामन्येषामभावादिति भावः। सूची स्त्रीकं सीवनसाधनं तेन भेदो मणीनाम्। न तु सूची करादयभिनयस्तस्य भेदः। सर्वेषां नर्तकस्त्रीसंकानां परिनिष्ठितत्वादिति भावः। यद्वा सूची नारीणां करणान्तरं गोत्राद्धारसंवेशक्रिया। तस्या भेद इति भावः। एतेनास्य राज्ये सपत्नीज्येष्ठानिष्ठास्यवहारानावो ध्वनितः। करणं साधने चेत्रे कायकायस्थकर्मसु। गोत्राद्धारसंवेश-क्रियाभेदेन्द्रियेषु च॥ इति विश्वप्रकाशः। सूची करादयभिनये नारीणां करणान्तरे। सूची सीवनदत्य इति च। शूलेनोदरपीडया भङ्ग आमर्दः। भङ्गो आमर्दने। न तु शूलेन दुष्टपाचिवधोपायेन भङ्गः। तादृशापराधिनोऽभावादिति भावः। यद्वा शूलः कैतवं तस्य भङ्गः। सूची प्रहरणे शूलः कैतवे रोगरोगयोः। इति विश्वप्रकाशः। दुःशासनस्य धार्तराष्ट्रस्य दर्शनं ज्ञानम्। न तु दुष्टशासनस्य निरीक्षणम्। करैः सूर्यकिरणैः पवदारणं दलानां विकासनं पङ्कजानाम्। न तु करपत्रेण क्रकचेन दारणम्। क्रकचोऽस्त्री करपत्रमित्यमरः। करवत इति भाषायाम्। विरोधाभासेनाह। महावराहो गोत्रोद्धरणाय पृथिव्युद्धरणाय प्रवृत्तोऽपि गोत्रोद्धलनमकरोत्। यदुद्धरणाय प्रवृत्तस्तस्यैवोद्धलनमनुचितम्। गोत्रः पर्वत इत्यर्थान्तरेण परिहारः। एवमग्रेऽपि। जनकभूः पितृभूमिः। पक्षे जनकभुवा सीतया। विरामो रामाभावो वैराग्यं च। दमयन्त्या मिलितस्यापि नलस्य पुनर्भूपरिग्रहः पुनरूढापरिग्रहः। पुनरुक्तवदीनित्वादुक्तौ या यथाविधि। स पुनर्भूः। पक्षे पुनर्हस्तोदवारं भूपरिग्रहः पृथ्वीपरिग्रहः। गोत्राणां खगोत्रजानां खवंशजविरोधिता विरोधः। गोत्राणां पर्वतानामिति परिहारः। इत्थं

विस्तारितभूमण्डलः। इत्थं नास्ति वागवसरः पूर्वतरराजेषु। स पुनरन्य एव देवो न्यक्कृतसर्वोर्वीपतिचरितः। तथाहि स पर्वतः कटकसञ्चारिणो गन्धर्वान् दर्शितभृङ्गोन्नतिः सुखयन् न विरराम। स हि मालयो नावश्यायोच्छ्रितो नो मायाजन्मने हितश्च। स हि मानी गिरि स्थितो वृषध्वजः। असौ सदागतिरवधूताखिलकान्तारः पावकाग्नेयरो नभोगोत्सुकः सुमनोहरश्च। स रत्नाकरोऽनहिमयः कथमगाधः समर्यादो नोद्रोको-

---

वर्णितविरोधाभासात् पूर्वेषु महावराहादिषु वागवसरः स्तुतियोग्यत्वं नास्ति। चिलातमणिर्देवो राजा। यदेव वक्तव्यं तत् दशकुमारभूषणे द्रष्टव्यम्। वर्णितश्चोऽन्यगुणविशिष्ट एव। अत एव न्यक्कृतसर्वोर्वीपतिचरितः। भेदकातिशयोक्तिरलङ्कारः। भेदकातिशयोक्तिस्तु तस्यैवान्यत्ववर्णनम्। इति लक्षणात्। पुनः श्लेषेणाह। पक्षे उत्सववान्। कटकं सैन्यम्। गन्धर्वा अश्वाः। शृङ्गं प्राधान्यम्। पक्षे कटको नितम्बः। गन्धर्वा हाहाहूहूप्रभृतयः। शृङ्गं शिखरम्। तप् पर्वसरुद्भ्यामिति मत्वर्थीयसप्। वाजिवाहावंगन्धर्व इति। कटकोऽस्त्री नितम्बोऽद्रेरिति। शृङ्गं प्राधान्यमान्योर्ध्वेति विश्वमरः। सन्व्यतिरेकं तमाह। स हि मालयो लक्ष्मीग्रहम्। अवश्यायो गर्वः। माया कपटम्। जन्मने हितः। हितयोगे चेति चतुर्थी। पक्षे स हिमालयः। अवश्यायो हिमः। उमायाः पार्वत्याः। अवश्यायो हिमे गर्व इति धरणिः। मुद्-श्लेषमाह। स हिमानी हिमसंहतिरूपो गिरिः पर्वतश्च स्थितो वृषध्वजः। पक्षे। स हि मानी चित्तौन्नत्यवान्। गिरि वचने। वृषध्वजः धर्मध्वजः। पुण्यश्लोकौ सुकृती वृष इत्यमरः। सतां साधूनामा साकल्येन गतिर्निर्वाहो यस्मात्। येषां क्वापि गतिर्नास्ति तेषां वाराणसी गतिः। इतिवत्। अवधूताः कम्पिता दूरीकृता वा कान्तारा दुर्गमनागा दुश्चिन्ता वा येन। पावकानां पवित्रकर्तृणामग्नेयरः। तथा च मनुः। अग्निश्चित् कपिला सती राजा भिषुर्मरीदधिः। इष्टमात्राः पुनन्त्येते तस्मात पश्येत नित्यशः॥ इति। पावकोऽग्नौ सदाचार इति विश्वप्रकाशः। नभोगेषु देवेषूत्सुकः। यद्वा। न भोगेषु स्त्र्यादिसुखेषूत्सुकः। उक्तं च। सगरायाऽऽत्मना पापं गर्हितानि महीयताम्। इष्टाश्लेष्यस्तु विपदः पाण्डुनेषधवर्णिषु॥ इति। सुमनसः पण्डितान् हरति युधिष्ठिरविश्रापनाय लवणीकरोति। पक्षे सदागतिर्वातः। अवधूताखिल-

ऽप्यस्य विस्मयः सदा हिमकरात्ययोऽमृतमयः सपोतस्तस्या-
श्चक्षो नक्रोधो महानदीनः समुद्रः। स चन्द्र इव क्षणदानन्द-
करः कुमुदवनबन्धुः सकलकलाकुलगृहं नतारातिबलः। मित्रो

ज्ञानारः कल्पिताखिलज्ञानः। पावकाग्नेयरी वह्निसहायः। नभोगीषु मेघेषूल्क उल्कर्षितः। तथा च ज्ञानिदासः। महत्सखस्येव बलाहकस्येति। सुमनसः पुष्पाणि हरति तादृशः। तथा च ज्ञानिदासः। इत्यस्यं हरति पुष्पमनोज्ञतामिति। सुमनाः पुष्पमालत्योस्त्रिदशे बोधिदेऽपि च। इति विश्वप्रकाशः। स्त्रियः सुमनसः पुष्पमित्यमरः। ज्ञानारः ज्ञानवे चेत्यो दुर्भिक्षे दुर्गवर्त्मनि इति विश्वः। रत्नानामुत्तम-वस्तूनामाकरः। रत्नं खजातिश्रेष्ठेऽपीत्यमरः। अक्षिरिवाक्षिः खलक्षत्रयी न भवती-त्यक्षक्षिणयः। कथम्। अनाधः गभीराशयः। यद्वा। क्षिप्तारहितः। नधां क्षिप्तेत्यमरः। ज्ञानर्षाद उचितानतिक्रमत्वयोगः। उद्गत उत्थितः रोधो दोषिर्यस्य सः। कथ दोषा। अक्। इत्यस्य न विस्मयः। अतुच्छलादस्य दोषेर्न नाम इति भावः। तथा चोक्तम्। देहीति वचनद्वारा देहस्था पञ्च देवताः। तत्तच्छादेव नश्यन्ति श्रीर्गौरुक्षा-क्षान्तिकीर्तयः। इति। किंच। स पार्थः पार्थिवान् सर्वान् भूमिष्ठोऽपि रथस्थितान्। एको निवारयामास लोभः सर्वगुणानिव॥ इति। यद्वा। अस्योद्र इति न कोऽपि विस्मयः। जलाखिटगोलस्याम्भोदसङ्गादुल्कत्वादिति भावः। सदा हिमकरवत्सन्तप्त्या आश्रयो गृहं यस्य। अमृतमयः। आह्लादकरूपत्वात्। सपोतः सबालकः। पोतः पाकोऽर्भको डिम्भः पृथुकः शावकः शिशुः। इत्यमरः। तस्य क्रोधोऽपि न प्रति-घातायनपनेयो न भवतीति भावः। महान् श्रेष्ठः। अदीनः। समुद्रः। मुद्रा राजचिह्नं तत्सहितः। पक्षेऽगाधसत्त्वसमुद्ररहितः। मर्यादा सीमा अस्योद्र इति न कोऽपि विस्मयः। उद्रो जलमार्जारः। सदा हि निश्चयेन मकराणां जलजन्तूनामाश्रयः। यद्वा हिमकरश्चन्द्रः। अमृतं सुधा जलं वा। पयः क्षीरालमनृतम्। पीयूषमृतं सुधा। इत्युभयत्रामरः। पोतो यानपात्रम्। यानपात्रं तु पोतोऽस्त्रि-भवे विषु समुद्रियम्। इत्यमरः। तस्याधोऽपि नैनाकः। नक्रः कुम्भीरः। नक्रस्तु कुम्भीर इत्यमरः। स चन्द्रः। यदि आह्लादे। स्फायितञ्चिवञ्चीति रक्। अवदानां सुखघटना-मानन्दकर्त्री। खहिते रतान् सन्तोषयतीत्यर्थः। यद्वा। अवद उत्सवप्रदयोना-मानन्दकरस्य। सुदावनं सुदवनं क्षौः पृथिव्या सुदवनं तेन बन्धुरिव बन्धुः। यथा च ज्ञानिदासः। तेनार्थिनोऽभिपरा(ङ्मुखेन तेन घृता विघ्नभयं क्रियावान्। वेनास क्षोक;

दयहेतुः काञ्चनशोभां बिभ्रदचलाधिकलक्ष्मीः सुमेरुरिव। यस्य च रिपुवर्गः सदा पार्थोऽपि न महाभारतरणयोग्यः, भीष्मोऽप्यशान्तनवेर्हितः, सानुचरोऽपि न गोत्रभूषितः। अपि च त्रिशङ्कुरिव नक्षत्रपथस्खलितः, शङ्करोऽपि न विषादी, पावकोऽपि न कृष्णवर्त्मा, आग्नेयाग्नोऽपि न दहनः, नान्तक इवाकस्मादपहृत-

---

पितृमान् विनेवा तेनैव श्लोकापनुदेन पुत्री॥ ग्राम आगत इतिवत् कीर्तनस्येषूपचारः। कलाश्चतुःषष्टिकलाः। नतमरातिबलं यस्मात्। पक्षे—चण्डा रात्रिः। कुमुदं कैरवम्। कलाः षोडश कलाः। न तारा नक्षत्राण्यतिबला यस्मात्। मित्रं सुहृत्। किञ्च चकारो वार्थे, कां वा श्रीमां न बिभ्रत्? अचला स्थिरा, अधिका लक्ष्मीर्यस्य। पक्षे—मित्रः सूर्यः। काञ्चनं सुवर्णम्। अचलेभ्यः पर्वतेभ्योऽधिका लक्ष्मीर्यस्य। ("अथ मित्रः सखा सुहृत्"। "दृप्तक्षत्रियनिर्मिदः" इत्युभयत्राप्यमरः) पुनर्विरोधाभासेनाह —पार्थोऽर्जुनस्तस्य महाभारत-रण-योग्यतानिषेधो विरोधः। एवमग्रेऽपि। पक्षे—यस्य रिपुवर्गो महतो भारस्य तरणे योग्योऽपि न, अत एव सदा सर्वकालेऽपार्थः अपगतोऽर्थः प्रयोजनं यस्य तादृशः। भीष्मोऽपि अशान्तनुपुत्रोऽपि, अशान्तनवे पितृभिन्नाय हितः, पित्रे न हित इति विरोधः। भीष्मो राजगुणैर्भयानकः; तथाच कालिदासः,— "भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम्। अधृष्यश्चाधिगम्यश्च यादोरत्नैरिवार्णवः॥" इति। ("दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्" इत्यमरः) अशान्तमनस्तमितं नवं स्तुत्यमीहितं चेष्टितं यस्य; [णु स्तवने इत्यस्य ऋदोरप्] यद्वा— नवं नवीनमन्यार्थं विलक्षणम्। शान्तनुवाचकः शब्दो दीर्घादिः शान्तनुरित्यप्यस्ति; तथाच विविक्तमभट्टः शान्तनुतनयः इति, तत्र शान्तनोस्तनयः शान्तनुतनयः इत्येकोऽर्थः। पक्षे—शान्तो नुतो नयो यस्येति। सानुषु शिखरिषु चरति तादृशोऽपि न गोत्रभुवि पर्वतभूमावुषितः स्थित इति विरोधः। अनुचरैः सेवकैः सहितः; न गोवैर्गोविलेभ्यूषित इति परिहारः, स्वयमेव तेषां भूषक इत्यर्थः। [नञर्थकनञ्शब्देन सुप्सुपेति समासः] त्रिशङ्कुरिव नक्षत्रपथस्खलितः। नक्षत्रपथे आकाशे। पक्षे—नक्षत्रपथात् नक्षत्रधर्मात्। शङ्करः शिवो विषादी विषभक्षकी नेति विरोधः। शङ्करः सुखकरः, न विषादी न दुःखीति परिहारः। पावकोऽग्निरपि न कृष्णवर्त्मा नाग्निरिति विरोधः। पावकोऽन्येषां पवित्रकर्त्ता न कृष्णवर्त्मा न दुराचार इति परिहारः। ("वह्निः शुक्रा कृष्णवर्त्मा कृशानुः पावकोऽनलः" इत्यमरः। "कृष्णवर्त्मा हुताशे स्याद्दुराचारे विधुन्तुदे" इति विश्वप्रकाशः) आग्नेयाग्नोऽपि वह्निरपि न दहनो न वह्निरिति

जीवनः, न राहुरिव मित्रमण्डलग्रहणविवर्द्धितरुचिः, न नल इव कलिविघटितः, न चक्रीव शृगालवधस्तुतिसमुल्लसितः, नन्दगोप इव यशोदयाऽऽश्रितः, जरासन्ध इव घटितसन्धिविग्रहः, भार्गव इव सदा नभोगः, दशरथ इव सुमित्रोपेतः सुमन्त्राधिष्ठितश्च, दिलीप इव सुदक्षिणानुरक्तो रक्षितगुरुश्च, राम इव जनित-कुशलवयोरूपोच्छ्रायः।

तस्य च पारिजात इवाश्रितनन्दनः, हिमालय इव जनित-

विरोधः। आश्रयाणामाशा तृष्णा यस्मिन्नाश्रयाशः; न दहनो नेतानां सन्तापक इति परिहारः। ("आश्रयाशो हुतभुजि दहनो हव्यवाहनः" इत्यमरः) नान्तक इव यम इवाकस्मात् सहसा अपहृतं जीवनं जीवितं येन। पक्षे—जीवनं जीविका [करणे ल्युट्] न राहुरिव मित्रमण्डलग्रहणेन सूर्यमण्डलग्रहणेन विवर्द्धिता रुचिर्दीप्तिर्यस्य सः। पक्षे—सुहृद्राज्यग्रहणे विवर्द्धिता रुचिरिच्छा येन सः। न नल इव कलिना युगविशेषेण विघटितो व्याप्तः। पक्षे—कलिः कलहः। न चक्रीव कृष्ण इव शृगालस्य राजविशेषस्य वधेन मारणेन स्तुत्या समुल्लसितः। पक्षे—शृगालः कातरः। ("शृगाली लम्बुके भीरु शूरे वै पार्थिवान्तरे" इति विश्वः। कोशे दानवान्तर इति पाठस्त्वशुद्ध एतन्मूलक एव जगद्धरभट्टस्य।) नन्दगोप इव यशोदया तन्नामनिजस्त्रियान्वितः। पक्षे—यशसा दयया च। जरासन्ध इव घटितसन्धिविग्रहः शरीरं यस्य। पक्षे—घटितौ सन्धिविग्रहौ येन सः। भार्गव इव शुक्र इव, सदा सर्वदा नभोग आकाशगामी। पक्षे—दानभोगाभ्यां सहितः। दशरथ इव सुमित्रया लक्ष्मणजनन्योपेतो युक्तः, सुमन्त्रसञ्ज्ञकसारथिना अधिष्ठित आश्रितश्च। पक्षे—सुमित्रेणोत्तमसुहृदा, सुमन्त्रेण शोभनगुप्तवादेन। दिलीप इव सुदक्षिणायां तन्नाम्न्यां पत्न्यामनुरक्त आसक्तः, रक्षिता पालिता गोवांशिष्ठी येन तादृशश्च। पक्षे—सुदक्षिणायां पात्रे दानव्यये, रक्षिता गोः पृथ्वी वाणी वा येन सः। ("स्वर्गेषुपशुवाग्वज्र-दिङ्नेत्रपृष्ठिभूजले। स्त्र्यष्टद्र्या स्त्रियां पुंसि गौः" इत्यमरः) राम इव जनितः कुशलवयोः रूपस्य सौन्दर्य्यस्योच्छ्राय औन्नत्यं यस्मिन्। पक्षे—रामे यथा रूपोच्छ्रायस्तथा जनितकुशलवयोः। विभक्तश्लक्ष्णश्लेषोऽयं लोलोत्पलमालिनी नेत्रे तनुवां हरेरितिवत्। तथा च कालिदासः,—"रूपं तदीयमिदमेव वयश्च तदेव यौवं तदेव नवसर्गकमुन्नतत्वम्। न कारणात् खादविभिद्य कुमारः प्रवर्त्तनो दीप इव प्रदीपात्॥" इति।

शिवः, मन्दर इव भोगिभोगाङ्कितः, कैलास इव महेश्वरोपभुक्त-कोटिः, मधुरिव नानारामानन्दकरः, क्षीरोदमथनोद्यतमन्दर इव सुखरितभुवनः, रागरज्जुरिवोल्लासितरतिः, ईशानभूतिसञ्चय इव सम्योच्छलितः, शरन्मेघ इवावदातहृदयः विष्णुपदावलम्बी

तस्य पुत्रः कन्दर्पकेतुनामेति सम्बन्धः। पारिजातो देवतरुः, ("पञ्चैते देवतरवो मन्दारः पारिजातकः" इत्यमरः) आश्रितं नन्दनमिन्द्रवनं येन सः, ("नन्दनं वनम्" इतीन्द्रप्रकरणेऽमरः) पक्षे—आश्रितान् नन्दयतीति तादृशः। हिमालयो हिमवान्। जनितोत्पादिता शिवा गौरी येन, ("शिवा भवानी रुद्राणी" इत्यमरः) पक्षे—शिवं सुखं, ("स्युः श्रेयसं शिवं भद्रम्" इत्यमरः) मन्दर इन्द्रकीलः। भोगी सर्पः। भोगः शरीरम्। पक्षे—भोगी सुखी। भोगः स्त्र्यादिसम्भोगः। ("उरगः पन्नगो भोगी"। "भोगः सुखे स्त्र्यादिसम्भावहेत्वे फणाक्षयोः"। इति उभयत्रापमरः) कैलासः पर्वतः। महेश्वरः शिवः। कोटिरयम्। ("कोटिरग्रे प्रकर्षे च" इति धरणिः। "रजताद्रिस्तु कैलासोऽष्टापदः स्फटिकाचलः" इति हैमः। "शिवः शूली महेश्वरः" इत्यमरः) पक्षे—महेश्वरैर्महाराजैरुपभुक्ताः कोटयस्तत्सङ्ख्याकानि धनानि यस्य सः। ("कोटिः स्त्री धनुषोऽग्रे स्यात् सङ्ख्याभेदप्रकर्षयोः" इति विश्वः) मधुर्वसन्तः। नाना आरामा अनेकोपवनानि तेष्वानन्दकर्ता। ("आरामः स्यादुपवनं कृत्रिमं वनमेव यत्" इत्यमरः। "अथ पुष्परसे मधु। दैत्ये चैत्रे वसन्ते च मधुः" इति विश्वः) पक्षे रामाः स्त्रियः। ("सुन्दरी रमणी रामा" इत्यमरः) क्षीरोदः क्षीरसमुद्रः। ["उदकस्योदः सञ्ज्ञायाम्" इत्युदकस्योदादेशः] ("रत्नाकरो जलनिधिर्यादसां पतिरप्पतिः। तस्य प्रभेदाः क्षीरोदो लवणोदस्तथाऽपरे॥" इत्यमरः) मन्दरो मन्थाचलः। सुखरितं शब्दायमानं भुवनं लोको येन। ("पद्मः कोलाहलस्तूतं जीवनं भुवनं वनम्" इत्यमरः। "इन्द्रकीलस्तु मन्दरः" इति हैमचन्द्रः) पक्षे—भुवनं जगत्। ("विष्टपं भुवनं जगत्" इत्यमरः) अस्मिन् पक्षे जयशब्दघोषश्चयेति शेषः। रागरज्जुः कामः। ("कन्दर्पो दर्पकः कामः प्रिखिसमुज्जयावहः। सर्वधर्ममनोहारी रागरज्जुः प्रकीर्तितः॥" इत्यमरशेषः) रतिः कामस्त्री। पक्षे—रतिरनुरागः। ईशानः शिवः। ("अथ ईशानः शङ्करः" इत्यमरः) भूतिर्भस्म। ("भूतिर्भस्मनि सम्पदि" इत्यमरः) सम्यःसूच्छलितः। पक्षे—सम्यग्धारयतीति सम्याः। ["आतश्चोपसर्गे" इति कः] सम्यः सम्यग्विचारकर्ता, अत एवाच्छलितः कैनापि

च, पार्थ इव समरसाहसोचितः, कंस इव कुवलयापीडभूषितः, तार्क्ष्य इव विनताऽऽनन्दकरः सुमुखनन्दनश्च, विष्णुरिव क्रोडीकृतसुतनुः, शान्तनव इव स्वयमध्यापितकालधर्मः, कौरव्यूह इव सुग्रमाधिष्ठितः, सुबाहुरपि रामानन्दः, समदृष्टिः

क्लृप्तुमशक्यः। ["तदस्य सञ्जातम्" इति क्लृप्तशब्दादितच्] शरत्कालिकमेघ इवावदातहृदयः जलसम्बन्धप्रतिभासमाननैर्ल्यरहितान्तःप्रदेशः। विष्णुपदावलम्बी आकाशावलम्बी। ("विष्णुविष्णुपदं वा तु पुंस्याकाशविहायसी" इत्यमरः) पक्षे—अवदातहृदयः शुद्धान्तःकरणः। ("हृदयं स्यान्मनो हृन्मानसं मनः" इत्यमरः) [दैप् शोधने इत्यस्मात् क्तः, "आदेचः" इत्यात्वम्] विष्णुपदं हरिचरणम्। पार्थोऽर्जुनः। समरे सङ्ग्रामे साहसं तदाचितो योग्यः। पक्षद्वयेऽपि समीर्थः। यद्वा—रसोऽनुरागः, साहसं क्षितम्, [आङीषदर्थे] समाभ्यां सर्वजनतुल्याभ्यां रसाहसाभ्यामुचितो योग्यः, धर्मराज इव समवर्त्तीत्यर्थः। ("अथो हसः। हासो हास्यं च" इत्यमरः) कंसस्तन्नामा दैत्यः। कुवलयापीडस्तद्धस्ती। पक्षे—कोः पृथिव्याः वलय इवापीड इव कुवलयापीडः पृथ्वीमण्डनायमान इति यावत्, तादृशेन भूषितः। "यस्याश्वैरश्वितूरनिकरः कर्णपूरो मयूरो भासो हासः कविकुलगुरुः कालिदासो विलासः। हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः केषां नैषा कथय कविता-कामिनी कौतुकाय॥" इतिवत्। ("कटको वलयोऽस्त्रियाम्।" "शिखास्रापीड-शेखरौ" इत्युभयत्राप्यमरः) तार्क्ष्यो गरुडः। विनता तन्माता तदानन्दकरः। ("गरुत्मान् गरुडस्तार्क्ष्यो वैनतेयः" इत्यमरः) पक्षे—विनतानां नम्राणामानन्दकरः। सुमुखाः पण्डितास्तेषां हर्षकर्त्ता। पक्षे—सुमुखो गरुडपुत्रः स नन्दनः पुत्रो यस्य सः। विष्णुरिव क्रोडीकृता शूकरीकृता शोभना तनुः शरीरं येन सः। (क्रोडः क्रोडश्च शब्दः। "क्रोडः शूकरमातङ्गोः" इति विश्वप्रकाशः। "स्त्रियां मूर्त्तौ तनुस्तनूः" इत्यमरः) पक्षे—क्रोडीकृतोत्सङ्गीकृता सुतनुर्येन सः। [आग्रीधवत तारस्यात् ताच्छन्द्यम्] ("उत्सङ्गशूकरौ क्रोडः" इति पादशीकाधिकारेऽनेकार्थध्वनिमञ्जरी) यद्वा—क्रोडीकृता आलिङ्गिता सुतनुर्येन सः। ("आलिङ्गनं परिष्वङ्गः संश्लेष उपगूहनम्। अङ्कपालिः परीरम्भः क्रोडीकृतिः" इति हैमः) शान्तनवो भीष्मस्तद्वत् स्वयं स्वापितः कालधर्मो मृत्युर्येन सः। ("स्यात् पक्षता कालधर्मो दिष्टान्तः प्रलयोऽस्त्रियः" इत्यमरः) पक्षे—कालस्य धर्मः; तथाच व्यासः,—"कामो वा कारणं राज्ञो

रपि महेश्वरः, मुक्तामयोऽप्यतरलमध्यः, जलद इव विमल-तरवारिधारावासितराजहंसः, वंशप्रदीपोऽप्यच्चतदशस्तनयः कन्दर्पकेतुर्नाम।

येन च चन्द्रेणेव सकलकलाकुलगृहेण, शर्वरीतिहारिणा,

राजा वा कालकारणम्। इति ते संशयो मा भूदाजा कालस्य कारणम्॥ राजा धर्मस्य कारणम्" इति स्मृतिः। कौरवव्यूहे सुशर्मा नाम योद्धा। पक्षे—सुशर्मणा अतिसुखेनाधिष्ठितः। ("शर्मशातसुखानि च" इत्यमरः) पुनर्वैरीधा-भासेनाह—सुबाहुरामको राक्षसः। रामो दाशरथिः। सुबाहुराक्षसस्य रामानन्द-कर्तृत्वं विरोधः। अवापिनाऽऽपाततो विरोधः, पश्चात्तस्य परिहारः। सुबाहुः शोभनभुजः। रामाः स्त्रिय आनन्दयतीति तच्छील इति परिहारः। ("सुजबाहू प्रविष्टो दोः"। "सुन्दरी रमणी रामा" इत्युभयत्राप्यमरः) समदृष्टिः अविषमदृष्टिः। महेश्वरः शिवः। ("शिवः शूली महेश्वरः" इत्यमरः) शिवः समदृष्टिरिति विरोधः। पक्षे—समदृष्टिः सर्वजनेषु समानदर्शनः, महेश्वरो महाराजः। ("स्वामी त्वीश्वरः पतिरीशिता" इत्यमरः) मुक्तामयो मौक्तिकप्रचुरः। ["तत्प्रकृतवचने" इति मयट्] अतरलमध्यः तरलो हारमध्यमणिस्तद्रहितो मध्यो यस्य सः; हारस्यातरलमध्यता विरोधः। ("तरलो हारमध्यगः" इत्यमरः) अत्र मध्यशब्दप्रयोगस्तु "येषो निवापाञ्जलयः पितृणाम्" इत्यादिवद्बोध्यः। वस्तुतस्तु मध्यशब्दरहितः पाठः। पक्षे—मुक्तामयो नीरोगः। अतरलो धीर इति परिहारः; पराङ्मुखासु पराङ्मुख इत्यर्थः। ("रोगव्याधिगदामयाः"। "चञ्चलं तरलं चैव" इत्युभयत्राप्यमरः) जलदो मेघः। विमलतरया अतिस्वच्छया वारिधारया वासिता राजहंसा येन सः। ("राज-हंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः" इत्यमरः। उपलक्षणे तृतीया) पक्षे—विमलस्तरवारिः खड्गलतीयधारया वासिता राजान एव हंसा येन सः। ("करवाल-निस्त्रिंशक्षुरिकाखड्गास्तरवारिकौक्षेयकमण्डलाग्राः" इति हैमः। "खड्गादीनां च निशित-मुखे धारा प्रकीर्तिता" इति विश्वः) वंशप्रदीपः वंशे वेणौ प्रदीपः आकाश-दीपः। अचता अदग्धा दशा वर्तिर्यस्य तादृशः, दीपस्यादग्धवर्तिता विरोधः। पक्षे—वंशप्रदीपः कुलदीपः। अचता अनष्टा दशा अवस्था यस्य तादृशः। ("दशा वर्तिर्दशा वस्त्रं" इति हारावली। "दो वंशो कुलसन्तरौ"। "दशाऽवस्था-ऽनेकविधा" इत्युभयत्राप्यमरः।

दलितकैरवेण, कुमुदवनबन्धुना, प्रसाधिताशेन विलोकिताः, जलधय इवोल्लसितगोत्राः, सुदूरविवर्द्धितजीवनाः, प्रसन्नसत्त्वाः सन्तः परां हृद्धिमवापुः।

यस्य च जनितानिरुद्धलीलस्य, रतिप्रियस्य, कुसुमशरासनस्य मकरकेतोरिव दर्शनेन वनिताजनस्य हृदयमुल्ललास।

यस्मै चानुगतदक्षिणसदागतये, श्रुतिसुखदकोमलकोकिल-

श्लेषोपमाद्वितीयेनाह—येन कन्दर्पकेतुना चन्द्रेणेव सकलकलाकुलगृहेण। पुनरुक्तोऽसौ श्लेषः। शर्वरीतिहारिणा शर्वस्यां रात्रौ रीतिरिवेतिर्दुःखदत्वात् तमसङ्गारिणा तन्नाशकेन। दलितकैरवेण विकासितकुमुदेन। प्रसाधिता अलङ्कृता आशा दिशो येन तादृशेन। विलोकिता दृष्टाः। जलधय इव समुद्रा इवोल्लसितगोत्रा उल्लसित-पर्वताः, सुदूरविवर्द्धितजीवना दूरप्रवृद्धजलाः, प्रसन्नसत्त्वाः प्रसन्नजन्तवः सन्तः परामुत्कृष्टां हृद्धिमवापुः। ("सत्त्वोऽस्त्री जन्तुषु क्लीवे व्यवसाये पराक्रमे" इति वैजयन्ती। "अथ शर्वरी निशा निशीथिनी रात्रिः"। "प्रसाधितोऽलङ्कृतश्च"। "आशाश्च हरितश्च ताः"। "सिते कुमुदकैरवे"। "अद्रिगोत्रगिरिव्रावा"। "जीवनं भुवनं वनम्"। "कबन्धमुदकं पाथः" इति षट्स्वप्यमरः) अथान्तरे—शर्वस्य शिवस्य रीतिः सम्प्रदायस्तेन हारी मनोहरः तेन। दलितानि नाशितानि कैरवाणि शत्रवो येन। प्रकर्षेण साधिता आशा अर्थिनामभिलाषो येन। [साध संसिद्धौ] उल्लसित-गोत्राः प्रसिद्धवंशाः, सुदूरमायतं विशेषेण वर्द्धितं जीवन्त्यनेनेति जीवनं जीविका येषां तादृशाः, प्रसन्नसत्त्वाः प्रसन्नस्वभावाः, सन्तः कोविदाः। ("कैरवो चन्द्रिका प्रोक्ता कैरवं कुमुदे द्विषि"। "सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोः॥" इत्युभयत्रापि विश्वः। "सन् सुधीः कोविदो बुधः" इत्यमरः)।

यस्य कन्दर्पकेतोर्जनितोत्पादिता अनिरुद्धलीलाविलासो येन तस्य, दर्शनेन वनिताजनस्य हृदयमुल्लासोल्लासं प्रापत्। ("अनिरुद्ध उषापतिः"। "लीला विलासक्रिययोः" इत्युभयत्राप्यमरः) पक्षे—जनितानिरुद्धलीलस्योत्पादितानिवारित-विलासस्य। रतिप्रियस्य अनुरागवल्लभस्य। कुसुमशरं काममसति क्षिपति अतिसुन्दर-त्वात् तादृशस्य। [असु क्षेपणे] ("स्त्रीणां विलासविब्बोक-विभ्रमा ललितं तथा। हेला लीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः॥" इत्यमरः)।

श्लेषोपमाद्वितीयेनाह—वसन्तायेव यस्मै तरुणः स्पृहयाञ्चक्रुरिति कुलजः।

कृताय, विकासितपल्लवाय, कृतकान्तारतरङ्गाय, सुरभिसुमनोऽभिरामाय, सर्वजनसुलभपद्माय, विस्तारितकनकसम्पदे, अतिक्रान्तदमनकाय वसन्तायेव, वनलता इवोत्कलिकासहस्रसङ्कुलाः, भ्रमरसङ्गताः, प्रवालहारिण्यः, विलसद्वयसस्तरुण्यः स्पृहयाञ्चक्रुः।

["स्पृहेरीप्सितः" इति सम्प्रदानसञ्ज्ञा] अनुगतो दक्षिणसदागतिर्दक्षिणमारुतो यं तस्मै। श्रुतिसुखः कोमलं कोकिलरुतं पिकशब्दो यत्र तस्मै। कृतः कान्तारस्य काननस्य तरङ्गः कम्पनं येन तादृशाय। विकासितः पल्लवः किसलयानि येन तादृशाय। सर्वजनानां सुलभं पद्मं यत्र तादृशाय। विस्तारिता कनकस्य धुस्तूरस्य सम्पत् येन तादृशाय, अत एव सुरभयः सुगन्धयः सुमनसः पुष्पाणि ताभिरभिरामाय सुन्दराय। अतिक्रान्तो दमनकः पुष्पविशेषो येन तथाभूताय; शिशिरत्वात् तस्यातिक्रम इति भावः। वनलता इवोत्कलिकासहस्रेणोद्गतकोरकसहस्रेण सङ्कुला व्याप्ताः। भ्रमरैर्मधुपैः सङ्गताः। प्रवालेन नवपल्लवेन हारिण्यो मनोहराः। विलसद्वयसो विलसत्यौवनाः। ("वायुर्मातरिश्वा सदागतिः"। "श्रुतिः स्त्री श्रवणं श्रवः"। "कोकिलः पिक इत्यपि"। "तिरश्चां वासितं रुतम्"। "पल्लवोऽस्त्री किसलयम्"। "वा पुंसि पद्मं नलिनम्"। "धुस्तूरः कनकाह्वयः"। "सुरभिर्घ्राणतर्पणः"। "इष्टगन्धः सुगन्धिः स्यात्"। "स्त्रियः सुमनसः पुष्पम्"। "कलिका कोरकः पुमान्"। "षट्पदभ्रमरालयः"। "प्रवालमङ्कुरेऽप्यस्त्री"। "खगबाल्यादिनोर्वयः" इति चतुर्दशस्वमरः। "कान्तारः काननं चैत्यो"। "कनकं धत्तूरे हेम्नि धुस्तूरेऽपि निगद्यते"। इत्यमरेऽपि विश्व। "दमनौ शोरपुष्पयौ" इति धरणिः) पक्षे—अनुगतानां दक्षिणानामुदाराणां सदा सर्वदा गतिरागमनं तस्मै। [तादर्थ्ये चतुर्थी] यद्वा—अनुगता सेवका दक्षिणा व्यवहारकुशलाः सत्यश्च तेषामागतिरा साकल्येन गतिर्निर्वाहो यस्मात्, विविधस्यापि जनस्य पालनकर्तृत्वम्। श्रुतिसुखं कोमलं कोकिलवत् रुतं शब्दो यस्य तस्मै। [रु शब्दे क्तः] कृतः कान्तानां स्त्रीणां रतरङ्गः सुरतरङ्गो येन तस्मै, अत एव विकासितः पल्लवः शृङ्गारो येन तादृशाय, अत एव सुरभिसुमनोभिः सुगन्धिपुष्पैरभिरामाय। यद्वा—सुरभयः ख्याताः सुमनसः पण्डितास्तैः। सर्वजनानां सुलभा पद्मा लक्ष्मीर्यस्य तादृशाय। विस्तारिता कनकस्य सुवर्णस्य सम्पत् येन तादृशाय। अतिक्रान्तो दमनको गौरो येन तस्मै। यद्वा—दमयतीति दमः शत्रुः। उत्कलिका उत्कण्ठाकाणां

यस्य च समरभुवि भुजदण्डेन कोदण्डं, कोदण्डेन शराः, शरैररिशिरः, तेनापि भूमण्डलं, तेन चाननुभूतपूर्वो नायकः, नायकेन कीर्त्तिः, कीर्त्या च सप्त सागराः, सागरैः कृतयुगादिराजचरितस्मरणम्, अनेन च श्लेष्यम्, अमुना च प्रतिक्षणमास्थेयमासादितम्।

यस्य च प्रतापानलदग्धानां रिपुसुन्दरीणां करतलताड़नभीतैरिव मुक्ताहारैः पयोधरपरिसरो मुक्तः।

यस्य च निशितनाराचजर्जरितमत्तमातङ्गकुम्भस्थल-

सङ्गेन सङ्गताः। भ्रमरैः कामुकैर्ललाटालकैर्वा सङ्गताः। प्रवालो विद्रुमः, हारो मुक्तावली, तौ को यासां ताः। यद्वा—प्रकृष्टा बालाः कैशोरैर्हारिण्यो मनोहराः। विलसदयौ यौवनं यासां ताः। ("दक्षिणे सरलोदारौ"। "मैथुनं निधुवनं रतम्"। "लक्ष्मीः पद्मालया पद्मा"। "स्वर्णं सुवर्णं कनकम्"। "लक्षरुद्धोल्लसिकौ समौ"। "अथ विद्रुमः पुंसि प्रवालः पुंनपुंसकम्"। "चिकुरः कुन्तलो बालः"। "हारो मुक्तावली" इत्यप्यमरः। "पल्लवः स्यात् किसलये शिखण्डबर्हारयोरपि"। "सुरभिः सौरभे ख्याते वसन्ते पण्डितेऽपि च"। "भ्रमरः कामुके भृङ्गे ललाटालकयोरपि" इति विश्वेऽपि विश्वः। "वयो बाल्यादि पक्वी च यौवनं च कृचिद्वयः" इति शाश्वतः)।

मालादीपकेनाह—यस्य कन्दर्पकेतोः समरभुवि रणाङ्गणे भुजदण्डेन कोदण्डं धनुः समासादितम्। अत्र यथायथं लिङ्गव्यत्ययो वचनव्यत्ययश्च। ("शरासनकोदण्डकार्मुकम" इत्यमरः) पूर्वं ननुभूतोऽननुभूतपूर्वस्तादृशो नायकः कन्दर्पकेतुः। कृतयुगादिराजानां प्रियव्रतसगरादीनां चरितं खेनैव तेजसा लोकप्रकाशनादि तत्स्मरणम्, अनेन स्मरणेन श्लेष्यम्, अमुना श्लेष्येणास्थेयं, स्मरणस्यानुविनाशित्वात्। "मालादीपकमाद्यं चेत् यथोत्तरगुणावहम"।

यस्य कन्दर्पकेतोः प्रतापानलदग्धानां रिपुसुन्दरीणां करतलेन ताडनं पत्युर्मरणोत्तरमुरस्ताड़नं तेन भीतैरिव मुक्ताहारैः पयोधरपरिसरो मुक्तः। उत्प्रेक्षालङ्कारः। "सम्भावना स्यादुत्प्रेक्षा" इति लक्षणात्। ("पयोधरभृः परिसरः" इत्यमरः)।

यस्य कन्दर्पकेतोः समर एव सागरस्तस्मिन् खड्गो रराजेत्यन्वयः। निशितनाराचैस्तीक्ष्णबाणैर्जर्जरितानि शिथिलावयवानि यानि मत्तमातङ्गकुम्भस्थलानि

विगलित-मुक्ताफलनिकरदन्तुरितपरिसरे, पतत्पवरथे, रक्तवारि-सञ्चरदनेकच्छायोत्पलपुण्डरीकवाहिनीशतसमाकुले, नृत्यत्-कबन्धे, सुरसुन्दरीसमागमोत्सुकचारुभटाहङ्कारसम्भारभीषणे समरसागरे भिन्नपदातिकरितुरगरुधिरार्द्रजयलक्ष्मीपादालक्तक-रागरञ्जित इव खड्गो रराज।

अथ कदाचिदवसन्नायां यामवत्यां दधिधवले कालच्छपणक-यासपिण्डे इव, निर्गायमुनाफेनपुञ्जे इव, मेनकानखमार्जन-

---

तैर्यो विगलितैः स्खलेर्मुक्ताफलनिकरैर्दन्तुरितो दन्तुरवदाचरितः परिसरो यस्य तस्मिन्। [दन्त उन्नत उरच्। उन्नता दन्ता अस्य दन्तुरः, अस्मादाचारे क्विप्, क्तः इट्] यद्वा—दन्तुरं विषमान्तरं तद्वदाचरितम्। ("दन्तुरं वाच्यवद्विद्याद्दन्तुरे विषमान्तरे" इति विश्वप्रकाशः) पतत्पवरथे पतद्धाणे। रक्तमेव वारि जलं तत्र सञ्चरदनेकच्छायमनेककान्ति उद्गतं पलं मांसं यस्मात् उत्पलं मांसशून्यं तच्च पुण्डरीकं सितच्छदं च यत्र तादृशं यद्वाहिनीशतं सेनाशतं तेन समाकुले। नृत्यत्कबन्धे नृत्यच्छिन्नमस्तकवीरे। सुरसुन्दरीणामप्सरसां समागमोत्सुकानां चारुभटानां योधा-नामहङ्कारोऽहमहमित्यस्य सम्भारेण भीषणे। षष्ठ्यहङ्कार इति निर्देशात् समुदायादपि कारः। यद्वा—अहङ्कारस्य गर्वस्य सम्भारेण भीषणे। ("भटा योधाश्च योडारः" "कबन्धोऽस्त्री क्रियायुक्तामपमूर्द्धकलेवरम्" इति हयीरभ्यमरः। "तरङ्गिण्यां च सेनायां वाहिनी परिकीर्त्तिता" इति विश्वः। "उत्पलं कुवलभूरुहे। इन्दीवरे मांसशून्ये" इति हैमः। "पुण्डरीकं सिताम्भोजे सितच्छत्रे च भेषजे" इति विश्वप्रकाशः। "पवरथो बाणपत्ते" इति धरणिः) पत्ते—पवरथः पत्ती। उत्पलमिन्दीवरम्। पुण्डरीकं सिताम्भोजम्। कबन्धं जलम्। वाहिनी नदी। ("कबन्धमुदकं पाथः" इत्यमरः) सुरसुन्दरी मत्स्यभेदश्चारुभटोऽपि। श्लेषानुप्राणाभ्यामुपमाश्लेषरूपकोत्प्रेक्षालङ्काराणां यथासङ्ख्यं सङ्करसंसृष्टी। ओजो गुणः। वैदर्भी रीतिः।

अथानन्तरं, स इति शेषः। कन्दर्पकेतुः कदाचिदवसन्नायां समाप्तायां रजन्या-मष्टादशवर्षदेशीयाम् ["ईषदसमाप्तौ कल्पब्देश्यदेशीयर्" इति देशीयः] ईषद-समाप्ताष्टादशवर्षां कन्यां स्वप्नेऽपश्यदित्यन्वयः। अवसन्नायामित्यनेन स्वप्नस्य शीघ्र-फलदत्वं ध्वनितम्; तदुक्तं गुरुणा—"अरुणोदयवेलायां दृष्ट्वा स्वप्नं फलं भवेत्" इति।

शिलातलके इव, मधुच्छत्रच्छायमण्डलोदरे, पश्चिमाचलोपधान-सुखनिलीनशिरसो राजततटाके इव शेषमधुभाजि चषके इव विभावरीवध्वाः, अपरजलधिपयसि शङ्खकान्तिकामुके मज्जति कुमुदिनीनायके, शिशिरकर्दमितकुमुदधूलिमध्यबद्धचरणेषु षट्-चरणेषु, कलप्रलापबोधितचकिताभिसारिकासु सारिकासु, प्रबुद्धाध्ययनकर्मठेषु मठेषु, विभासरागसुखरकार्पटिकजनोप-गीयमानकाव्यकथासु रथ्यासु, सकलनिपीतनिशातिमिरमति-

---

एतादृशे कुमुदिनीनायके चन्द्रेऽपरजलधिपयसि पश्चिमसमुद्रजले मज्जति सतीत्य-न्वयः। काल एव अवयवकस्तस्य दधिधवले यासपिण्डे इव; अवयवस्य भक्षणार्थं दधिधवलः पिण्डो दीयते इति प्रसिद्धम्। निशा रात्रिः सैव यमुना तस्याः फेनपुञ्ज इव। मैनकानलखण्डालनार्थं शिलातलके "भांवां" इति भाषायाम्। मधुच्छत्रस्य छाया मधुच्छत्रच्छायं ["विभाषासेना—" इति क्लीबत्वम्] तदेव मण्डलोदरं मण्डलमध्यो यस्य तस्मिन्। पश्चिमाचलोऽस्ताद्रिः, स एवोपधानं शिरोऽवलम्बनं, तत्र सुखेन निलीनं स्थितं शिरो यस्यास्तस्या विभावरीवध्वा रात्रिस्त्रिया राजततटाके इव रौप्य-कर्णभूषणविशेषे इव "ढैंड़ो" इति भाषायाम्। तस्या एव शेषमधुभाजि पीतशेषमद्य-सहिते चषके पानपात्रे इव। शङ्खकान्तेः कामुकेऽभिलाषुके तुल्ये इव। ("चषकोऽस्त्री पानपात्रम्"। "उपधानं तूपबर्हः"। "कामुके कमितानुजः" इत्यमरश्चिष्वपि) उत्प्रेक्षालङ्कारः। शिशिरेण तुषारेण कर्दमितः कर्दमवदाचरितः कुमुद-धूलिमध्ये बद्धाश्चरणा येषां तादृशेषु षट्चरणेषु भ्रमरेषु। ("शिशिरः स्यादृतौ भेदे तुषारे शीतलेऽखवत्" इति विश्वप्रकाशः। "षट्पदभ्रमरालयः" इत्यमरः) कलप्रलापोऽव्यक्तमधुरध्वनिस्तेन बोधिता अत एव चकिता अभिसारिका याभिस्तासु सारिकासु। ("बालाङ्गिनी तु या याति सङ्केतं साऽभिसारिका" इत्यमरः) सारिकाशब्दलालित्यादिदंत्यादिश्च, तदुक्तमूषमभेदे—"स्त्रीलिङ्गोऽयं शारिः शकुनि-विशेषे तु दन्त्यशालिश्च" इति। प्रबुद्धा अध्ययनकर्मठा अध्ययनशीला येषु तादृशेषु मठेषु छात्रादिनिलयेषु। ["कर्मणि घटोऽठच्" इत्यठच्प्रत्ययः] ("कर्मशीलस्तु कर्मठः"। "मठश्छात्रादिनिलयः" इति धरणीधरः) विभासरागेण रागविशेषेण सुखर-काार्पटिकजनैर्वस्त्रयाचकजनैः, "कपड़िया" इति भाषाप्रसिद्धैरुपगीयमाना

तनीयस्तया वोढुमसमर्थेष्विव, कज्जलव्याजादुद्गमत्स्विव, कामिमिथुननिधुवनलोलादर्शनार्थमिवोद्गोविकाशतदानखिन्नेषु, विविधबन्धरतक्रीड़ासाक्षिषु, शरणागतमिवाधोलोनं तिमिरमवत्सु, दुर्जनेष्विव दग्धस्नेहतया मन्दिमानमुपगतेषु, अतिवृद्धेष्विव दशाऽन्तमुपगतेषु, विपन्नसदीश्वरेष्विव पात्रमात्रावशेषेषु, दानवेष्विव निशाऽन्तमध्वचारिषु, अस्तगिरिशिखरेष्विव पत-

---

काव्यकथा यासु ताडयीषु रथ्यासु प्रतोलीषु। गानेऽनतिपाटवं ज्ञापयितुं मुखरशब्दप्रयोगः। ("रथ्या प्रतोली विशिखा" इत्यमरः) यमकालङ्कारः। प्रदीपेष्वेवंविधेषु सत्स्वित्यन्वयः। अतितनीयस्तया अतिशयेन सकल निपीतं निशातिमिरं तद्वोढुमसमर्थेष्विव। निधुवनलोला सुरतक्रीड़ा। ("मैथुनं निधुवनं रतम्" इत्यमरः) उद्गोविका गीवाद्यननक्रिया, तस्याः प्रतं, तद्दानं विधानम्। विविधबन्धो मयूरादिबन्धो यत्र ताडयतक्रीड़ानां साक्षिषु साक्षाद्दृष्टृषु। शरणागतमिवाधोलीनम् अधस्तात्स्थितं तिमिरमन्धकारमवत्सु रक्षत्सु। तथाच वराहः,—"नार्त्ता न भीता न क्षयानना च विमुक्तयस्त्रा विपलायमानाः। चौर्यायुधा वाजिगतावतीर्णा श्रुते न बध्या न च पीड़नीयाः॥ कुलैकतन्तुः शरणागतो वा क्षतात्त्रियं वदेत तत्रास्ति॥" इति। उत्तरत्र बध्या इत्यादौ वचनविपरिणामः। ("शरणं गृहरक्षित्रोः"। "तमिस्रं तिमिरं तमः" इतिद्वयोरप्यमरः) उल्लेखालङ्कारः। दुर्जनेष्विव दग्धस्नेहतया नष्टप्रेमत्वेन, मन्दिमानं सुहृत्कर्मणि शिथिलताम्। ("स्नेहोऽनुरागसैक्ष्ण्यं तैलेऽपि च निगद्यते" इति धरणिः) पक्षे—स्नेहस्तैलम्। मन्दिमानमल्पतेजस्त्वम्। अतिवृद्धेष्विव दशाऽन्तं वयसोऽन्तमुपगतेषु। पक्षे—दशाऽन्तं वर्त्तिकाऽन्तम्। ("दशा वर्त्तिर्दशा वयः" इति हारावली) विपन्नसदीश्वरेष्विव सर्वस्वदानादिना प्राप्तदारिद्र्येष्विव; एतच्च सत्पदेव ध्वनितम्; पात्रमात्रावशेषेषु देहमात्रावशेषेषु। तथा च कालिदासः,—"शरीरमात्रेण नरेन्द्र! तिष्ठन्नाभासि तीर्थप्रतिपादितार्द्धः। आरण्यः कापात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः॥" इति। ("पात्रं तु भाजने योग्ये हेये तीरतयाऽन्तरे" इति मेदिनीकरः) यद्वा—पात्रमस्यास्तीति। ("पात्रं सुवादौ पर्णे च राजभल्लिषि चेष्यते" इति विश्वप्रकाशः) पक्षे—पात्रं भाजनम्। दानवेष्विव निशाविशेषा अन्तमध्वचारिषु। पक्षे—निशाऽन्तं गृहं तस्मात्पथचारिषु। ("निशा

व्यतङ्क्षेषु प्रदीपेषु, अनवरतमकरन्दबिन्दुसन्दोहलुब्धमधुकर-निकुरुम्बझङ्कारमुखरितेषु, म्लानिमानमुपगच्छत्सु वासागार-कुसुमोपहारेषु, विगलत्कन्दैरलकैः प्रियविरहशोकादाप्यबिन्दू-निवोत्सृजतीषु, प्रियतमगमननिषेधमिव कुर्वतीषु वाचाल-तुलाकोटिभिश्चरणपल्लवैः, रजनिशेषसुरतभरपरिश्रमविगलित-केशपाशदरदलितमालतीमालापरिमललुब्धमधुकरनिकरपक्षा-निलनिपीतनिदाघजलशीकरासु, उद्देशङ्गजवल्लिकङ्कणझणत्कार-मुखरासु, नवनखपदसंसक्तकेशनिर्मोकवेदनाकृतशीत्कारविनि-

---

ऽलवस्यसदनम्" इत्यमरः) अस्तगिरिरस्ताचलस्तच्छिखरेष्विव। पतङ्गाः सूर्यः। पक्षे—पतङ्गाः शलभाः। ("पतङ्गः शलभादित्यौ" इति विश्वः। "अस्तं चरमः" इत्यमरः) एतादृशेषु वासागारकुसुमोपहारेष्वित्यन्वयः। अनवरतं मकरन्दबिन्दु-सन्दोहैः पुष्परससमूहैस्तत्र लुब्धमधुकराणामभिलाषुकमधुपराणां निकुरुम्बं यूथं तस्य झङ्कारेण रवविशेषेण मुखरितेषु शब्दायमानेषु। ("सन्दोहविसरव्रजाः"। "लुब्धो-ऽभिलाषुकस्तृष्णाक्" "निकुरुम्बं कदम्बकम्" इति त्रिकाण्डशेषः) एतादृशीषु प्रियतमा-स्वित्यन्वयः। विगलत्कन्दैः पतत्कुन्दकुसुमैरलकैः। [करणे तृतीया] प्रियविरहेण भाविप्रियविरहेण शोकस्तदादाप्यबिन्दूनिवोत्सृजतीषु, अनेन दृष्टिर्ध्वनिता; अत एव प्रियगमननिषेधमिव कुर्वतीषु। तदाह नारदः,—"अकालजेषु नृपतिर्विद्युद्भिर्जित-दृष्टिषु। उत्पातेषु विविधेषु समरात्तु न व्रजेत॥" इति। प्रवत्स्यत्पतिका नायिका। ("प्रवत्स्यति प्रियतमे प्रवत्स्यत्पतिकेष्यते" इति रसरत्नहारः) अस्तोत्प्रेक्षयोः सङ्करः। वाचालास्तुलाकोटयो येषु तादृशैश्चरणपल्लवैरुपलक्षितासु। [उपलक्षणे तृतीया] ध्वनितमनेन ध्वनितम्। ("स्याज्झाङ्कारस्तु वाचालः"। "पादाङ्कटं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम्" इति हलायुधोऽमरः) रजनिशेषः पद्मविकास-कालस्तत्र सुरतभरस्तेन परिश्रमस्तेन विगलितः केशपाशः केशकलापस्तत्र दरदलिता-नामीषदविकसितानां मालतीनां मालास्तासां परिमलो जनमनोहरो गन्धस्तल्लुब्ध-मधुकरनिकरपक्षानिलेन निपीताः शोषिता निदाघजलशीकरा अम्बुकणा यासां तासु; पक्षिण्यः स्त्रियः इमाः। यत्तु—"प्रभाते मैथुनं निद्रा सन्ध्यः प्राणहराणि षट्" इति, तद्विवाहादिविषयम्। ("पाशः पक्षश्च दृस्तश्च कलापार्थाः कचात परे"। "दूषदर्थे दृषोऽप्यथम्"। "विगर्हायां परिमलो गन्धे जनमनोहरे"। "क्लीनोषनिक्षरन्नातः"

र्मतदुग्धमुग्धदशनकिरणच्छटाधवलितभोगावासासु, पुनर्दशन-मृच्छाविधुरसखीजनानुक्षणवीक्ष्यमाणप्रियतमासु, क्षणदागत-वैयात्यवचनशतसारकगृहशुकचाटुव्याहृतिक्षणजनितमन्दाक्षासु, अरहामरलक्ष्मीष्विव न-क्षालङ्कृतपयोधरासु, आसन्नमरणास्विव जीवितेशपराभिमुखीषु, वसन्तवनराजिष्विवोत्फुल्लिकाबहुलासु, प्रियैरालिङ्ग्यमानासु कामिनीषु; आन्दोलितकुसुमकेसरै, केशरेणु-कृषि रचितमधुरमणीनां रमणीनां, विकचकुमुदाकरे मुदाकरे सङ्गभाजि, प्रियविरहितासु रहितासु सुखेन सुमुरमिव वर्षति,

इति चतुर्थ्यमरः) उद्देशदुग्धवल्लिकदशनस्य झषध्वजः स्मित्रितं तेन मुखरासु, अनेनापि खनितं ध्वनितम्। नवनखपदं रात्रिजातं नखक्षतं तत्र संजातः केशस्तस्मिन्नोको निर्मोचनं तेन वेदना तया क्षतः। औत्कारलक्षादिनिर्गताभिर्दुग्धमुग्धदशनकिरण-च्छटाभिर्धवलितो धवलीकृतो भोगावासो वासगृहं याभिस्तासु, दशनकिरणच्छटा-भिस्तद्विहसिता। ("मुग्धो वर्बरसुन्दरौ" इति विश्वः। "भोगावासो वासगृहम्" इति हारावली) प्रियतमाः प्रेयांसः। क्षणं कामोत्सवं ददातीति क्षणदा रात्रिस्तस्यां वैयात्यवचनशतं धृष्टतावचनानि तत्सारकगृहशुकस्य चाटुव्याहृतिभिः क्षणं क्षणमात्रं जनिते मन्दाक्षं लज्जा यासां ताहशीषु। तथा च माघः,—"अथदा भूषणं पुंसः क्षमा खल्वेव योषितः। पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥" इति। ("चट् चाटू प्रिये वाक्ये"। "वैयात्यं धृष्टता मता" इति हारावली। "लज्जाविशेषोन्मथयोः क्षयः"। "मन्दाक्षं व्रीडपा व्रीडा"। "व्याहार उक्ति-र्लपितम्" इति विश्वशम्भुः) अरच्छरदृतुः। न खेदाक्षमालङ्कृताः पयोधरा मेघा यासु; "नखक्षतं नखक्षतानाम्" इतिवदाक्षमभूषणानाक्षमस्येव भूषणत्ववर्णनम्। अथवा—न खेऽक्षमालङ्कृता भूषिताः सप्तर्षयः, अतिनीला इति यावत्, ताहशाः पयोधरा मेघा यासु; अरत्नालि निर्जलत्वादनलङ्कृतत्वमित्यर्थः। पक्षे—नखेन तत्क्षतं लक्ष्यते, तेनालङ्कृताः पयोधराः स्तना यासां ताहशीषु। ("श्रोणिनाभ्नो पयोधरौ" इत्यमरः) जीवितेशो यमश्चास्य पुरं संयमनी। पक्षे—जीवितेशः पतिः, तत्पुरं शरीरम्। ("यक्षश्चे धर्मराजे च जीवितेशो धनाधिपे"। "पुरं पुरि शरीरे च युग्मुखौ कथितः पुरः" इत्यमरश्चापि विश्वः) वनराजिर्वनपरम्परा। उत्फुल्लिकोद्गतकोरकः। ("कलिका कोरकः पुनान्" इत्यमरः) पक्षे—उत्फुल्लिकोत्फुल्लः। ("उत्फुल्लोत्फुल्लिके समे"

पुस्तकालय

समन्तादर्पके दर्पकेसुदहनश्च, दूरप्रसारितकोकप्रियतमाकृते, माकृते वहति; जघनमदनपुरतोरणेन, मदननगरमहानिधि-कनकप्राकारेण, रोमावलीलतालवालेन, जघनचन्द्रमण्डल-परिवेषेण, त्रिभुवनविजयप्रशस्तिरोमावलीकनकपत्रेण, सकल-हृदयवन्दिनिवासपरिखावलयेन, जगल्लोचनविहङ्गममाला-बासकशलाकागुणेनेव मेखलादाम्ना परिहृतजघनस्थलीम्;

दृत्यमरः) यमकेनाह—एतादृशे माकृते वहतीत्यन्वयः। आलोडितकुसुमकेसरे कल्पितपुष्पविन्यासे। रचितेन मधुरा मनसो यासां तादृशीनां रमणीनां केशरेष्वपि केशपदेन तत्स्थानि पुष्पाणि लक्ष्यन्ते तदलोडारके। विकचानि विकसितानि च तानि कुमुदानि च केरवाणि तेषामाकरे, एतादृशे सरसि सदृशे, अत एव मुदाकरे हर्षकारके। [मुदेश्च भागुरिमते टाप्] एतेन विशेषणद्वयेन श्रोतमन्द-सुगन्धित्वं ध्वनितम्। प्रियविरहितासु, अत एव सुखेन रहितासु, समन्तात् परितो दर्पकेसुदहनश्च कामबाणाग्निदर्पके समर्पके, अत एव सुमुरमिव तृणाग्निमिव वर्षति। ("सुमुरस्तु तृणानले" इति वैजयन्ती) लोकप्रियतमा चक्रवाकी। केसरे केशरे इत्यत्र खमेदयमकं, भोजराजेनोदाहृतं च—"आलं वहन्ती सुरतापनीयं आलं तडिन्नासुरतापनीयम्। रथीभरथीभरसन्निकृष्टा सङ्काकलङ्काकलिकाविकूटे॥" इत्यत्र आलं साकमिति खमेदयमकमिति वर्धितम्। इदं खलमव्यपेतयमकम्। केसर इति तालव्यमध्यपाठे लिटमेव यमकप्रभावम्—"अर्थे सत्यर्थभिन्नानां पदानां सा पुनः श्रुतिः। यमकम्। ("केसरो बकुले सिंह-सटायां पृथनध्वजे" इति विश्वः। "किञ्जल्कः केसरोऽस्त्रियाम्"। "रेणुर्धूलिः स्त्रियां धूलिः"। "सुनोतिः प्रसवे हर्षः"। "व्याकोशविकचस्फुटाः"। "प्रफुल्लेते विकसिते"। "सिते कुमुदकेरवे"। "सन्दर्भो दर्पकोऽनङ्गः"। "पद्मो रोग हृदुर्धयोः"। "लोकस्तु भुवनवाक्यः" इत्यष्टलक्ष्यमरः) मेखलादाम्ना काञ्चीदाम्ना परिहृतजघनस्थलीमित्यन्वयः। [जानपदेति ङीप्] लोरवेण वल्लिदण्डेन। प्राकारेण वरणेन। आलवालेनाऽऽवालेन। "आला" इति भाषायाम्। परिवेषेण परिधिना। प्रशस्तिः प्रशस्तिवर्णः, सैव रोमावली, तस्याः जघनपदेन जघनस्थितेन पत्रेण, [प्राकप्रार्थिवादिः] यथा—तालपत्रवत् जघन-पत्रम्। सकलानां हृदयान्येव बन्धूः प्रपञ्चकोषा निवासः आरा तत्परिखावलयेन, "खाई" इति भाषायाम्; सर्वेषां हृदयानि मनेन विवसन्तीति भावः। जगल्लोचनानि

उन्नतपयोधरभारान्तरितमुखचन्द्रदर्शनाप्राप्तिजनितखेदेनेव, गुरु-नितम्बबिम्बपयोधरकुम्भपीड़ाजनितायासेनेव, गृहीतलघूत्क्षेपलम्बानुशयेनेव, विधातुरतिपीड़यतो हस्तपाशजनितायासेनेव, मम मूर्ध्नजयोरियत्प्रमाणयोः स्तनकलशयोः कथं मध्येव निपातो भविष्यतीति चिन्तयेव क्षीणतरतामुपगतेन मध्यभागेनालक्ष्यताम्; अनुरागरत्नमयकनकरुचकाभ्यां, चूचुकमुद्रासनाथाभ्याम्, अतिगुरुपरिणाहतया पतनभयात् कीलिताभ्यामिव चूचुकच्छलेन गिरिसारेण, सकलावयवनिधिरूपेणालक्ष्यपुष्पा-

---

सर्वजननेत्राणि तान्येव विहङ्गमाः; पक्ष्मलक्षणा माला पङ्क्तिलक्षणा खासवप्रलापाः गुंजः "वांपा" इति भाषायाम्; सर्वेषां शोभनार्थकेयेति भावः। ("तोरणोऽस्त्री बहिर्द्वारम्"। "प्राकारो वरणः प्राग्."। "आदानवालनालम्"। "परिवेषस्तु परिधिः"। "प्रघणोपघणौ वन्द्यां द्वारा लाहलनालयोः"। "खेयं तु परिखा"। "खगे विहङ्गविहग-विहङ्गमविहायसः"। "स्त्रीकट्यां मेखला काञ्ची" इत्यमरमालाकरः।) ["नमेः सुपि वाच्यः" इति खश् "विहायसो विह इति वाच्यं खच् च डिद्वा वाच्यः" इति विहायसो विहादेशे "खिखनध्वयस्य" इति सुनागमः। खनु अवदारणे, "अन्येभ्योऽपि दृश्यन्ते" इति डः। परितः खाता परिखा]। उत्प्रेक्षयाऽऽह—मध्यभागेनावलक्ष्यताम्। नालङ्कृतामित्यन्वयः। उन्नतपयोधरभारान्तरितो व्यवहितो यो मुखचन्द्रस्तद्दर्शनाप्राप्त्या जनितखेदेनेव। गुरुमंडान् नितम्बबिम्बो नितम्बनखं पयोधरकुम्भः; स्तनकलशाभ्यां पीड़या जनितायासेनेव। गृहीतो हस्तलक्षणः पृथ्वीविनखलक्षणानुशयो दीर्घत्वेन। विधातुर्ब्रह्मणः। मूर्ध्नमस्तेनोर्ध्वदेशो लक्ष्यते, तयोत्पन्नयोः स्तनकलशयोर्मध्येव निपातो भविष्यतीति चिन्ता क्षीणताहेतुः। ("नखं नाखलग्नं च नख्योऽस्त्री"। "अनुशयो दीर्घत्वेऽनुतापयोः" इति विश्वप्रकाशः) हस्तलक्षणपदेन युवतीपतेः पौरुषे वर्त्तमानस्य ब्रह्मणोऽपि प्रतीयते। मूर्ध्नकलशानुशयेनेति पाठस्तयुक्तत्वादुपेक्षितः। पयोधराभ्यामुद्गतस्तनाभ्यामित्यन्वयः। अनुराग एव रत्नं तन्मयौ कनकरुचकौ मुखिकाकारौ रत्नमयौ मुखिके, यतोऽतयुक्ते एव मुद्रे अनुमयौ नानाकराहिते मुद्रे, ताभ्यां सनाथाभ्यां सहिताभ्याम्। ("रुचकौ मङ्गलद्रव्ये स्त्रीवाभरणभेदयोः" इति विश्वप्रकाशः। "रुचकौ मुखिकाकारौ।") अतिगुरुपरिणाहतया विशालतया पतनभयात्तोयचूचुकच्छलेन गिरिसारेण

भ्यामिव, हृदयतडागकमलाभ्यामिव, हृच्छयकपोलचातुरिका-विभ्रमाभ्यां, रोमावलीलताफलाभ्यां, कन्दर्पदर्पवर्धनवशीकरण-चूर्णपूर्णसमुद्गकाभ्याम्, अशेषजनहृदयपतनमज्जातगौरवाभ्यां, संसारमहातरुफलाभ्यां, यौवनमहापादपप्रसवाभ्यां, हारलता-मृणाललोभनीयचक्रवाकाभ्यां, हारलतारोमावलीसङ्गमव्याज-प्रयागतरुफलाभ्यां, त्रिभुवनविजयपरिश्रमखिन्नस्य मकरकेतो-र्विजनवासगृहाभ्यां, पयोधराभ्यामुद्गाममानाम्; मुखचन्द्र-सन्निहितसन्ध्यारागेण, दन्तमणिरचासिन्दूरमुद्राऽनुकारिणा, निःसरता हृदयानुरागेणेव रञ्जितेन, रागसागरविद्रुमनवपल्लवै-नेवाधरपल्लवेनोपशोभमानाम्; तरुणतरकेतकदलद्राघीयसा,

---

लोहकीलेन लोहितास्थामिव। सकलेष्ववयवेषु निषिक्तात्यात एवाबद्धिरुत्थं लावण्यस्य पुञ्जाभ्यामिव। ("मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥" इति मेदिनी) हृदयतडागकमलाभ्यां कमलकोरकाभ्या-मित्यर्थः। हृच्छयः कामः। कपोलचातुरिका "गालमसुरिका" इति भाषायाम्। रोमावली लता तत्फलाभ्याम्। कन्दर्पः कामस्तस्य दर्पस्तद्वर्धनं तद्वशीकरणचूर्णं तेन पूर्णसमुद्गकाभ्यां मन्मथाभ्याम्; स्मरदर्शनादेव जातविभ्रमो युवानमिति भावः। अशेषाणां सर्वेषां जनानां हृदयस्य मनसः पतनं तेन सञ्जातगौरवाभ्याम्; यद्वा कठिनत्वान्नतामिघातासहत्वेन हृदयस्य पतनं तेन सञ्जातगौरवाभ्याम्, पयोधर-जन्यत्वात्, एतेनैतच्छरीरमादर्वं कुचयोः काठिन्यं च वर्णितम्। संसारमहातरुफलाभ्यां संसारस्वेदमेदेत्यं भावः। यौवनं तारुण्यं तदेव महापादपो वृक्षस्तत्प्रसवाभ्यां पुष्पाभ्याम्। ("तारुण्यं यौवनं समे"। "विटपी पादपस्तरुः" इत्यमरश्चामरः। "पुष्पं प्रसूनं सुमनः प्रसवश्च स्त्रियाम्" इति हेमः) त्रिभुवनविजयपरिश्रान्तस्येत्यनेन यौवनिवासी ध्वनितोऽत एव विजनवासगृहाभ्यां घटनरूपाभ्यामित्यर्थः, तदाकारानु-कारित्वादिति भावः। जनरहितत्ववर्णनात् स्थलरहितत्वं ध्वनितम्। उत्प्रेक्षया प्रौढोक्त्या चाह—अधरपल्लवेनाधरोष्ठकिसलयेनोपशोभमानामिति सम्बन्धः। ("पल्लवी-ऽस्त्री किसलयम्" इत्यमरः) मुखचन्द्रसन्निहितसन्ध्यारागेण मुखचन्द्रसन्निहितत्वात्सन्ध्यारागस्तात्कालिक-लौहित्यविशेषः। दन्तमणीनां रचा कान्तिविशेषसंरचयं, तदर्थं वा सिन्दूरमुद्रा तदनुकारिणा। निःसरता हृदयानुरागेणेव रञ्जितेनेव। लौहीं शैलवदनुरागे लौहित्य-

पक्ष्मलचटुलालसेन, हृदयवासगृहावस्थितहृच्छ्रवणविलासिनो गवाक्षशङ्कामुपजनयता, सरागेणापि निर्वाणं कुर्वता, गतिप्रसर-रोधकश्रवणक्षतकोपेनेवोपान्तलोहितेन, धवलयतेव जगदशेषम्, उत्फुल्लकमलकाननसनाथमिव गगनं कुर्वता, दुग्धाम्भोधि-सहस्राणीवोद्गमता, कुन्दनीलोत्पलमालालक्ष्मीमिवोपहसता, नयनयुगलेन भूषिताम्; दशनरत्नतुलादण्डेन, नयनसमुद्रसेतु-बन्धेन, यौवनमन्मथमत्तवारणयोर्वरण्डकेनेव नासावंशेन परि-

---

वर्णनं कविसम्प्रदायः; तथा च माघः,—"क्रीडितः कथमपि त्वयाऽलमर्थः प्रियं प्रति चिराय रमस्व। बाढमीमदविशङ्कमङ्गविश्वसोऽभवदसाविव रागः॥" इति। राग-शब्दमरोऽनुरागसमुद्भूतलक्ष्मण्यिंबिद्रुमस्य प्रवालतरोर्नवपल्लवेनेव। अत्र प्रौढ़ोक्तिरपि,—"प्रौढ़ोक्तिरुत्कर्षवती तद्धेतुत्वप्रकल्पनम्"। ("विद्रुमः पुंसि प्रवालः पुंनपुंसकम्" इत्यमरः) नयनयुगलेन भूषितामित्यन्वयः। तरुणतरकेतकदलदाघौपम्या तद्दीर्घेण। [ईषदूने "त्रिषष्टिचतुष्पञ्चाशत्-" इत्यादिना दीर्घशब्दस्य ह्राद्यादेशः। "दलं पर्णं छदः पुमान्" इत्यमरः] पक्ष्मलं पक्ष्मयुक्तं चटुलं चञ्चलमलसं मन्दं ताडङ्केन। हृदयमेव वासगृहं तत्रावस्थितस्य हृच्छ्रवणविलासिनः कामविलासिनो गवाक्षशङ्कां वातायन-शङ्कामुपजनयता। ("वातायनं गवाक्षः" इत्यमरः) सरागेण सानुरागेण, निर्वाणं लोलं कुर्वतेति विरोधः। ("मुक्तः कैवल्यनिर्वाणम्" इत्यमरः) परिहारस्तु—निर्वाणं निवृत्तिः, एतद्दर्शनाज्ञानानां पदार्थानन्तरेभ्यश्चेतसो निवृत्तिरिति भावः। [निर्वाणोऽवात इति निपातः] गतिप्रसररोधकश्रवणक्षतकोपेनेव अन्तस्य समीप-भूतार्थं प्रान्तदेशस्थेन लोहितेन रक्तेन। [उपान्तमिति "विभक्ति" इत्यादिना सामीप्येऽव्ययीभावः। "रोहितो लोहितो रक्तः" इत्यमरः] दृष्टिसञ्चारजन्यं विशेषं दर्शयन्नाह—धवलयता धवलं कुर्वता जगदशेषम्। उत्फुल्लानि व्याकोशानि कमलानि तेषां काननं तेन सनाथं गगनमन्तरिक्षं कुर्वता। ("प्रफुल्लोत्फुल्लमम्लान-व्याकोश-विकचस्फुटाः"। "नभोऽन्तरिक्षं गगनम्" इत्यमरश्चाव्यमरः) दुग्धाम्भोधिसहस्राणी-वोद्गमतोद्गिरता। [टु वम उद्गिरणे] कुन्दनीलोत्पलमालालक्ष्मीमिवोपहसता, तद्विकाशोज्ज्वलत्वादिति भावः। नासावंशेन परिष्कृतां भूषितामित्यन्वयः। ("भूषितश्च परिष्कृतः" इत्यमरः) दशनरत्नानि दन्तरत्नानि तेषां तुलादण्डेन। नयनसमुद्रस्य सेतुबन्धेन। ("सेतुरास्त्री स्त्रियां पुमान्" इत्यमरः) यौवनमन्मथावेव मत्तवारणौ

ष्कृताम्; विलोचनेन्दीवरभ्रमरपङ्क्तिभ्यां, मुखमदनमन्दिर-तोरणाभ्यां, रागसागरवेलाभ्यां, यौवननर्त्तकलासिकाभ्यां, भ्रूलताभ्यां विराजमानाम्; घनसमयाकाशलक्ष्मीमिवोल्लस-च्चारुपयोधराम्; जयशब्दघोषणापन्नजनमूर्त्तिमिवोल्लसत्तुला-कोटिप्रतिष्ठिताम्; सुयोधनधृतिमिव कर्णविश्रान्तलोचनाम्; वामनलीलामिव दर्शितबलिविभङ्गाम्; वृश्चिकराशिरविस्थिति-मिवातिक्रान्तकन्यातुलाम्, उषामिवानिरुद्धदर्शनसुखां, शचीमिव

मत्तगजौ तयोर्मध्यकक्षेन, "भित्तेरुभयपार्श्वे द्वौ स्थापयित्वा मतङ्गजौ। योधयतीति प्रसिद्धं भित्तिः सा तु वरण्डकम्॥" "अगड" इति भाषायां प्रसिद्धम्। ("कुञ्जरो वारणः करी" इत्यमरः) रूपकातिशयोक्त्या चाह—भ्रूलताभ्यां विराजमानां शोभमानामित्यन्वयः। विलोचनेन्दीवरस्य नेत्रनीलोत्पलस्य भ्रमरपङ्क्तिभ्याम्। ("इन्दीवरं च नीलेऽस्त्रि" इति कुसुदमकरन्देऽमरः) मुखमदनमन्दिरस्य तोरणाभ्यां बहिर्द्वाराभ्याम्। ("तोरणोऽस्त्री बहिर्द्वारम्" इत्यमरः) रागसागरोऽनुरागसमुद्र-स्तस्य वेलाभ्याम्। ("अभ्यासस्तु विज्ञतौ वेला कालमर्य्यादयोरपि" इत्यमरः) यौवननर्त्तक-लासिकाभ्याम्। ("नर्त्तकीलासिके समे" इत्यमरः) श्लेषेणाह—घनसमयो वर्षा-कालस्तस्य यदाकाशं तस्य लक्ष्मीः शोभा तामिवोल्लसच्चारुपयोधराम्। ("श्रोणिताम्बौ पयोधरौ" इत्यमरः) जयशब्दस्य घोषणायामापन्ना प्राप्ता या जनमूर्त्तिस्तामिवोल्लसत्तुला-कोटौ प्रस्फुरन्त्यां तुलायां प्रतिष्ठितां स्थिताम्; परीक्षासमये मुद्गोभवन् सर्वेभ्यः श्रेयस्त्वयते। ("उत्क्षेपणं तु घोषणा" इत्यमरः) पक्षे—उल्लसत्तुलाकोटिना शोभमान-पादाङ्कदेन प्रतिष्ठितां प्राप्तप्रतिष्ठाम्। ["तदस्य सञ्जातम्" इति तारकादित्वादितच्। "पादाङ्कदं तुलाकोटिः" इत्यमरः) सुयोधनो दुर्योधनस्तस्य धृतिर्धैर्य्यमिव कर्णविश्रान्त-लोचना तां, यावत् कर्णं पश्यति तावत् तस्य धृतिरिति भावः। पक्षे—कर्णयोः श्रोत्रयोर्विश्रान्ते लोचने यस्यास्ताम्। ("कर्णश्रोत्रयोः श्रोत्रम्" इत्यमरः) वामनलीला-मिव वामनावतारविष्णुलीलामिव दर्शितो बलेस्तन्नाम्नो दैत्यस्य विभङ्गो यया तां। पक्षे—दर्शितो बलीनां त्रिवलीनां विभङ्गो यस्यास्ताम्। ("बलिः प्राग्ज्योतिषे त्रिवलौ" इत्यमरः) वृश्चिकराशौ रविस्थितिमिवातिक्रान्ते कन्यातुले तन्नामकराशी यया तां, तयोस्त्यूनत्वादित्यर्थः। पक्षे—अतिक्रान्ता कन्यानां तुला तुलना यया तां। उषां बाणासुरस्य कन्यां तामिवानिरुद्धस्य दर्शनेन सुखं यस्याः ताम्।

नन्दनेन्दुरुचिं, पशुपतिताण्डवलीलामिवोल्लसच्चक्षुःश्रवसम्, अटवीमिवोत्तुङ्गश्यामलकुचां, वानरसेनामिव सुग्रीवाङ्गदोपशोभिताम्; भास्वताऽलङ्कारेण, चन्द्रेण वदनमण्डलेन, लोहितेनाधरपल्लवेन, सौम्येन दर्शनेन, गुरुणा नितम्बविम्बेन, विकचेन नेत्रकमलेन, अनेश्वरेण पादेन, तमसा केशपाशेन ग्रहमयी-

---

पक्षे—अनिवृत्तनिवारितं दर्शनसुखं यस्यास्ताम्। अधीनिवेन्द्वाधीनिव नन्दनेन्दुवनस्थेन्दू रुचिर्यस्यास्ताम्। ("पुंसीनजा अधीन्द्वाधी"। "नन्दनं वनम्" इतीन्द्रप्रस्थे इवोरप्यमरः) पक्षे—नन्दयतीति नन्दना, [नन्दादित्वात् कर्तरि ल्युः। अजादित्वाट्टाप्] तादृशीचासौ रुचिर्नेत्रकान्तिर्यस्यास्ताम्। ("दृक्चक्षं चक्षुरक्षिणी" इत्यमरः) पशुपतेः शिवस्य ताण्डवलीलामिवोल्लसच्चक्षुःश्रवसमुल्लसत्कर्णाम्। ("दृग्रः पशुपतिः शिवः"। "ताण्डवं नटनं नाट्यम्"। "चक्षुःश्रवाः श्वाकोदरः फणी" इति त्रिष्वमरः) पक्षे—उल्लसच्चक्षुःश्रवसं शोभमाननेत्रकर्णाम्। अटवीमिवारण्यमिवोत्तुङ्गः उच्चः श्यामो लकुचो यस्यां ताम्। ("अटव्यरण्यं विपिनम्"। "लकुचो लिकुचो डहुः" इति इवोरप्यमरः) "वडहर" इति भाषायाम्। पक्षे—उत्तुङ्गौ श्यामलौ कुचौ स्तनौ यस्यास्ताम्। दग्धः पट इतिवदवयवधर्मस्य समुदाये समारोपात् कुचयोः श्यामलतावर्णनम्। ("कालश्यामलमेचकाः" इत्यमरः) वानरसेनामिव सुग्रीवाङ्गदेनोपशोभिताम्। पक्षे—शोभना ग्रीवा यस्याः सा चासावङ्गदेन केयूरेणोपशोभिता च ताम्। ("केयूरमङ्गदं तुल्ये" इत्यमरः) रत्नावलीशैवाभ्यामाह—ग्रहमयीमिवेत्यन्वयः। भास्वता शोभमानेनालङ्कारेण भूषणेन। पक्षे—भास्वान् सूर्यः। ("भास्वद्विवस्वत्सप्तार्च—" इत्यमरः) चन्द्रेणाह्लादकेन। [चदि आह्लादे। "ऋायितश्चि—" इति रक्] वदनमण्डलेन। पक्षे—चन्द्रेण चन्द्रमसा। ("हिमांशुश्चन्द्रमाश्चन्द्रः" इत्यमरः) लोहितेन रक्तेनाधरपल्लवेन। ("रोहितो लोहितो रक्तः" इत्यमरः) पक्षे—लोहितेन भौमेन। ("कुजो भौमो लोहिताङ्गो मङ्गलोसुतः" इत्यमरः) सौम्येन मनोहरेण दर्शनेन विलोचनेन। पक्षे—सौम्येन बुधेन। ("रोहिणेयो बुधः सौम्यः" इत्यमरः) गुरुणा महता नितम्बविम्बेन। पक्षे—गुरुणा बृहस्पतिना। ("बृहस्पतिः सुराचार्यो गीष्पतिर्धिषणो गुरुः" इत्यमरः) विकचेन विकसितेन विलोचनोत्पलेन नेत्रोत्पलेन। पक्षे—विगतः अञ्चो बृहस्पतिपुत्रो यस्मादिति अगः। ("अगे कैतौ च विकच ऊतपुष्पे च निगद्यते" इति विश्वः)। अनैर्ऋतं चरति गच्छति तादृशेन पादेन, तमसा

मिव ; संसारभित्तिचित्रलेखामिव, त्रैलोक्यसौन्दर्य्यसङ्केतभूमि-मिव, रसायनसिद्धिमिव यौवनमहायोगिनः, सङ्कल्पभित्तिमिव शृङ्गारस्य, निधानमिव कौतुकस्य, त्रिभुवनविजयपताकामिव मकरध्वजस्य, आविर्भूतिमिव मनसः, अभिभूतिमिव मदनस्य, स्तम्भनचूर्णमिवेन्द्रियाणां, मोहनशक्तिमिव मन्मथस्य, विहार-स्थलीमिव सौन्दर्य्यस्य, एकायतनशालामिव सौभाग्यस्य, उत्पत्तिस्थानमिव लावण्यस्य, आकर्षणसिद्धिमिव मनसः,

---

गजगामितयेति भावः। पक्षे—शनैश्चरः सौरिः। ("समौ सौरिशनैश्चरौ" इत्यमरः) शम इव तमसाऽङ्गेन केशपाशेन मार्दवदैर्घ्यश्यामतादिगुणेन, अन्यपदार्थे चतुर्थंतिप्रति-षेधकत्वादिति भावः। ("कचः केशः शिरोरुहः"। "पाशः पक्षस्य हस्तस्य कलापार्थाः कचात् परे" इत्यमरः) पक्षे—तमसा राहुणा। ("तमस्तु राहुः स्वर्भानुः" इत्यमरः। सर्वत्रोपलक्षणं तृतीया) राहुकेत्वोरैक्यात् "शुक्रे केतौ च विकचः" इति विश्वप्रकाशात् विकचशब्देन वा केतोरपि संग्रहः। "क्षमिकं प्रज्ञतार्थानां न्यासं रत्नावलीं विदुः"। संसारभित्तिचित्रलेखामिव, चित्रलेखेवेयं श्रोभिकेति भावः। यौवनमहायोगिनः रसायनसिद्धिमिव जराव्याधिनित् सद्यश्चमत्कृतिजनित् स्वर्णरौप्यजनकौ यौवधि-विशेषौ रसायनम्। शृङ्गारस्य सङ्कल्पभित्तिमिव। ("सङ्कल्पः कर्म मानसम्" इत्यमरः) कौतुकस्य कौतूहलस्य निधीयन्तेऽस्मिन् निधानमाश्रयः। ("कौतुकं कौतूहलं च" इत्यमरः) मकरध्वजस्य कामस्य त्रिभुवनविजयपताकामिव, इतुमत्पताकादि-वदिति भावः। ("पुष्पधन्वा रतिपतिर्मकरध्वजः" इत्यमरः) मनस आविर्भूतिमिव। मदनस्याभिभूतिमिव अभिभवकारणमिवेत्यर्थः। इन्द्रियाणां श्रोत्रियचक्षुरिन्द्रियाणां स्तम्भनचूर्णमिव, एतद्दर्शनादेव स्तम्भनरूपसात्त्विकभावाविर्भाव इति भावः। मन्मथस्य मोहनशक्तिमिव, मदनो यया जगन्मोहयति सैवेयं मूर्त्तिमतीति भावः। सौन्दर्य्यस्य विहारस्थलीमिव विहारः क्रीडा तदर्थं स्थली पुरुषैषासंस्कृता भूमिस्तामिव; एतेनेयमलङ्कारादिपुरुषसंस्कारहीनाऽपि रम्येवेति स्वाभाविकसौन्दर्य्यातिशयो ध्वनितः। तथा च कालिदासः,—"सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति। इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥" इति। सौभाग्यस्य सुभगतायाः एका प्रधाना आयतनशाला चैत्यशाला तामिव। ("एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा"। "चैत्यमायतनं तुल्ये",

चक्षुर्बन्धमिव मन्मथेन्द्रजालिनः, त्रिभुवनविलोभनसृष्टिमिव प्रजापतेः, कन्यकामष्टादशवर्षदेशीयामपश्यत् स्वप्ने।

अथ तां प्रीतिविस्फारितेन चक्षुषा पिबन्निव जनितेर्ष्ययेव निद्रया चिरसेवितया मुमुचे। विबुद्धस्तु विषसरसीव दुर्जनवचसीव निमग्नमात्मानं धारयितुं न शशाक।

तथा हि, क्षणमाकाशतलमालिङ्गन्, प्रसारितबाहुयुगलः "एह्येहि प्रियतमे! क्व गच्छसि?" इति दिक्षु लिखितामिवोत्कीर्णामिव चक्षुषि निखातामिव हृदये प्रियतमामाजुहाव। ततस्तत्रैव शय्यातले निमीलितनयनो निषिद्धाशेषपरिजनो दत्तकपाटः परिच्छतताम्बूलाहारादिसकलोपभोगस्तूष्णिमनयत्। तथैव निशामपि स्वप्नसमागमेच्छाभिरनैषीत्।

दृष्टसरः) लावण्यलक्ष्मीरित्यादिनेव। ("मुक्ताफलेषु छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥" इति मेदिनी) मनसः आकर्षकत्वमिव स्त्रीणामाकर्षकमेरवादिभिरिवेत्यर्थः। मन्मथेन्द्रजालिन इन्द्रजालविद्यानिपुणस्य चक्षुर्बन्धमिव। प्रजापतेर्ब्रह्मणस्त्रिभुवनविलोभनसृष्टिमिव।

अथ स्वप्नदर्शनोत्तरं प्रीतिविस्फारितेन विकसितेन चक्षुषा तां पिबन्निव, अत एव चिरसेवितया निद्रया जनितेर्ष्ययेव; मयि विद्यमानायां मन्मथस्यात् पार्श्वात् अन्यासक्तिरस्येति ईर्ष्यात्वम्; "मतां मानेऽस्मिन् मरणमथवा दूरगमनम्" इति। मुमुचे मुक्तः; स इति शेषः। विबुद्धस्तु जागरितस्तु विषसरसीव दुर्जनवचसीव निमग्नमात्मानं धारयितुं सावधानतया व्यवहारे प्रवर्त्तयितुं न शशाक।

चक्षुःप्रीतिरित्यादिदशावस्थासु उन्मादावस्थां वर्णयति—क्षणं तावत्कालमाकाशतलमालिङ्गन्, आकाशतलालिङ्गनेन मोहवशात् परितो दृश्यमानायाः प्रियतमाया आलिङ्गनं लक्ष्यते, अत एवाह "क्व गच्छसि? प्रियतमे!" इत्याद्युक्तम्। प्रसारितबाहुः एह्येहीति यत्नेन द्वित्वम्; प्रियतमे! क्व गच्छसि? इति दिक्षु लिखितामिव। चक्षुष्युत्कीर्णामिव विचित्रामिव। [कृ विक्षेपे] हृदये निखातामिव प्रियतमामाजुहाव। ततस्तत्रैव शय्यातले निमीलितनयनो निषिद्धाशेषपरिजनो निवारितसकलसेवकवर्गो दत्तकपाटः परिच्छतताम्बूलादिसकलोपभोगः, अत्यत्वादिति भावः। तथा च भारविः,—"आतपे धृतिमता सह बध्वा यामिनीविरहिणा विदधेन

अथ तस्य प्रियसखो मकरन्दो नाम कथमपि लब्धप्रवेशः कन्दर्पसायकप्रहारपरवशं कन्दर्पकेतुमुवाच,—"सखे! किमिदमसाम्प्रतमसाधुजनोचितमध्वानमाश्रितोऽसि? तवैतच्चरितमालोक्य वितर्कदोलासु निवसन्ति सन्तः, खलाः पुनस्तदनिष्टमनुचितमेवावधारयन्ति, अनिष्टोद्भावनरसोत्सवं हि खलहृदयं, को नामास्य तत्त्वनिरूपणे समर्थः? तथा हि, भीमोऽपि न वकद्वेषी, आत्रेयाग्नोऽपि मातरिश्वा, अतिकटूरपि मङ्गारसः, सर्षपस्नेह इव करयुगललालितोऽपि शिरसा धृतोऽपि न कटुत्वं जहाति, तालफलरस इवापातमधुरः परिणामविरसस्तिक्तश्च,

---

सेद्धिरे न किरणा हिमरश्मेर्दुःखिते मनसि सर्वमसह्यम्॥" इति। तद्विषमनलवत्। ("कपाटमरटं तुल्ये" इत्यमरः) तथैव पूर्वोक्तप्रकारेणैव तस्याः स्वप्न समागमस्नेहाभिनिवेशानन्यनयत्।

अथ तादृशवृत्तान्तं तस्य कन्दर्पकेतोः प्रियसखो मकरन्दो नाम जवनिकापाटविघटनादिसदाक्लेशान्तःप्रवेशः कन्दर्पसायकपरवशान्तःकरणं कन्दर्पकेतुमुवाच। [प्रियसख इत्यत्र "राजाहःसखिभ्यष्टच्" इति समासान्तष्टच्] सखे! किमिदमसाम्प्रतमनुचितमसाधुजनोचितमध्वानं व्यवहारमाश्रितोऽसि? अनन्तरप्रत्यासत्तयोरतिभूमिरेतच्चरितमालोक्य वितर्कदोलासु संशयदोलासु निवसन्ति, संशयिता भवन्तीति भावः। काव्यलिङ्गेनाह—खलाः पुनस्तदनिर्वाच्यमनिष्टमेवावधारयन्ति निश्चिन्वन्ति। अनिष्टोद्भावनेऽनभिमतप्रत्याय्ये यो रसोऽनुरागस्तदुत्तरं प्रधानं यस्य तादृक्। अस्य खलस्य। भीमोऽपि युधिष्ठिरानुजोऽपि वकद्वेषी वकद्वेष्टा नेति विरोधः। भीमो भयानकोऽपि नवरसान् स्तुत्यान् द्वेष्टि तादृक्, अपिशब्दे इत्यविरोधः। [भू सत्तायां] आत्रेयाग्नी वह्निरपि मातरिश्वा वायुरिति विरोधः। ("सवनः स्यन्दनो वायुर्मातरिश्वा सदागतिः" इत्यमरः) आत्रेयमत्तीति तादृशः यमाश्रयति तस्मैव भक्षक इत्यर्थः। ("आत्रेयाग्नो कुतवहे भवेदात्रेयभक्षके" इति विश्वप्रकाशः) मातरि जनन्यां, तत्सदृशे पोषके, श्वा कुक्कुरः, अशुचिताचरत्वात् तत्सदृश इति भावः इत्यविरोधः। अङ्गारसः, अतिकटोर्मङ्गारस्य विरोधः। अतिकटुरतिकटुप्रकृतिर्मङ्गारोऽङ्गारसश्चेति मङ्गारसः। सर्षपस्नेह इव करयुगललालितोऽपि शिरसा धृतोऽपि पादप्रक्षालादिना। पक्षे—अधिकरयुग्म करयुगेन

पादपराग इवावधूतो मूर्द्धानं कषाययति, विषतरुप्रसव इव यथा यथाऽनुभूयते तथा तथा मोहमेव दृढयति, न वारिविरक्तो ऽस्य जायते नीचदेशस्थेव, निदाघदिवस इव बहुमत्सरो वहति तापं सुमनसाम्, अन्धकार इव दोषानुबन्धचतुरो विश्वकर्मावलोपनोद्यतश्च, विरूपाक्षोऽपि चक्रधरः, अक्षाश्च इवोर्वीश्वरा

वर्षणम्; शिरसि धृतोऽपि कटुत्वं न जहाति। काटवमिति पाठस्तस्यश्चारत्वात् दुपेक्ष्यः। [illegible] इवापातमधुरो भोजनप्रारम्भ एव मधुरः परिणामविरसश्च। पक्षे—पातो दोषसमभिव्याप्तापातं मधुरः हिताभासाचरत्वेन मधुरः, परिणामे दोषज्ञानोत्तरं विरसं उदासीनः, तिक्तः प्रतिजनं मर्मप्रकाशकः। [illegible] पराग इव चरणरेणुरिवावधूतः क्षिप्तश्चिरक्षतश्च, मूर्द्धानं शिरः कषाययति धूसरयति पीडयति च। ("पराग: कोसुमे रेणौ खानौषादौ रजस्यपि"। "पादः पदङ्घ्रिचरणोऽस्त्रियाम्" । "मूर्द्धा ना मस्तकोऽस्त्रियाम्" इति विश्वप्रकाशः) विषतरुप्रसव इव यथा यथा अनुभूयते सेव्यते, तथा तथा मोहमेव मूर्च्छां वैचित्त्यं वा दृढयति स्थिरीकरोति। नीचदेशस्थेव निम्नभूभागस्थेव वारिविरक्तो जलविरक्तो न जायते। पक्षे—अव्ययानामनेकार्थत्वाद्-अत्र एवार्थे; न वा नैवास्य खलस्यारिविरक्तः शत्रुविरक्तो जायते, सर्वनाशोद्यतत्वादिति भावः। ("रिपौ वैरिसपत्नारिविद्वदेषणदुर्हृदः" इत्यमरः) निदाघदिवस इव ग्रीष्मसुदिवस इव बहुमत्सरो बहुमक्षिकः सुमनसां पुष्पाणां तापं वहति। ("मक्षिका मत्सरा ग्रेया मशकाश्च ते मताः" इत्युत्तरतन्त्रम्। "मत्सरः कृपणे क्षीणे मक्षिकासु च मत्सरः" इति मेदिनिः। "स्त्रियः सुमनसः पुष्पम्"। "निदाघ उष्णोपगम उष्ण ऋक्षागमस्तपः" इति हलायुधोऽमरः) पक्षे—बहुमत्सरो बहुमात्सर्यवान् क्रोधी वा, सुमनसां सज्जनानामाचाराणाम्। ("मत्सरोऽन्यगुणद्वेषः" इत्यमरः। "क्वचित् क्रोधोऽपि मत्सरः" इति हलायुधः) अन्धकार इव दोषा रात्रिस्तस्या अनुबन्धे चतुरः, विश्वकर्मा आदित्यस्यालंकारशोभनमलंकरणं तनोद्यतः। ("विश्वकर्मा देवशिल्पी विश्वकर्मा दिवाकरः" इत्युत्तरतन्त्रम्) पक्षे—दोषाणामनुबन्धे आरोपे चतुरः, विश्वेषां कर्म क्रिया तस्य अवलोपनं छेदनं तनोद्यतः। विरूपाक्षः शिवः चक्रधरो विष्णुरिति विशेषः। विरूपाक्षो विषमव्यवहारः, चक्रधरो दण्डभेदधरः इति परिहारः। ("अक्षो ज्ञानाक्षयकट-व्यवहारे च पाशके" इति मेदिनीकरः। "ज्ञानावने वसुदृशि च दण्डभेदरथाङ्गयोः। [illegible]

नदेशजप्रशंसी च, सरस्येव विभिन्नस्यापि सतः स्नेहं दर्शयतोऽपि तक्राट इव हृदयं विलोड़यति, यत्तवलिरिवात्मघोषमुखरो मण्डलभ्रमणकथकश्च, मत्तमातङ्ग इव स्ववशायाऽऽलोलमुखोऽधरीकृतदानश्च, दुषभ इव सुरभियानविकलः, कामीव गोवल्लवलनविधुरो वामाध्वानुरक्तश्च, अजीर्णविकार इव कलेवरे वचसि मन्दिमानमावहति, वञ्चक इव कटपले रक्तो विभावरीरक्तश्च,

च शीतार्या चक्रं चापि विदुर्बुधाः" ॥ इति रन्तिदेवः) अजाश्च एवेलाश्च इवीडेः अथवा स्वडेः अवः संज्ञकः। ("इव स्वडेः अवाः" इतीन्द्रप्रकरणेऽमरः) नदेशात् समुद्राज्जातः तादृशशाली प्रशंसावांस्तथाभूतः। पक्षे—स्वडेः अवा वचिर परकीयकार्यश्रवणे, देशजान् प्रशंसितुं शीलमस्य तादृशो न भवति तथाविधः। सरस्येव दध्यवभागस्येव विभिन्नस्यापि सङ्गतस्यापि सतः साधोर्विद्यमानस्य च स्नेहमनुरागं चैक्यं च दर्शयतोऽपि तक्राट इव मन्थान इव हृदयं विलोड़यति। ("सरो दध्यवभागः स्यात्" इति रत्नकोषः। "भिन्नो दारितसङ्गतौ" इत्यमरः। "स्नेहोऽनुरागचैक्यं तैलेऽपि च निगद्यते" इति धरणिः। "वैशाखो दधिचारः स्यात् तक्राटकरघर्षणौ" इति हारावली) यत्तवलिरिवात्मघोषेण काकेन मुखरः काकशब्देन सशब्दः, मण्डलभ्रमणं कुक्कुरभ्रमणं तत्कथकस्तत्सूचकः। ("श्वाकुरात्मघोषपरभृद्वलिभुग्वायसा अपि" इत्यमरः। "कौलेयकः सारमेयौ मण्डलः श्वा गतव्रपः" इति व्याडिः) पक्षे—आत्मघोषेणात्मस्तुत्या मुखरः, मण्डले देशादौ भ्रमणं तत्कथकः। मत्तमातङ्ग इव स्ववशायां निजकरिण्यामालोलं मुखं यस्य सः, अधरीकृतदानः मदजलस्यातिवर्षणादधरीकरणम्। पक्षे—मुष्ठ अवशमवाप्यविलादालोलं मुखं यस्य सः, अधरीकृतं दानं वितरणं येन तादृशः। दुषभ इव सुरभेर्गोर्यानेन गमनेन विकलो विह्वलः तदनुधावनेन वा विह्वलः। पक्षे—सुरभिया देवभयेन न विकलः। ("भीतिर्भीः साध्वसं भयम्" इत्यमरः) कामीव गोवल्लवलनं नामवल्लवलनं तेन विधुरः, वामानां स्त्रीणामध्वा मार्गस्तवानुरक्तः। ("गोवं तु नाम्नि च" "प्रतीपदर्शिनी वामा वनिता महिला तथा" इत्युभयत्राप्यमरः) पक्षे—गोवल्लवलनं वंशजवल्लवलनं, वामाध्वा विपरीताचरणम्। ("वामो वस्तुप्रतीपौ च" इत्यमरः) अजीर्णविकार इव कलेवरे शरीरे वचसि वचने मन्दिमानमावहति। ("वपः कलेवरम्। गात्रं वपुः संहननम्" इत्यमरः) पक्षे—कलेऽव्यक्तमधुरे वरे श्रेष्ठे वचसि वचने मन्दि-

परेत इव बन्धुतापदर्शनः, परशुरिव भद्रश्रियमपि खण्डयति, कुद्दाल इव दलितगोत्रः क्षमाभाजः प्राणिनो निकृन्तति, रतकौल इव जघन्यकर्मलग्नो क्लेपयति साधून्, दुष्टशूर्पश्रुतिरिव ज्ञाननरुचिरनुगतमपि यवसं तत्तं नानुमोदते।

नामभावहति, वाचाट इति भावः। बकुल इव मृगाक्ष इव श्येन वा जटपक्षी मतमांसे रक्तः, विभावर्यां रात्रौ रक्तस्य। ("मृगाक्षवञ्चकश्येनौ—"। "विभावरीतमस्विन्यौ रजनी" इत्यमरयाप्यमरः। "वञ्चतारक्तचोरेषु बकुलः परिकीर्त्तितः" इति शाश्वतः। "जटः समयबन्धेऽपि तृणेऽपि मृतकेऽपि च" इति विश्वः। "पलः प्रतारणे काले प्रख्यातांसे पलं मतम्" इति धरणिः) पक्षे—जटे समयबन्धे पलः प्रतारणं तस्मिन् रक्तः अपचपूर्वकप्रतारक इति भावः। विभौ स्वामिन्यरिः अरः रक्तः धनलोभादिना। [अरीरक्त इत्यत्र "रो रि" इति लोपे "ढ्रलोपः" इति दीर्घः] ("समयाः शपथाचार-कालसिद्धान्तसंविदः" इत्यमरः) पक्षे बन्धुरिव बन्धुतापा बन्धुसमूहस्यापगतं दर्शनं यस्य। ("ज्ञातेयं बन्धुता तेषां ज्ञातावबन्धुधीः" इत्यमरः। "यावजनबन्धुभ्यस्तल्" इति तल्-प्रत्ययः) पक्षे—बन्धून् तापयति तादृशं दर्शनं यस्य सः। परशुरिव भद्रश्रियं चन्दनं खण्डयति। ("भद्रश्रीश्चन्दनोऽस्त्रियाम्" इत्यमरः) पक्षे—भद्रं कल्याणं, श्रियं लक्ष्मीम। ("श्रियं भद्रं कल्याणं मङ्गलं शुभम्" इत्यमरः) यद्वा—भद्रश्रियं साधुसम्पदम्। ("सभीके चन्दनेऽपि स्याद्भद्रश्रीः साधुसम्पदि" इति धरणिः) कुद्दाल इव दलिता गोत्रा पृथ्वी येन तादृशः, क्षमां पृथ्वीं भजन्ति तादृशान् प्राणिनो वृक्षादीन् निकृन्तति छिनत्ति। वृक्षादीनां प्राणित्वं "अचेरच्छिन्नबीजस्य न" इति वार्त्तिके आकरे स्पष्टम्। कुद्दालः "कुटाकौ" इति भाषायाम्। पक्षे—दलितगोत्रो नाशितवंशजः, क्षमाभाजः क्षान्तियुतान् प्राणिनो मनुष्यान्। ("क्षितिक्षान्त्योः क्षमा" इत्यमरः) रतकौल इव कुकुर इव जघन्यकर्मलग्नो मार्ग एव सुरतादौ प्रवृत्तः क्लेपयति साधून्। ("कुकुरो रावितामरः। रसनालिट रतपराः कौलमार्गिणवान्धवाः" इति हेमचन्द्रः। रतपरा रतशब्दात् पराः कौलादयः, तथा च रतकौलादयश्चत्वारः शब्दा इति कोषार्थः) पक्षे—जघन्यकर्म नीचकर्म। दुष्टशूर्पश्रुतिरिव दुष्टगज इव कानने वने रुचिरं तत्तं तादृशः, अनुगतं तत्तं विस्तृतं यवसं तृणं नानुमोदते। ("विषाग्निशूर्पश्रुतिकल्मिलेभजा" इति धारावली। "यवसं तृणमर्जुनम्" इत्यमरः) पक्षे—ज्ञा दूषत् ज्ञाननरुचिरबन्धनक्षान्तियुक्तं लोकानां

अबीजादेव जायन्ते, अकाण्डादेव प्ररोहन्ति खलव्यसनाङ्कुरा दुरुच्छेदा भवन्ति। असतां हि हृदि प्रविष्टो दोषलवः करालायते, सतां तु हृदि न विश्लथेव, यदि कदाचिद्विश्लथति पारद इव क्षणमात्रमपि नावतिष्ठते। साधवो मृगा इव विनोदविन्दोः श्रवणवशगाः, सुखं जनाः शरत्समया इव भवादृशाः, मित्रस्य हृदयं हरन्ति। न च सचेतना विसदृशमुपदिशन्ति, अचेतनानामपि मेत्रो समुचितपक्षे निश्चिता।

विस्तारादीनवाश्लिरिति भावः। ["दूषदर्शे च" इति वादेशः] अनुगतमपि यथार्थं दृष्टं ततं वीक्षादिवाद्यं च नानुमोदते। ("यवसे दृषघासयोः"। "ततं वीक्षाद्यवाद्येऽपि विस्तारेऽपि ततं मतम्" इत्युभयत्रापि विश्वः)।

खलव्यसनाङ्कुरा अबीजादेवाकारणादेव जायन्ते। अकाण्डादेवाप्रस्तावादेव प्ररोहन्ति, अत एव 'दुरुच्छेदा भवन्ति, यो हि बीजाज्जायते काण्डात् स्कन्धात् प्ररोहति स सूच्छेदो भवति मूलत्वादिति भावः। ("हेतुर्नो कारणं बीजम्"। "अस्त्री प्रकाण्डः स्कन्धः स्यात्" इत्युभयत्राप्यमरः) असतां हृदि प्रविष्टो दोषलवः करालायते भयावहो भवति, सतां हृदि तु न विश्लथेव, दोषलव इति शेषः पूर्वोत्तरयोरपि। यदि कदाचिद्विश्लथति, पारद इव क्षणमात्रमपि नावतिष्ठते, हृदये इति शेषः। ("रसः सूतश्च पारदः" इत्यमरः) अथ यदि वदसि किमर्थमुपदिशसि ? असदृशं वा ? न तदुपदेशमुरीकरोमीति तत्राह—साधवः सन्तो मृगा इव हरिणा इव विनोदबिन्दोर्विनोदवेदितुः, सगरमण्डपठोः पुंसः श्रवणीनाकर्णनेन वशगा भवन्ति। ("ज्ञाता तु विदुरो विन्दुः" इत्यमरः) वीणा श्रूयते शब्दः श्रूयते इत्यादौ तद्धर्मवत् पुंसः श्रवणेन तद्धेतुश्रवणं लक्ष्यते। तथा च माघः,— "अम्लानि भूमिपतिभिः क्षणमौलनिद्रैरम्लं पुरो हरितकं मुदमादधानः। श्रीवाक्षोलक्षलक्षितिथिक्षानिनादमिश्रं दधद्भ्रमनुर्बुरश्रब्दसख्यः॥" इति। पक्षे—विनोदबिन्दोर्ज्ञातुः। ["ज्ञातोपयोगे" इति षष्ठी] श्रवणेन सदुपदेशश्रवणेन वशगा-सदधीनास्तादृशाः, शरत्समया इव भवादृशा जनाः सुखं जनयन्ति ; पिष्छोलिलादौ मधवादिक्रियाक्षेपवत् सुखमित्यनेन जननक्रियाक्षेपः ; अत एव मित्रस्य हृदयं हरन्ति। पक्षान्तरे—शरत्समयाः सुखजनाः शोभनाः खलजना येषु तादृशाः। ("खलरोटस्तु खलजः" इत्यमरः) सचेतनाः, मित्रस्येति शेषः, विसदृशमनोज्ञं

तथा हि, माधुर्य-श्लेत्य-शुचित्व-सन्तापशान्तिभिः पयः पय इवेति मित्रतामुपगतस्य दुग्धस्य तत्सङ्गमादर्हितस्य क्षीरेण ममैव पुरो युक्तः क्षय इति विचिन्त्येव वारिणाऽपि क्षीयते; तदिदमसाम्प्रतमाचरितं सखे! गृहाण साधुजनोचितमध्वानं, साधवो हि दिङ्मोहात् परमुत्पथप्रवृत्ता भवन्ति"।

इत्यादि वदति तस्मिन् कथमपि स्मरशरनिकरप्रहारपरवशः परिमिताक्षरमुवाच कन्दर्पकेतुः,—"वयस्य! दितिरिव शतमन्युसमाकुला भवति मनोवृत्तिः; नायमुपदेशकालः। पश्यन्ते इवाङ्गानि, क्षीयन्ते इवेन्द्रियाणि, भिद्यन्ते इव मर्माणि,

---

नोपदिशन्ति। अचेतनानामपि मैत्री समुचितपात्रे योग्यपात्रे निक्षिप्ता, तर्हि सचेतनमैत्र्याः का कथा? इति भावः।

"समानश्लोकव्यसनेषु सख्यम्" इतीममर्थं द्योतयन्नुभयसाधारणानि विशेषणान्याह, माधुर्येत्यादि।—माधुर्य श्लेत्य-शुचित्व-सन्तापशान्तिभिर्गुणैः; पयो जलं पय इव दुग्धमिवेति मित्रतामुपगतस्य तत्सङ्गात् दुग्धसङ्गादर्हितस्य वहुमूल्यतामापन्नस्य पुरः पूर्वं ममैव क्षयो युक्त इति विचार्य्य वारिणा क्षीयते। [भावे प्रत्ययः] मौलितालङ्कारोऽत्र। "ससीतलक्षया वाऽपि वस्तुना यन्निगूह्यते। निजेनात्मतुना वाऽपि तन्मौलितमिति स्मृतम॥" इति लक्षणात्। तत् तस्मादिदमाचरितमसाम्प्रतमयुक्तम; सखे! साधुजनोचितमध्वानं व्यवहारं गृहाण। साधवो हि दिङ्मोहात् परं कैवलमुत्पथप्रवृत्ता उन्मार्गप्रवृत्ता भवन्ति न त्वसद्व्यवहारे इत्यर्थः।

इत्यादि तस्मिन् मकरन्दे वदति सति, स्मरशरनिकरप्रहारपरवशः कामबाणव्यथाव्याकुलः, कथमपि महाक्लेशात् परिमिताक्षरमुवाच। वयस्य! सखे! चित्तवृत्तिर्दितिरिव दैत्यजननीव शतमन्युनेन्द्रेण समाकुला व्याकुला भवति। पक्षे— शतमङ्गलाका मन्यवस्तैः समाकुला [आकृपार्थ्यादिः] दितेर्गर्भनाशाय दितिप्रमादादिन्द्रेणमर्भे प्रविष्टः शक्र एकं गर्भं सप्तधा विभज्य सप्तधा विभक्तं प्रतिपद्यति सप्तधा भवतीति, त एवोनपञ्चाशद्वाता मरुद्गणा इति पुराणे प्रसिद्धम्। ("वयस्यः स्निग्धः सखा:"। "शतमन्युर्दिवस्पतिः"। "मन्युर्मनौ तु क्रुक् स्त्रियाम्" इति विश्वप्रकाशः) सखे चित्ते वृत्तयः सम्भवन्तीत्याह—नायमुपदेशकालः, कुतः? अङ्गानि पश्यन्ते इव शिथिलावयवानीव भवन्तीत्यर्थः। [कर्मकर्तरि साधुः। एवमग्रेऽपि] इन्द्रियाणि

निःसरन्तीव प्राणाः, उन्मूलयन्ते इव विवेकाः, नष्टा स्मृतिः; तदधुना यदि त्वं सहपांशुक्रीडनममदुःखसुखाऽसि, तदा मामनुगच्छ" इत्युक्त्वा परिजनालक्षितस्तेन सह नगरान्निर्जगाम।

अनन्तरं कतिपयनलशतमध्वानं गत्वा- अगस्त्यवचनसंक्षुब्धब्रह्माण्डगगनशिखरमङ्गः, कन्दराऽन्तराल-लताग्रहसुखसुप्त-विद्याधर-मिथुनगीताकर्णनसुस्थितचमरीशतमारणोत्सुकितशबर-शतसम्बाधकच्छः, कटककरिकराक्रष्टभग्न-स्यन्दमानहरिचन्दना-ऽऽमोदवाहि-मन्थवाहशिशिरितशिलातलः, सुदूरपतनभग्नताल-

---

क्षयन्ते इव; क्षोभपाकयोर्भेदात् पौनरुक्त्यम्। मर्माणि भिद्यन्ते इव विदीर्यन्ति इवेत्युत्प्रेक्षे। प्राणा निःसरन्तीव। विवेका उन्मूल्यन्ते इव उत्पाट्यन्ते इव। स्मृतिर्नष्टा। मानधी रीतिरत्र। ततोऽधुना यदि पांशुक्रीडने समदुःखसुखः; एतेन बालसख्यं ध्वनितम्। राजकुमाराचासेतादृक्क्रीडाऽसम्भवेऽपि लोकप्रवादानुसरणम्; तेन लोकोक्तिरलङ्कारोऽत्र। "लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते" इति लक्षणात्। तदा मामनुगच्छेत्युक्त्वा परिजनेनालक्षितस्तेन सह नगरान्निर्जगाम।

अनन्तरं नगरादुपवहिर्गमनोत्तरं कतिपयनलशतं तावत्परिमितमध्वानं मार्गं गत्वा, ताभ्यामिति शेषः, विन्ध्यो नाम गिरिरङ्गीकृतेति सम्बन्धः। ("क्लिशुर्ङसे वितस्तौ च" "नल्वः क्लिशूतुःशतम्" इत्यमरव्याख्यमरः) अनल्पवचनेन संक्षुब्धं ब्रह्माण्डगतं शिखरमङ्गः येन सः। ("कूटोऽस्त्री शिखरं शृङ्गम्" इत्यमरः) अनप्राप्तेनाह—कन्दरा हरौ तदन्तराले लतागृहं तत्र सुखेन सुप्तानि विद्याधर-मिथुनानि तेषां गीतं गानं तदाकर्णनेन सुस्थितं चमरीणां शतमेतल्लीनां शतं तन्मारणोत्सुकितं शबरशतं तेन सम्बाधः सङ्कटः कच्छः कटो यस्य सः। ("दरी तु कन्दरो वा स्त्री"। "निषादशबरौ म्लेच्छे-वासिपाल्लावपुक्कसाः। भेदाः किरात-शबर-पुलिन्दा म्लेच्छजातयः॥" "गोकर्णपृषतैणेय-रोहितास्तमरो समाः"। "सङ्कटं ना तु सम्बाधः सङ्कितं सङ्कमे समे" इति चतुर्थ्यमरः। "कूलं प्रतापः कच्छ-रोधसी। तटं तीरं प्रतीरं च" इति हैमः) "कच्छाङ्किः" इति भाषायाम्। कटके अद्रिनितम्बे वारणैः; इत्युक्ताभिराकृष्टात्त एव भग्नात्त एव स्यन्दमानानि प्रस्रवमानानि हरिचन्दनानि तेषां यामोदोऽतिनिष्ठुरतरमलयाद्रौ गन्धवाही

फलरसार्द्रकरतलास्वादनोत्सुकशाखामृगः, प्रलम्बमाननिर्झरोपविष्टजीवञ्जीवमिथुनलेलिह्यमानविविधफलरसामोदसुरभितपरिसरः, सरभसकेसरिसटाच्छटाखरनखरधाराविदारितमत्तमातङ्गकुम्भस्थलविगलितमुक्ताफलशबलितशिखरतया शिरोलग्नं तारागणमिवोद्वहन्, सुग्रीव इव ऋक्षगवयशरभकेसरिकुमुदसेव्यमानपादच्छायः, पशुपतिरिव नागनिःश्वाससमुत्क्षिप्तभूतिः, जनार्दन

वायुसेन शिशिरितं शिशिरवदाचरितं शिखातलं यस्य सः। ("कटकोऽस्त्री नितम्बोऽद्रेः"। "श्वासोदः स्योऽतिनिर्झरौ"। "नम्बवाङ्गानिलायुगाः"। "सुधीतः शिशिरो जड़ः। तुषारः शीतलः शीतः"। "पचैते देवतरवो मन्दारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्॥" इति पञ्चकाण्डशेषः। "हरिनासाकरः शुक्लो हलः" इति हैमः) [स्वन्द प्रस्रवणे] सुदूरपतनेन भग्नानि ताम्रफलानि तेषां रसेनार्द्रयोः करतलयोरास्वादनेन लेहनेनोत्सुकाः शाखामृगा वानरा यस्य सः। ("हरयो मर्कटे वानरः स्त्रीयः" इत्यमरमालाव्यमरः) "शाखामृगबलीमुखाः मर्कटो वानरः स्त्रीयः" इत्यमरमालाव्यमरः) प्रलम्बमानत्वात् एव निर्झरेषूपविष्टानि यानि जीवञ्जीवमिथुनानि चकोरमिथुनानि तैर्लेलिह्यमानानि पुनः पुनरास्वाद्यमानानि तादृशानि च तानि विविधफलानि तेषां रसामोदेन सुरभितः परिसरः प्रान्तदेशो यस्य सः तादृशः। [लेलिह्यमानेति सङ्लुगन्तात् कर्मणि शानच्] ("जीवञ्जीवश्चकोरकः"। "पर्य्यन्तभूः परिसरः" इत्यमरमालाव्यमरः) सरभसं सवेगं केसरिसटाच्छटस्य सिंहसटासमूहस्य खरनखरधारया विदारितानि मत्तमातङ्गकुम्भस्थलानि तेभ्यो विगलितानि मुक्ताफलानि तैः शबलितशिखरतया शिरोलग्नं तारागणमिव नक्षत्रसमूहमिवोद्वहन्। ("ऋक्षोऽस्त्री भल्लरो भल्लः केसरी हरिः"। "नक्षोऽस्त्री नक्षरोऽस्त्रियाम्"। "नक्षत्रमृक्षं भं तारा" इति विश्वप्रकाशः) पुनः सेवेचाह—सुग्रीव इव ऋक्षो भल्लुकवान् गवयः शरभः केसरी कुमुद एतत्संज्ञकैर्वानरैः सेव्यमानपादच्छायः। ते च रामायणे—"गवो गवाक्षो गवयः शरभो गन्धमादनः" इति। पद्मे—ऋक्षो भल्लुकः, गवयो वनगवः, शरभः कुञ्जरहिट्, केसरी सिंहः, कुमुदः कैरवं दिग्गजो वा, तैः सेव्यमाना पादानां प्रत्यन्तपर्वतानां छाया यस्य सः। ("ऋक्षाच्छभल्लभल्लुकाः"। "पादाः प्रत्यन्तपर्वताः" इत्यमरमालाव्यमरः। "गवयः स्यादनगवो गोसदृशोऽस्यवारकः"। "शरभः कुञ्जरारातिरष्टपादोऽपदपि" इत्यमरमालापि हैमः। "कपीन्द्रः कुमुदः

इव विचित्रवनमालः, सहस्रकिरण इव समपत्रस्यन्दनोपेतः, विरूपाक्ष इव सन्निहितगुहः शिवानुगतश्च, कामीव कान्तारोष-रसानुगतः समदनश्च, श्रीपर्वत इव सन्निहितमल्लिकार्जुनः, नर-वाहनदत्त इव प्रियङ्गुश्यामासनाथः, शिशुरिव कृतधात्रीधृतिः, वासरारम्भ इव गैरिकारुणप्रभापाटलितवनराजिः, कृष्णपक्ष इव

ओऽपि कृत्तिवासा दिगम्बरः" इति शाश्वतः) पशुपतिरिव शिव इव नागनिःश्वासेन सर्पनिःश्वासेन समुत्थिता भूतिर्भस्म यस्य सः। पक्षे—नागनिःश्वासेन गजनिःश्वासेन समुत्थिता भूतिः सम्पत्तिर्यस्य सः। यद्वा—नागानां लिखितानस्थितसर्पाणां निःश्वासेनेत्यादि। जनार्दन इव विष्णुरिव विचित्रा वनमाला यस्य सः। ("वापाद-पद्मं या माला वनमालेति सा स्मृता" इति) पक्षे—विचित्रा वनमाला वनपरम्परा यस्य सः। सहस्रकिरण इव सूर्य इव समे पत्राणि वाहनानि यस्मिन् तादृशः स्यन्दनः रथः तेन उपेतः। ("पत्रं वाहनपक्षयोः" इत्यमरः) पक्षे—समपत्रो विषमच्छदः। स्यन्दनसन्निभः। ("समपर्णो विशालत्वक् भारदो विषमच्छदः"। "तिनिशे स्यन्दनो नेमिः" इत्युभयत्राप्यमरः) विरूपाक्ष इव शिव इव सन्निहितो गुहः कार्त्तिकेयो यस्य सः, शिवया पार्वत्या अनुगतश्च। पक्षे—सन्निहिता गुहा गह्वरं यस्य सः, शिवाभिर्धात्रीभिः क्रोष्ट्रीभिर्वा अनुगतश्च। ("शिवा गौरी शिवा क्रोष्ट्रो भवेद्धात्रीफलेऽपि शिवा" इति शाश्वतः। "हैवखातविले गुहा गह्वरम्"। "शिवा गौरीफेरवयोः" इत्युभयत्राप्यमरः) श्रीपर्वत इव सन्निहितो मल्लिकार्जुनो यस्य सः, मल्लिकार्जुनो नाम हरः। पक्षे—सन्निहितो मल्लिकार्जुनो यस्य सः। ("हपुषूर्वं मल्लिकायां विषु स्यात् केतकीफले" इति विश्वमेदिन्यौ। "नदीसर्जौ वीरतरुरिन्द्रदुः कुटजोऽर्जुनः" इत्यमरः) कामीव कामुक इव कान्तानां रोषरसाभ्यामनुगतः, समदनश्च। पक्षे—कान्तारमूषरता ऊषरभूमिस्तामनुगतः, समदनः सधुस्तूरः। ("कान्तारं वर्त्म दुर्गमम्"। "ऊषवानूषरो द्वावप्यस्त्रियौ"। "धुस्तूरः कनकाह्वयः। मातुलो मदनश्च" इति विश्वप्रकाशः) नरवाहनदत्तस्तत्रानयो राजा तद्वत् प्रियङ्गु-श्यामया तन्नामसदृश्या सनाथः। पक्षे—प्रियङ्गुः फलिनी, श्यामा रोचनी। ("प्रियङ्गुः फलिनी फल्गुः"। विशल्यो रोचनी श्यामा" इति द्वयोरप्यमरः) "श्वेतविधारा" इति ख्यातम्। शिशुरिव बालक इव कृता धात्र्या धात्रीत्वेनाङ्गीकृता धृतिरवस्थानं येन सः। पक्षे—धात्र्यपनीता। ("धात्री स्यादुपनीताऽपि" इत्यमरः) वासरारम्भ इव गैरिकारुणप्रभया पाटलिता वनराजिर्वनपरम्परा यस्य संवृतिर्वा यस्य सः।

बहुलतागहनः, कर्ण इवानुभूतशतकोटिदानः, भीष्म इव शिखण्डिमुखैरर्जुनचन्द्रैराचितः, कामसूत्रविन्यास इव मल्लनाग-घटितः कान्तारसामोदश्च, हिरण्यकशिपुरिव शम्बरकुलाश्रयः, गैरिकव्याजाद्रविरथमार्गमार्गणार्थमिवारुणैनोपास्यमानः, शिखर-गतसूर्याचन्द्रमस्तया विस्तारितलोचनोऽगस्त्यमार्गमिवोद्वीक्ष-माणः, सस्तान्त्रजाल इव जरदजगरभोगैः, कुम्भकर्ण इव

("अव्यक्तरागस्त्वरुणः"। "श्वेतरक्तस्तु पाटलः" इति हथोरप्यमरः) गैरिकवदरुणश्च सूर्यसूतश्च प्रभा तया ("सूरसूतोऽरुणोऽरुकः" इत्यमरः) कृष्णपक्ष इव बहुलता कृष्णता तया गहनः। [भावे तल्] ("बहुलः कृष्णपक्षेऽपौ त्रिषौ च बहुला त्रिषु" इति विश्वप्रकाशः। कोषे त्रिषौ कृष्णे) पक्षे—बहुलताभिर्गहनः सान्द्रः। ("यष्टी तु लतिर्लता" इत्यमरः) कर्ण इवानुभूतं शतकोटीनां तत्कृत्याकथनानां दानं वितरणं येन सः। पक्षे—अनुभूतं शतकोटिना वज्रेण दानं खण्डनं छेदनं येन स तादृशः। [दो अवखण्डने] ("शतकोटिः खड्गः शस्त्रः" इत्यमरः) भीष्म इव आततायी इव शिखण्डिमुखैरर्जुनचन्द्रैस्तदाख्येषुभेदैराचितो व्याप्तः। पक्षे—शिखण्डो बर्हं तदस्ति येषां ते शिखण्डिनो मयूरास्तेषुमुखैरर्जुनचन्द्रैरर्जुनमेघकाङ्कैः पक्षैः आचितः। अर्जुनश्चन्द्रश्च तदा-कारयुक्ता लक्ष्यन्ते। ("शिखण्डस्तु पिञ्छबर्हं नपुंसके"। "सभौ चन्द्रकमेघकौ" इति हथोरप्यमरः) कामसूत्रविन्यास इव मल्लनागेन मुनिविशेषेण, पक्षे—गजविशेषेण घटितो रचितो युक्तश्च। ("मल्लनागोऽप्सनातङ्के वात्स्यायनमुनावपि" इति विश्वप्रकाशः) कान्तानां रसामोदो शृङ्गारहर्षौ येन स तादृशः। पक्षे—कान्तारे दुर्गवर्त्मनि कानने वा सामोदोऽतिसुगन्धः। हिरण्यकशिपुरिव शम्बरो दैत्यविशेषस्तत्कुलाश्रयः। पक्षे—शम्बरो हरिणविशेषो जलं वा द्रव्यं वा। ("रङ्कुशम्बररौहिषाः"। "नीरजोवाल्लु-शम्बरम्" इत्युभयत्रामरः। "शम्बरं सलिले क्लीबे बौद्धव्रतविशेषयोः। शम्बरो दैत्यहरिण-मत्स्यशैलजिनान्तरे॥" इति विश्वप्रकाशः) गैरिकव्याजाद्रविरथमार्गश्च मार्गणार्थमन्वेषणार्थमिवारुणैनोलोहितैरुपास्यमानः। [सृग अन्वेषणे] शिखरगत-सूर्याचन्द्रमस्तया [("देवताद्वन्द्व च" इत्यानङ्] विस्तारितलोचनो विकसितनेत्रोऽ-गस्त्यमार्गमुद्वीक्षमाण इव; यावदहमागच्छामि तावत् त्वमुपविशेत्युक्त्वा गतो मुनि-रायाति न वेति मार्गावलोकनमिति पुराणप्रसिद्धम्। जरदजगरभोगैर्वृद्धशयुशरीरैः सस्तान्त्रजालो विगलितान्त्रसमूह इव। ("अन्त्रं पुरीतत्"। "अजगरे शयुर्वाहस

दन्तान्तरालगतवानरव्यूहः, पिण्डालक्तकरागाङ्कितपादपङ्क्ति-सूचित-सञ्चरित--शचीपतिवारविलासिनीसङ्केत--केतकीमण्डपः, अकुलीनोऽपि सदंशभूषितः, दर्शितभयोऽपि मृत्युफलदायी, सप्रस्थोऽप्यपरिमाणः, सनदोऽपि निःशब्दः, भीमोऽपि कौचक-सुहृत्, पिहितास्वरोऽप्युल्लसदंशुको विन्ध्यो नाम महागिरि-रदृश्यत।

इत्यमी" इति द्व्योरप्यमरः) कुम्भकर्ण इव दन्तान्तराले दशनान्तराले गतो वानरव्यूहो यस्य स तादृशः। पक्षे—दन्तः कटकः सानुर्विद्यन्विगतः शिलाविशेषो वा, तदन्तरालगतवानरव्यूहः। ("दन्तो गिरिनितम्बे च दशने सानुनि स्मृतः" इति विश्वः। "दन्तकास्तु बहिस्त्रियैकदेशान्निःसृता गिरेः" इति हेमः) पिण्डी-भूतमलक्तकं पिण्डालक्तकं तद्रागेणाङ्कितानां पादानां चरणानां पङ्क्तिभिः परम्पराभिः सूचितं सञ्चरितं सञ्चरणं येषु [भावे क्तः] तादृशाः शचीपति-वारविलासिनीनामुर्वश्यादीनां सङ्केतकेतकीमण्डपा यस्मिन् सः। विरोधाभासो-ऽयं—अकुलीनोऽपि' निन्द्यगोत्रोऽपि सदंशैर्नीत्यमकुलीन भूषितो मण्डित इति विरोधः; न को पृथिव्यां लोकोऽकुलीनोऽस्त्युच्चत्वात्, शोभनैर्वंशैर्वेणुभिरलङ्कृत इति परिहारः। दर्शितमभयं येन सः, मृत्युजनकं फलं दातुं शीलमस्य तादृश इति विरोधः; दर्शिता अभया हरीतकी येन सः, मृत्युफलं महाकालफलं कदलीफलं वा दातुं शीलमस्य तादृगिति परिहारः। ("अभया त्वभया पथ्या" इत्यमरः। मृत्युफलं महाकाले कदल्यां मृत्युफल्यपि" इति विश्वः) सप्रस्थः प्रस्थमाणविशेष-विशिष्टः, अपरिमाणः परिमाणरहित इति विरोधः। ("कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक्" इत्यमरः) सप्रस्थः ससानुरित्यविरोधः। ("स्तूः प्रस्थः सानुरस्त्रियाम्" इत्यमरः)। नदेन शब्देन सहितः सनदो निःशब्द इति विरोधः। [यद् अव्यक्ते शब्दे] नदेन शोणाख्यनदेन सहितो निःशब्द इत्यविरोधः। भीमोऽपि युधिष्ठिरानुजोऽपि कौचकसुहृत् तन्नामविराटराजश्यालकसुहृत्, विराटराष्ट्रावस्थितः कौचकः पाञ्चाल्यां साभिलाष इति भीमेन हत इति भारते प्रसिद्धमिति भीमस्य कौचकसुहृत्त्वं विरोधः; भीमो भयानकः, कौचको वंशविशेषाक्षेपो सुहृत्। ("वेणवः कौचकाश्चैते स्वनन्त्यनिलोद्धताः" इत्यमरः) पिहितास्वरश्छादितवस्त्रः, उल्लसत् स्फुरन्माल्यमंशुकं वस्त्रं यस्य स इति विरोधः। ("चेलं वसनमंशुकम्" इत्यमरः) पिहितमाच्छादितमम्बरमाकाशो येन सः; उल्लसन्तः स्फुरन्तो माल्या अभ्रा एवांशुकाः

यस्य प्रहृद्गुल्मतयेव दृश्यमानबहुधातुविकारः, साधुरिव सानुग्रहप्रचारप्रकटितमहिमा, मीमांसान्याय इव पिहित-दिगम्बरदर्शनः।

यस्य हरिवंशैरिव पुष्करप्रादुर्भावरमणीयैः, राशिभिरिव मीनमिथुनकुलीरसङ्गतैः, करणैरिव शकुनि-नाग-भद्र-बालव-कुलोपेतैर्दैवखातैरुपशोभितोपान्तः।

किरणा यस्य सः इति परिहारः। [स्वार्थे कः] ("अस्त्रं ज्योति वाससि।" "किरणोऽस्त्रियमयूखांशुः" इत्यमरश्चाप्यमरः)।

श्लेषेषाह—यो विन्ध्यः प्रहृद्गुल्मतया प्रहृत्स्तम्बतयेव दृश्यमानो बहुधातूनामनेक-गैरिकादीनां विकारो यस्य तादृक्। ("अपकाण्डे स्तम्बगुल्मौ"। "धातुर्मनः-शिलादौ" इत्यमरश्चाप्यमरः) पक्षे—प्रहृद्गुल्मतया प्रहृद्गुल्मोद्गतया दृश्यमानो बहुधातूनां रसादीनां विकारो यस्य सः। ("गुल्मस्तु गुल्मो पुंसि" इत्यमरः। "रसा-सृक्सामसमेदोऽस्थि-मज्जशुक्राणि धातवः। सप्तैव दश चैकेषां रोमत्वक्स्नायुभिः सह।" इति हैमः। मता इति शेषोऽत्र) साधुरिव सानुग्रहः सकृपः प्रचारस्तरणं तेन प्रकटित उद्योतितो महिमा स्फोत्कर्षो येन सः। पक्षे—सानुषु शिखरेषु यद्वा सूर्यादीनां प्रचारेण भ्रमणेन प्रकटितो महिमौन्नत्यं येन सः। मीमांसान्याय इव तच्छास्त्रमिव पिहितं तिरोहितं दिगम्बरदर्शनं दिगम्बरमतं येन सः। पक्षे—पिहितं छादितं दिगम्बरयोर्दिशाकाशयोर्दर्शनं येन सः।

यो विन्ध्यो दैवखातैरुपशोभितोपान्त इत्यन्वयः। हरिवंशैरिव पुष्करप्रादुर्भाव आख्यानविशेषेण, पक्षे—पुष्कराणां कमलानां जलानां वा प्रादुर्भावेण रमणीयैः। ("सहस्रपत्रं कमलं पुष्कराण्युडकानि च"। "सलिलं कमलं जलं पुष्करं सर्वतोमुखम्" इत्यमरश्चाप्यमरः) राशिभिरिव ज्योतिःशास्त्रप्रसिद्धैर्मेषादिराशिभिरिव मीनो मिथुनं कुलीरः कर्कटश्च सङ्गतैः। पक्षे—मीनमिथुनं कुलीराश्च तैः सङ्गतैः। करणै-रिव ज्योतिषागमविशेषैर्बवादिकरणैरिव शकुनि-नाग-भद्र-बालवानां तत्संज्ञकानां कुलैः समुदायैरुपेतैः। पक्षे—शकुनिः पक्षी नागो गजः सर्पो वा भद्रो मुस्ता बाल-वकुलो लघुकेसरः, अथवा—बालं क्षौद्रेरं वकुलः केसरसेवपेतैः। ("शकुनि-पक्षिशकुनि-शकुलशकुनांहिजाः"। "मुस्ता मुस्तकमस्त्रियाम्। स्याद्वकुलः"। "बालं क्षौद्रेरवर्षिष्ठोदीच्यम्"। "अथ केसरं वकुलः" इति चतुरक्षरकोशः।)

पुस्तकालय

यस्य कुसुमविचित्राभिः, वंशपत्रपतिताभिः, सुकुमारललिताभिः, पुष्पिताग्राभिः, शिखरिणीभिः, प्रहर्षिणीभिर्लताभिर्दर्शितानेकवृत्तविलासः।

यस्य मदकलकलहंससारसरसितोद्भ्रान्तभाःकूटविकटपुच्छच्छटाव्याधूतविकच-कमलखण्डविगलित-मकरन्दबिन्दुसन्दोहसुरभितसलिलया, सायन्तनमज्जन-पुलिन्दराजसुन्दरी-नाभिमण्डलनिपीतसलिलया, मदमुखरराजहंसकुलकोलाहलमुखरितकूलपुलिनया, तटनिकटमत्तमातङ्गगण्डपिण्डविनिर्गतमदधारास्रवकितसलिलया तीरप्ररूढ़-केतकीकाननपतित-

---

यो विन्ध्यो लताभिर्दर्शितानेकवृत्तविलास इति मध्यस्थः। कुसुमैर्विचित्राभिर्वंशपत्रेषु पतिताभिः सुकुमाराश्च ललिताश्च ताभिः पुष्पितानि सञ्जातपुष्पाण्यग्राणि यासां ताभिः शिखरिणीभिः शिखरमयं सहतीभिः मायाभिरित्यर्थः, प्रहर्षिणीभिः प्रकर्षेण हर्षकारिणीभिः [अन्तर्भावितण्यर्थोऽयं हृषिः]। पक्षे—तत्तदभिधानैः स्कन्धोभिः। "स्त्री स्त्रो गल्लिदग्रयतिः प्रहर्षिणीयम"। "रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी"। "नयसहितौ त्यौ कुसुमविचित्रा"। "कुमारललिता जसौ गः"। "दिग्वनि वंशपत्रपतितं भरतमनलगैः"।

पुनरनुप्रासेनाह—यो विन्ध्यो रेवयोपगूढ इत्यन्वयः। मदेन कलमव्यक्तमधुरं कलहंसानां कादम्बानां सारसानां पुष्कराख्यानां रसितं शब्दश्लेषोद्भ्रान्ता भाःकूटा अत्यविशेषाश्लेषा विकटपुच्छच्छटाभिर्व्याधूतविकचकमलखण्डाद्विगलितमकरन्दबिन्दुसन्दोहेन सुरभितसलिलया। ("कादम्बः कलहंसः स्यात्"। "पुष्कराह्वस्तु सारसः" इत्यमरव्याख्यासुधासमरः। "भाःकूटः कथ्यते सौम्ये श्रेष्ठान्तरेऽपि च" इति विश्वप्रकाशः। "भेटकी" इति भाषायाम्) सायन्तने सायङ्कालिके ["सायं चिरम्" इत्यादिना ष्ट्युट्प्रत्ययस्य] मज्जने पुलिन्दराजसुन्दरीणां शबराङ्गनानां नाभिमण्डलैर्निपीतसलिलया। मदमुखरराजहंसकुलस्य कोलाहलः कलकलशब्देन मुखरितं कूलपुलिनं यस्यास्तया। ("राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः"। "कोलाहलः कलकलः"। "कूलं रोधश्च तीरं च"। "तोयोत्थितं तत् पुलिनम्" इति चतुर्थ्यमरः। कोषे तदित्यनेन तटम्) तटनिकटमत्तमातङ्गमण्डपिण्डविनिर्गतमदधाराभिः स्रवकितं सञ्जातस्रवकं सलिलं यस्यास्तया।

धूलिनिकुरम्बजातसैकतसुखोपविष्टतरुणसुरमिथुननिधुवनलीला-परिमलसाच्चिकूलोपवनया, तटाटवीनिकटनिपतितजम्बूखण्ड-मण्डपावस्थितजलदेवताऽवगाह्यमानतोयया, तीरप्ररूढवेतस-लताभ्यन्तरलीनदात्यूह्यूहमदकलकुहकुहाऽऽरावकौतुकाकृष्ट-सुरमिथुनसंस्तूयमानाभोगया, उपकूलसञ्जातनलनिकुञ्जपुञ्जित-कुलायकुक्कुटघटाघूत्कारभैरवतीरया, जलमानुषीमृदित-सुकुमारतीरया, उपवनवातान्दोलिततरलतरङ्गया, नल-

("गण्डः कटौ नदी दानम्" इत्यमरः) तीरप्ररूढकेतकीकाननेनिपतितधूलिनिकुरम्बं समूहस्तेन जातं यत् सैकतं तत्र या सुखोपविष्टतरुणसुरमिथुननिधुवनलीला तस्यां परिमलो विमर्दजन्मा जननलोहरो गन्धस्तत्साधि कूलोपवनं तीरज-क्षविभवनं यस्यास्तया। उपवनस्य परिमलसाधित्ववर्णनेन सर्वथा जनसञ्चाररहितत्वं ध्वन्यते। अत्र सैकतशब्दप्रयोगस्तत्सदृशे औपचारिकः। ("मैथुनं निधुवनं रतम्"। "विमर्दोत्थे परिमलो गन्धे जननलोहरे"। "आरामः स्यादुपवनं कृत्रिमं वनमेव यत्" इति विश्वप्रकाशः) तटीटवी वनं तस्या निकटे निपतितानि जम्बूखण्डानि तेषां मण्डपेष्ववस्थितजलदेवताभिरवगाह्यमानतोयया। ("अटव्यरण्यं विपिनं गहनं काननं वनम्" इत्यमरः) तीरप्ररूढवेतसलताऽभ्यन्तरलीनदात्यूह्यूहः कालकण्ठकसमूह-स्तस्य मदकलो यः कुहकुहाऽऽरावः कुहकुहशब्दस्तेन कौतुकं तदाकृष्टसुरमिथुनैः संस्तूयमाना आभोगः परिपूर्णता यस्यास्तया। ("दात्यूहः कालकण्ठकः"। "आरवा-रावसंरावविरावाः"। "आभोगः परिपूर्णता" इति विश्वप्रकाशः)। उपवनोप-भोग इत्यपि पाठः। उपकूलं [सामीप्येऽव्ययीभावः] तव सञ्जाती नलनिकुञ्जो जलादिच्छादितो देशस्तत्र पुञ्जितः पुञ्जवदाचरितोऽनेक इत्यर्थः, कुलायो नीडं यस्याः सा चासौ कुक्कुटघटा कुक्कुटसमूहस्तस्या घूत्कारेण तादृशशब्देन भैरवं भयानकं तीरं यस्यास्तया। "श्येनीपशब्यनिपतद्रथनेमिधारा" इत्यादौ उपशब्यशब्दस्यान्ते प्रयोग इत्यपि घटाशब्दस्य समुदाये प्रयोगो भाक्तः। ("गण्डस्तु धमनः पोटगलः"। "निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे"। "कुलायो नीडमस्त्रियाम्"। "कुक्कुटस्ताम्रचूडः"। "अथ भैरवम्। दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्" इति पुरुषोत्तम-देवः) जलमानुषीमृदितसुकुमारतीरया, जलमानुषवज्जलमानुषः प्राणिविशेषः। [जातेरस्त्री विषयात्" इति ङीष्] उपवनवातान्दोलिततरलतरङ्गया। एतेनात्र

निकुञ्जपुञ्जनिविष्टावकोटककुटुम्बिनीनिरीक्ष्यमाणार्द्धशफरया, पीताधानलुब्धकोथष्टिकस्कभनभीमवेतसवनया, तरलतरङ्ग-मालासञ्चरदुद्दण्डपाण्डदर्शनधावदतिचपलराजिलराजिरञ्जितोप-कूलसलिलया, कणाटोरमिथुनमैथुनदर्शनोपजातनिधिप्रदृष्ठ-कौतुक-किरातशतखन्यमानतोरया, क्रुद्धयेव दर्शितमुखविभङ्गया, मत्तयेव स्खलितगत्या, दिनारम्भलक्ष्म्येव वर्द्धमानवेलया, भारतसमरभूम्येव नृत्यत्कबन्धया, प्रावृषेव विजृम्भमाणशतपत्र-

---

वाते गुरुत्वं वर्णितम्; तेन कामिनां सर्वदा सुखकारिताऽस्य ध्वनिता। नलनिकुञ्जपुञ्जे निविष्टोऽवकोटको वकलत्कुटुम्बिनी स्त्री तया निरीक्ष्यमाणो-ऽर्द्धशफरो दष्टपादो यस्यां तया। ("वकोऽवकोटकश्चाथ बलाका तु बको स्मृता"। "दष्टपादोऽर्द्धशफरः" इति हरावल्यौ) पीताधानं क्षुद्राक्षसत्यसङ्घातस्तस्य क्षुब्धकोथष्टिकस्य टिट्टिभकस्य स्खलनं शब्दश्लेषेण भीमं वेतसवनं यस्यास्तया। [स्खलः सौत्रो धातुरनेकार्थत्वाच्छब्दार्थः] ("क्षुद्राक्षसत्यसङ्घातः पीताधानम्"। "कोथष्टि-ष्टिट्टिभकः" इति हरोरप्यमरः) तरलतरङ्गमालायां सञ्चरद्दुष्टपाण्डो सत्यविशेष-दृष्टदर्शनेन धावदतिचपला या राजिलराजिर्दुष्टभसमूहस्तेन रञ्जितमुपकूलसलिलं यस्यास्तया। ("भवेद्दुष्टपाण्डस्तु सर्पसत्यप्रभेदयोः" इति विश्वप्रकाशः। "शफौ राजिलदुष्टभौ" इत्यमरः) कणाटोरः खञ्जनस्तस्य मिथुनमैथुनदर्शनेनोपजातं निधिप्रदृष्ठ-कौतुकं येषां तादृक्किरातानां शतेन खन्यमानतोरया। ("कणाटोरः। खञ्जरीखञ्जु खञ्जनः" इति हरावल्यौ। "कौतूहलं कौतुकं च"। "भेदाः किरातशबर-पुलिन्दा म्लेच्छजातयः" इति हरोरप्यमरः) तथा च वराहमिहिरः,—"तस्मिन् निधिर्भवति मैथुनमेति यस्मिन् यस्मिन् पुनर्वमति तत्र तस्मिंस्त्वि काथः। अङ्गारमप्युपरिशन्ति पुरीषमेऽस्य तत्कौतुकाय नयनस्य खनेदरित्रीम॥" इति। वसन्तराजोऽपि—"अङ्गारखण्डं किल भूमिभागे तस्मिन् भवेत् यत्र करोति विष्ठाम्। यत्रावनौ खञ्जनको विधत्ते रतं भवेत् तत्र महानिधानम्॥" इति। क्रुद्धयेव दर्शितो मुखस्य वदनस्य विभङ्गः भ्रूभङ्गुटीविकारादिर्यया। पक्षे—मुखविभङ्गौ निःसरत्त-रङ्गौ यस्याः। ("मुखं निःसरणाब्धौ" इति धरणिः। "भङ्गस्तरङ्गे ऋभिर्वा" इत्यमरः) मत्तयेव स्खलिता गतिर्यस्यास्तया। पक्षे—स्खलिता तिर्यक् गतिः प्रवाहो यस्यास्तया। दिनारम्भलक्ष्म्येव वर्द्धमाना वेला कालो यस्यां तया। पक्षे—

पिहितविषधरया, धनकामयेव कृतभूभृत्सेवया, रेवया प्रिय-तमयेव प्रसारितवीचिहस्तयोपगूढः।

यच्च—

हरिखरनखरविदारितकुम्भस्थलविकलवारणध्वानैः।
अद्यापि कुम्भसम्भवमाह्वयतीवोच्चतालभुजः॥

ततो मकरन्दस्तमुवाच,—

"पश्योदञ्चदवाञ्चदञ्चितवपुः पश्चार्द्धपूर्वार्द्धभाक्
स्तब्धोत्तानितपृष्ठनिष्ठितमनाग्भुग्नाग्रलाङ्गूलभृत्।
दंष्ट्राकोटिविशङ्कटास्यकुहरः कुर्वन् सटामुत्कटा-
मुत्कर्णः कुरुते क्रमं करिपतौ क्रूराकृतिः केसरी॥

वेला मर्य्यादा, ("अब्ध्यम्बुविकृतौ वेला कालमर्य्यादयोरपि" इत्यमरः)। भारत-समरभूम्येव नृपत्वबन्धसमपमूर्द्धकलेवरं यस्यां तया; पक्षे—कबन्धं जलं, ("कबन्धं सलिले रुद्रे कबन्धो राक्षसान्तरे" इति विश्वः। "कबन्धोऽस्त्री क्रियायुक्तसमपमूर्द्ध-कलेवरम्" इत्यमरः)। प्राङ्गणेव विजृम्भमाणैः शतपत्रैर्मधुरैः, पिहिताः मधुर-भक्षणभयादितस्ततश्चक्राः, विषधराः सर्पा यस्यां तया; ("शतपत्रः सितापाङ्गः प्रफुल्लाक्षी च चन्द्रकी" इति हारावली) पक्षे—विजृम्भमाणशतपत्रैः कुशेशयैः, पिहिताश्चक्राः, विषधराः जलधरास्खड़ागादयो यस्यां तथा, ("शतपत्रं कुशेशयम्" इत्यमरः। "विषं क्लेदे जलेऽपि च" इति विश्वः)। धने द्रव्ये, कामोऽभिलाषो यस्यास्तयेव, कृता भूभृतो राज्ञः, पक्षे—विन्ध्यस्य, सेवा यया। प्रसारित-वीचिहस्तया प्रियतमयेवोपगूढः।

हरीति।—यो विन्ध्यः, उच्चस्ताल एव भुजो यस्य सः तादृशः, हरिखरनखर-विदारितकुम्भस्थलविकलवारणध्वानैरद्यापि कुम्भसम्भवम् अगस्त्यम्, आह्वयतीवा-गच्छागच्छेत्याह्वानं करोतीवेत्यर्थः, ("कुञ्जरो वारणः करी"। "अगस्त्यः कुम्भसम्भवः" इति द्वयोरप्यमरः)। उत्प्रेक्षालङ्कारः। आर्य्या वृत्तम्।

ततो गिरिदर्शनोत्तरं, मकरन्दस्तं कन्दर्पकेतुम्, उवाच।

स्वभावोक्त्याऽऽह, पश्येति।—उदञ्चदुत्तिष्ठत्, अवाञ्चदधोगच्छत्, अञ्चितं वपुः पश्चार्द्धपूर्वार्द्धे भजति इति तादृक्, ["अपरस्यार्द्धे पश्चभावो वक्तव्यः" इति प्रागर्द्धेभ्यः] स्तब्धोत्तानितपृष्ठे निष्ठितं स्थितं तादृक्, मनागीषत्, भुग्नमवनम्र

अपि च—

उत्कर्णोऽयमकाण्डचण्डिमपटुः स्फारस्फुरत्केसरः
क्रूराकारकरालवक्त्रविकटः स्तब्धोर्ध्वलाङ्गूलभृत्।
चित्रेणापि न शक्यतेऽभिलिखितुं सर्वाङ्गसङ्कोचनात्
चौत्कुर्वद्गिरिकुञ्जकुञ्जरशिरःकुम्भस्थलस्थो हरिः" ॥

अनन्तरं नीचदेशनद्येव न्यग्रोधोपचितया, उत्तरगोग्रहसमरभूम्येव विजृम्भमाणहूहूनलया, मरुदेशघटकायात्रयेव घनसारसार्थवाहिन्या, विदग्धजनमधुपानगोष्ठ्येव नानाविटपोतासवया, नलकूबरचित्तवृत्त्येव सततभृतरम्भया, मत्तमातङ्गगत्येव घण्टारवावेदितमार्गया, सदीश्वरसेवयेवादूरोन्नतबहुफलया, विराटलक्ष्म्येवानन्दितकीचकगतया, विन्ध्याटव्या कतिचित् पदानि गत्वा कामिन इव मदनशलाकाङ्कितस्य जम्बूवृक्षस्य शीतलच्छायायां विश्रम्यताम।

ताद्दक्, लाङ्गूलं पुच्छः, तं बिभर्त्ति इति ताद्दक्, दंष्ट्राकोटिभिर्विशङ्कटं बृहत्, आस्यकुहरं मुखगर्भो यस्य ताद्दक्, उत् हृद्यौ, कर्णौ यस्य सः ताद्दशः, सटामुत्कटां कुर्वन् क्रूराकृतिः केसरी सिंहः, करिपतौ गजवरे, क्रमं पादविक्षेपं, कुरुते पश्य; ["पश्य मृगो धावति" इत्यादाविवात्र क्रियायाः कर्मत्वम्] ("पुच्छोऽस्त्री लूमलाङ्गूलम्"। "विशङ्कटं पृथु बृहत्" इति हर्यारव्यमरः। "सटा जटाकेसरयोः" इति हैमः)। स्वभावोक्तिरलङ्कारः, "स्वभावोक्तिस्तु तस्यैव जात्यादिरूपस्य वर्णनम्" इति लक्षणात्। शार्दूलविक्रीडितं वृत्तम्; "सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्रीडितम्" इति लक्षणात्।

उत्क्रममाणं वर्णयित्वा क्रान्तगजं वर्णयति, उत्कर्ण इति।—उत्कर्णः, अकाण्डचण्डिमपटुः, स्फार बहु, स्फुरन्तः केसरा यस्य ताद्दशः, क्रूराकारं करालं वक्त्रं मुखं, तेन विकटो भयानकः, अत्र लिङ्गलक्षणं, लाङ्गूलबिभर्त्ति ताद्दक्, चौत्कुर्वन्, गिरिकुञ्जकुञ्जरशिरःकुम्भस्थलस्थोऽयं पुरोवर्ती, हरिः सिंहः, सर्वाङ्गसङ्कोचनाच्चित्रेणाप्यभिलिखितुं न शक्यते। अत्र शिरःपदमधिकम्। ("तुरङ्गसिंहयोः स्तब्धकेसरेषु दन्तुरद्रुमे। पुन्नागहरिचन्दनेषु केसरः स्यात्" इति हैमः)।

अत्रान्तरे भगवानपि मरीचिमाख्यातपक्षान्तमत्तमहिष-

अनन्तरं सिंहावलोकनालन्तरं, विन्ध्याटव्या विन्ध्यारण्येन, कतिचित् पदानि गत्वा क्वापि एव मदनशलाकाऽङ्कितस्य जम्बूवृक्षस्य शीतलच्छायायां विश्रमामेत्यन्वयः। ("मदनशलाका सारिवा पाठशालिनी" इति हारावली) पक्षे—मदनशलाका कामादृषीधकी वर्त्तिविशेषः, ("मदनशलाका कामी सिद्धौषधमप्यर्थं वदति" इति मेदिनी)। "स्यान्मदनशलाकाऽपि सार्व्या कामोदयौषधी" इति विश्वप्रकाशः) नख-क्षतमिति केचित्। नीचदैशनत्वेव निम्नभागनत्वेव, व्याधीधोऽधःप्रदेशावरोधनं, तेनोपचितया वृद्धया; पक्षे—व्याधीधैर्दोषैः, उपचिता तया, ("व्याधीधो बहुपाइटः" इत्यमरः)। उत्तरगोग्रहसमरभूम्येव विजृम्भमाणो वृद्धप्रलोऽर्जुनः यस्यां तया; ("उत्तरस्तु विराटस्य तनये दिग्गि चोत्तरे" इति विश्वप्रकाशः) पक्षे—वृद्धप्रलो धमनश्च यस्यां तया। ढक्काया ढक्काध्वनेः, याचा गमनं ढक्कायाता, मरुदेशस्य ढक्कायाता तयैव, घनो मेघः, तत्सारः पानीयं, तदर्थं याचः समूहः, तद्वाहिनी तत्प्रापिका तया; यद्वा—ढक्केत्यनेन तद्वनिः, सा चासौ याचा उत्सवः तयैव; तदुक्तमुदकं कूपादित्येवरूपस्तुत्या; अन्यत् पूर्ववत्; ("गमनोत्सवयोर्यात्रा" इति विश्वः) मरुदेशे जलार्थिनी ढक्काध्वनिश्रवणाज्जलमुद्गतमम्भोरिति निकषा प्रयान्तीति प्रसिद्धम्; पक्षे—घनसारः कर्पूरं, पुष्पफलहीनः अरबीरसमानाकारपत्रः क्षुपभेदो वा, ("घनसारस्तु कर्पूरे वृक्षभेदे जलेऽपि च" इति विश्वः) ढक्काध्वनेति त्वपपाठः। ["असंज्ञात्वात् ङ्याषोः संज्ञाच्छन्दसोः" इत्यस्यापवादेन] विदग्धजनमधुपानमोष्ठेव नानाविटैरनेकधिङ्गैः, पीत आसवो मद्यं यस्यां तादृश्या; ("धिङ्गः पाल्लविको विटः"। "मैरेयमासवः शौण्डः" इति हयीरत्नमरः) पक्षे—नानाविटपिषु इतं जातम्, आसवं लाक्षादिकं यस्यां तया। नलकूवरः कुबेरसुतः, तस्मिन्नलत्वेव सततं धृता रम्भा तत्स्वामिकाऽस्मरसो यया तादृश्या; (अस्येत्यनुक्तौ" पुत्रस्तु नलकूवरः" इति कुबेरप्रकरणेऽमरः) पक्षे—सततं धृता रम्भा कदली यया, ("कदली वारणवृक्षा रम्भा मोचाऽऽशुमत्फला" इत्यमरः)। मत्तमातङ्गस्येव घण्टाया रवः शब्दः, तेनाविदितमार्गया; पक्षे—घण्टारवा वृक्षभेदः, ("घण्टारवा तु शणपुष्पिका" इत्यमरः)। सदोश्वरसेवयेवादूरोद्गतानि बहूनि बहुविधानि भूयांसि वा, फलानि यस्यां तया; पक्षे—अदूरं अविग्रम्, उद्गतानि बहूनि घनात्यनिष्टनिवारणादीनि फलानि यस्यां तया। विराट-उत्सवानन्दितं कीचकानां तच्छ्यालानां, श्रुतं यया; पक्षे—कीचका वंशविशेषाः, ("वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः" इत्यमरः)।

लोचनपाटलमण्डलश्चरमाचलशृङ्गमारुरोह। ततो मकरन्दः फलमूलान्यादाय कथं-कथमपि तमभिनन्दिताहारपरिचयमकार्षीत्, स्वयं च तङ्क्तशेषमशनमकरोत्।

अथ तामेव प्रियतमां हृदयफलके सङ्कल्प्य तूलिकया लिखितामिवावलोकयन् निस्पन्दकरणग्रामः कन्दर्पकेतुर्मकरन्दविरचितपल्लवशयने सुष्वाप।

अथार्द्धयाममात्रावखण्डितायां यामवत्यां तत्र जम्बूतरुशिखरे शुकसारिकयोर्मिथः कलहायमानयोः कलकलं श्रुत्वा कन्दर्पकेतुर्मकरन्दमुवाच—"वयस्य! शृणुवस्तावदेतयोरालापम्" इति।

ततः सारिका प्रकोपतरलाक्षरमुवाच—"कितव! सारि-

अथान्तरेऽस्मिन्नवसरे, आतपक्लान्तमत्तमहिषलोचनवत् पाटलो मण्डलो यस्य तादृक्, मरीचिमाली सूर्यः, चरमाचलशृङ्गमस्तगिरिशिखरम्, आरुरोह। ("श्वेतरक्तस्तु पाटलः"। "अस्तस्तु चरमः क्लीबम्" इति द्वयोरप्यमरः)। ततोऽस्तगमनोत्तरं, मकरन्दः फलमूलान्यादाय तं कन्दर्पकेतुम्, अभिनन्दिताहारपरिचयमकार्षीत्, स्वयं च तङ्क्तशेषमशनमकरोत्।

अथ फलाद्यशनोत्तरं, हृदयफलके हृदयपट्टे, सङ्कल्प्य तूलिकया कूर्चिकया, लिखितां तामेव स्वप्नदृष्टामेव, प्रियतमामवलोकयन् ध्याने पश्यन्, निस्पन्दकरणग्रामो निश्चलसकलेन्द्रियः, कन्दर्पकेतुर्मकरन्दविरचितपल्लवशयने सुष्वाप। ("अथ तूलिका कूर्चिका" इति हैमः)। नक्तन्ततकन्दमूलाशनपल्लवशयनशयनेन गिरौ तपश्चरणं ध्वनितम्।

गिरेः सद्यः फलदातृत्वं दर्शयति, अथेत्यादिना।—अथ शयनोत्तरम्, अर्द्धयाममात्रावखण्डितायां विभावर्यां तत्र जम्बूतरुशिखरे तस्मिन् जम्बूवृक्षाग्रे, मिथः कलहायमानयोः शुकसारिकयोः कलकलं श्रुत्वा कन्दर्पकेतुर्मकरन्दमुवाच। ("मिथोऽन्योऽन्यं रहस्यपि"। "द्वौ यामप्रहरौ समौ" इत्युभयत्राप्यमरः)। किमित्याह, वयस्येति।—वयस्यैतयोरालापं तावच्छृणुव इति।

ततः कलहानन्तरं, सारिका प्रकोपतरलाक्षरं [क्रियाविशेषणम्] उवाच—कितव!

काऽन्तरमन्विष्य समागतोऽसि ? कथमन्यथा रात्रिरियती तव ?" इति । तच्छ्रुत्वा शुकस्तामवादीत्—"भद्रे ! अपूर्वाऽद्य कथा मया श्रुता प्रत्यक्षीकृता च, तेनायं कालातिपातः" । अथ समुपजातकुतूहलया सारिकयाऽनुरुध्यमानः कथयितुमारेभे ।

"अस्ति सुधाधवलैः, बृहत्कथारम्भैरिव शालभञ्जिकोपेतैः; वृत्तैरिव समाणवककीर्णितैः, करियूथैरिव समत्तवारणैः, सुग्रीवसैन्यैरिव सगवाक्षैः, बलिभवनैरिव सुतलसन्निवेशैः, वेश्मभिरुपशोभितम् ; धनदेनापि प्रचेतसा, अजापालेनापि

धूर्तं !, सारिकाऽन्तरमन्विष्य, अन्वेषणेन तया सह सम्बन्धो लक्ष्यते ; समागतोऽसि ? अन्यथा सारिकाऽन्तरसम्बन्धाभावे, तवेत्यस्य तदागमने लक्षणा ; इयती रात्रिरिति । तच्छ्रुत्वा शुकस्तां सारिकाम्, अवादीत्—भद्रे ! अद्यापूर्वा कथा श्रुता प्रत्यक्षीकृता च ; कथायाः शब्दप्रबन्धस्य प्रत्यक्षासम्भवात् तदर्थभूतक्रियाया अपि प्रत्यक्षासम्भवात् तदाश्रया जन्या लक्ष्यन्ते ; तेनायं कालातिपातः तदागमनेऽतिकाल इत्यर्थः । अत्र शुकवाक्यश्रवणोत्तरं, समुपजातकुतूहलया सारिकयाऽनुरुध्यमानः अपरादिना भूयो भूयोऽर्थ्यमानः, शुकः इति शेषः, कथयितुमारेभे ।

कुसुमपुरं नाम नगरमस्त्योत्यन्वयः । कीदृग्वेश्मभिरुपशोभितम् ? सुधाधवलैः "कुडी" इति प्रसिद्धं लेपनद्रव्यं, ("सुधा लेपोऽमृतं सुडी" इत्यमरः) । बृहत्कथा गुणाढ्यकृतिः, तदारम्भैरिव शालभञ्जिकोपेतैः शालभञ्जिका नायिकाविशेषः ; पक्षे—शालभञ्जिका पुत्तलिका, ("शालभञ्जी पाञ्चालिका च पुत्तलिका" इति हैमः) । वृत्तैरिव छन्दोभिरिव, समाणवककीर्णितैः माणवककीर्णितं नाम छन्दोविशेषः, "माणवकं भात्तलगः" ; पक्षे—माणवकानां शिशूनां, क्रीडितानि तैः सहितानि तैः । करियूथैरिव समत्तवारणैः समत्तगजैः ; पक्षे—सनिर्यूहैः, ("मत्तवारणनिष्क्रान्तं शालनिष्क्रकरे हिपे । महाप्रासादवीथीनां वरण्डे चाग्रपार्श्वये ॥" इति विश्वप्रकाशः । "निर्यूहो मत्तवारणम्" इति वैजयन्ती । "मत्तालम्बोऽग्रपार्श्वयः स्यात् प्रग्रीवो मत्तवारणः" इति हैमः । "निर्यूहः शेखरे द्वारे निर्यासे नागदन्तके" इति विश्वप्रकाशः) । सुग्रीवसैन्यैरिव सगवाक्षैः गवाक्षो वानरविशेषस्तत्सहितैः ; पक्षे—सगवाक्षैः सवातायनैः । बलिभवनैरिव सुतलो पातालविशेषे, सन्निवेशो येषां तैः ; पक्षे—

रामेण, प्रियंवदेनापि पुष्पकेतुना, भरतेनापि शत्रुघ्नेन, तिथि-परेणाप्यतिथिसत्कारपरेण, असङ्क्रेणापि सङ्ग्रावता, अमर्म-भेदिनाऽपि वीरतरेण, अपतितेनापि नानासवासक्तेन, सुदर्शने-नाप्यचक्रेण, अजातमदेनापि सुप्रतीकेन, अपक्षपातिनाऽपि हंसेन, अविदितस्नेहक्षयेणापि कुलप्रदीपेन, अग्रन्थिनाऽपि वंश-द्योतेन, निदाघदिवसेनेव वृषविवर्द्धितरुचिना, माघविराम-दिवसेनेव तपस्यारम्भिणा, अग्रहेणापि काव्यजीवक्षेन, पौरजने-नानुगतम्; धनागमदिवसेनेव दर्शितखण्डाभ्रेण, वेलातटेनेव

शोभनस्तनसन्निवेशो येषां तैः। पौरजनेनानुगतमित्यन्वयः। धनदेनापि कुबेरेणापि, अचेतसा वरुणेनेति विरोधः; धनदो धनदाता, प्रकृष्टं चेतो यस्य स इत्यविरोधः। अजापाली जावालः, राम: पशुविशेष इति विरोधः; केचित् त्वजापाली रामपूर्वजः, रामो दाशरथिरिति विरोधः; ("जावालः स्यादजाजीवः"। "रामः सुमरी गवयः अग्रः। इत्यादयो मरीन्द्राद्याः" इत्यमरव्याख्यसरः) अकारी वासुदेवः, तस्माज्जातोऽत्र: क्रामः, तमापालयति ताट्क्, अत एव रमयतीति रामः [ण्यन्तात्क्, ततोऽण्] स्तोणां क्रीडाकारकत्वाट्टेनेत्यविरोधः। प्रियंवदो गन्धर्वविशेषः, पुष्पकेतुः काम इति विरोधः; प्रियं वदतीति ताट्क् तेन, ["प्रियवशे वदः खच्" इति खच्। "अरुर्द्विषत्" इति मुम्] पुष्पकेतुः पुष्पाभरणस्तेनेत्यविरोधः। भरतः कैकेयीतनयः, अत्रघ्नः सौमित्रिरिति विरोधः; मे नक्षत्रे रतस्तेन ज्यौतिषिकेण, शत्रुघातकेनेति परिहारः। तिथौ विहिततत्तत्तिथिकर्मणि, परेण रतेन, न तिथिसत्कारपरोऽतिथि-सत्कारपर इति विरोधः; अतिथीनामायत्नूनां सत्कारपरेणेति परिहारः, ("आगन्तु-रतिथिर्नो गृहागते" इत्यमरः)। असङ्क्रेण बहुलाङ्गणनारहितेन, सङ्ग्रावता सङ्ग्रासहितेनेति विरोधः; असङ्क्रेणायुद्धेन, सङ्ग्रावता पण्डितेनेत्यविरोधः, ("सङ्ग्रासस्कन्दनं सङ्ग्रामः"। "सङ्ग्रावान् पण्डितः कविः" इत्युभयव्याख्यसरः)। अमर्म-भेदिनाऽपि वीरतरेण काण्डेन, काण्डस्य मर्मभेदित्वं प्रसिद्धं, तद्विपरीतेन वर्णनं विरोधः; ("अजिह्मगो वीरतरोऽस्त्रकण्टकः" इति शब्दरत्नावली) मर्म रहस्यं, तद्भेदकेन, वीरतरेणातिशूरेणेति परिहारः। अपतितेन भूमावपतितेन, नानासवासक्तेनानेक-मद्यासक्तेनेति विरोधः; ("मैरेयमासव: शौण्डः" इत्यमरः) अपतितेनाप्रायश्चित्तार्हेण, नाना सवा अनेकयज्ञाः, तेष्वासक्तेनेति परिहारः, ("यज्ञः सवोऽध्वरो याग:"

प्रबालमणिमण्डितेन, देवाङ्गनाजनेनेवेन्द्राणीपरिचयविदग्धेन, वनगजेनेव पल्लवपल्लवितरुचिना, कोकिलेनेव परपुष्टेन, भ्रमरेणेव कुसुमेषु लालितेन, जलौकसेव रक्ताकृष्टिनिपुणेन, याजकेनेव सुरतार्थिना, महानटबाहुनेव वलाङ्गुजङ्घेन, गरुडेनेव विलासिहृदयतापकरेण, अन्धासुरेणेव शूलानामुपरिगतेन, वेश्याजनेनाधिष्ठितं कुसुमपुरं नाम नगरम्।

इत्यमरः)। अजातमदेनासम्भृतदानेन, सुप्रतीकेन तन्नामकगजेनेति विरोधः; अजातमदेनासञ्जाताङ्गारेण, सुष्ठु प्रतीकमङ्गं यस्य तेनेति परिहारः, (अङ्गं प्रतीकोऽवयवः" इत्यमरः)। सुदर्शनेनाचक्रेण, विष्णुचक्रस्य सुदर्शन इति संज्ञेति विरोधः; अचक्रेणादर्शेन, ("जनावने समूहे च दर्शे भेदरथाङ्गयोः" इति रन्तिदेवः) शोभनं दर्शनं यस्येत्यविरोधः। न पक्षेण गरुता, पततोत्यपक्षपाती तेन, हंसेन पक्षिणेति विरोधः; अकारे विष्णौ, पक्षपातो ताद्दशेन, हंसेन विशुद्धेन निर्लोभेन वेति परिहारः, ("अकारो वासुदेवः स्यात्" इत्येकाक्षरः। "हंसो विशुद्धे निर्लोभे श्रेष्ठे च विहगान्तरे" इति विश्वः)। न विदितः स्नेहस्य तैलस्य, क्षयो येन तेनापि कुलप्रदीपेनेति विरोधः; न विदितः स्नेहक्षयोऽनुरागक्षयो येन, कुलस्य वंशस्य, प्रदीपेन प्रकाशकेनेति परिहारः। अपत्रिणा पर्वरहितेन, वंशपोतेन वंशाङ्कुरेणेति विरोधः; अपत्रिणा पुङ्खहृदयेन, वंशपोतेन सत्कुलाभर्केणेत्यविरोधः। निदाघदिवसेनेव हर्षेण हर्षभसङ्कुलेन, विवर्द्धितरुचिना प्रवृद्धतापेनेत्यर्थः; पक्षे—हर्षे धर्मे, विवर्द्धितरुचिना। माघविरामदिवसेनेव तपस्यस्य फाल्गुनस्य, आरम्भिणा; ("स्यात् तपस्यः फाल्गुनिकः" इत्यमरः) पक्षे—तपस्या तपश्चरणं, तदारम्भिणा। अपरेणापि काव्यजीवत्नेन गुरुगुरुसुधेन; पक्षे—काव्यस्य जीवत्नेनाग्रयत्नेन। वेश्याजनेनाधिष्ठितमित्यन्वयः। घनागमदिवसेनेव दर्शितखण्डाभेण दर्शितखण्डमेघेन; पक्षे—खण्डाभं दलच्चतविशेषः, तथा च वामनः,—"विचित्रमौक्तिकोत्परिमण्डलं च चते: समन्तादिग्रहैरुपेतम्। खण्डाभमेतद्वयनावलेखं विम्बाधरोत्पत्तविभूषणाय॥" इति। वेलातटेनेव प्रवाला विद्रुमाः, मणयश्च तैर्मण्डितेन; पक्षे—प्रवालैरुत्तमकैर्विदुमैर्वा, मणिभिर्मण्डितेन; यद्वा—प्रवालमणिदलच्चतविशेषः, तथा च वामनः,—"गाढं दृत्तौष्ठसंयोगात् स प्रवालमणिर्भवेत्" इति। देवाङ्गनाजनेनेवेन्द्राणी शची, तस्याः परिचयाविदग्धेन; पक्षे—इन्द्राणी रतौ बन्धविशेषः, "निशम्यचरयसम्भृतनागुणा

यत्र च सुरासुरमौलिमालालालितचरणारविन्दा, शुम्भनिशुम्भमहावनदावज्वाला, महिषमहासुरगिरिवज्रसारधारा, प्रणयप्रणतगङ्गाधरजटाजूटस्खलितजाह्नवीजलधारा-धौतपादपद्मा, भगवती कात्यायनी वेतालाभिधाना स्वयं प्रतिवसति।

भवति चाभ्यासात्। इन्द्राणीरचितत्वादिन्द्राणीत्याख्यया वन्द्यः॥" इति। वनगजेनेव पल्लवे किसलये, पल्लविता विहृता, रुचिरिच्छा येन तेन; पक्षे—पल्लवैः पल्लवेषु वा विटैर्विटेषु वा, विवर्तितरुचिना, ("पल्लवः किसलये भिदुरे विस्तारे विटपेऽपि च" इति विश्वः)। कोकिलेनेव परभृता पुष्टेन; पक्षे—परभृत्यर्थं, पुष्टेन। भ्रमरेणेव कुसुमेषु पुष्पेषु, लालितेन; पक्षे—कुसुमेषुणा कामेन, लालितेन। जलौकसेव रक्ताकृष्टिः, रुधिराकृष्टिः, तव निपुणेन; ("रक्तवतजलौकसौ" इत्यमरः) ["जलौकसेन" इति पाठे—पूर्वजलौकःशब्दात् स्वार्थेऽण् पश्चात् समासः] पक्षे—रक्तानामनुरक्तानाम्, आकृष्टिस्तव निपुणेन। (शाब्दिकैस्तु 'जलौकाभिः कथितोऽयं जलौकसः" इति शब्दभेदप्रकाशः)। योजकेनेव सूरता सूरत्वं, तदर्थिना; [भावे तल्, "तलन्तं स्त्रियाम्" इति स्त्रीत्वम्] पक्षे—सुरतं निधुवनं, तदर्थिना। मद्दानटवाहुनेव विभुजेनेव, वल्गद्भुजेन, पक्षे—वल्गद्विलासिना, ("भुजङ्गोऽहिविलासिनोः" इति विश्वः)। गरुडेनेव विले आसितुमुपवेष्टुं शीलं येषां तेषां सर्पाणां, हृदयतापकरेण; पक्षे—विलासिनां स्वाधङ्गनविलसनशीलानां, हृदयतापकरेण। अन्धासुरेणेव शूलानामुपरिगतेन; [दारा दत्यादाविवाबध्यत्वाभिप्रायेण बहुवचनम्] अन्धासुरो भैरवेण शूलाग्रे रोपित इति कथा; पक्षे—शूलानामुपरिगतेन अत्यन्तस्थिताग्रो वेश्याभ्योऽधिकेनेति भावः। ("स्थौ प्रहरणे शूलः केतने शोगरोगयोः। स्वलाटेऽपि वधार्थाय कीलके पण्यधीषिति॥" इति विश्वप्रकाशः)।

यत्र कुसुमपुरे, वेतालाभिधाना स्वयं प्रतिवसतीति सम्बन्धः। सुरासुरेति व्यष्टम्। शुम्भनिशुम्भावेव महावनं तस्य दावज्वाला वारण्याग्निशिखा, ("दवदावौ वनारण्यवह्नी" इत्यमरः)। महिषेति रूपकं, "विषयभेदतात्पर्यरञ्जनं विषयस्य यत्" इति लक्षणात्। प्रणयेन प्रीत्या, प्रणतो यो गङ्गाधरस्तस्य जटाजूटात् स्खलिता या जाह्नवीजलधारा तया धौतपादपद्मा; एतेन न केवलं भर्त्रैव प्रणताम्, किन्तु सपत्नाऽपि पादक्षालनमाचरितमिति ध्वनितं, तेनातिवल्लभात्वं ध्वनितम्।

यस्य च परिसरे सुरासुरमुकुटकुसुमरजोराजिपरिमलवाहिनी, पितामहकमण्डलुघर्मद्रवधारा, धरातलगतसगरसुतशतसुरनगरसमारोहणपुण्यरज्जुः, ऐरावतकटकषणकम्पिततटहरिचन्दनस्यन्दनसुरभितसलिला, सलीलसुरसुन्दरीनितम्बविम्बाहतितरलिततरङ्गा, स्नानावतीर्णसप्तर्षिजटाटवीपरिमलपुण्यवेणिः, एणतिलकमुकुटजटाजूटविकटकुहरभ्रान्तिजनितसंस्कारतयेव कुटिलावर्त्ता, धरणीव सार्वभौमकरस्पर्शोपभोगक्षमा, जलदकालसरसीव गन्धान्धोपरिभ्रमद्भ्रमरमालानुमीयमानजलमग्नकुमुदपुण्डरीका, कुन्दोविचितिरिव मालिनीसनाथा, हतान्धतमसाऽपि तमसाऽन्विता, वीचिकलिताऽप्यवीचिदुर्गमा, भगवती भागीरथी वहति।

यस्य पुरस्य, परिसरे प्रान्ते, भागीरथी गङ्गा, वहतीति सम्बन्धः। सुरासुरेति। पितामहस्य ब्रह्मणः, कमण्डलोर्घर्मद्रवरूपा धारा। धरातलगतसगरसुतशतस्य सुरनगरसमारोहणार्थं पुण्यरज्जुः। ऐरावतस्य कटकषणेन गण्डस्थलघर्षणेन, कम्पिततटहरिचन्दनस्य स्यन्दनेन प्रस्रवणेन, सुरभितसलिला। सलीलं [क्रियाविशेषणं] सुरसुन्दरीनितम्बविम्बाहतिभिस्तरलिततरङ्गा। स्नानावतीर्णसप्तर्षिजटाटव्याः परिमलपुण्यवेणिः पुण्यप्रवाहा। एणतिलकस्य मृगस्य, मुकुटे यस्य तस्य जटाजूटविकटकुहरे भ्रान्तिभ्रमणं, तेन जनितसंस्कारतयेव कुटिलावर्त्ता जलभ्रमभक्तितो, ("स्यादावर्त्तोऽम्भसां भ्रमः" इत्यमरः)। धरणीव सार्वभौमस्य चक्रवर्त्तिनः; पक्षे—सार्वभौम उत्तरदिग्गजः, तस्य करस्पर्शोपभोगक्षमा, उभयोरेकदिक्स्थत्वादिति भावः, ("स्पर्शः स्पर्शनदानयोः" इति विश्वः)। जलदकालसरसीव गन्धान्धोपरिभ्रमन्ती यावो भ्रमरमाला तया अनुमीयमानानि जलमग्नकुमुदपुण्डरीकाणि यस्यां सा; पक्षे—कुमुदपुण्डरीकौ दिग्गजौ। कुन्दोविचितिर्गुच्छविशेषः, तद्वन्मालिनी कुन्दोविशेषः, तेन सनाथा; "ननमयययुतेयं मालिनी भोगिलोकैः"; पक्षे—मालिनीनामिका नदी। हतान्धतमसाऽपि नाशितान्धकाराऽपि, तमसा अन्धकारेण, अन्वितेति विरोधः; तमसानामिकया नद्या, अन्वितेति परिहारः। वीचिभिस्तरङ्गैः, कलिता व्याप्ताऽपि, न वीचिभिर्दुर्गमेति विरोधः; पक्षे—अवीचिनरकभेदः, ("तद्वेदास्तपनावीचिमहावीरवरौरवाः" इत्यमरः)।

यत्र दिशि दिशि तारागणमिव कुसुमनिकरमुद्दहद्भिः, उत्तम्भितजलदैः, अनुकरकशाभिघातपरवश-रविरथतुरगग्रास-विषमितपल्लवैः, चन्द्रचमूरुचरणसङ्क्रान्तामृतकणनिकरसेक-मज्ञातबहलसुकुमारनवकिसलयसहस्रदर्शिताकालसन्ध्याविभ्रमैः, भरतचरितैरिव सदा रामाश्रितैः, महावीरैरिव नारिकेली-धरैः, असंस्कृततरुणैरिवातिदूरप्रसारिताग्रैः, मत्तमातङ्गकुम्भ-स्थलदारणोद्यतसिंहैरिवोद्यतकेसरैः, सारिष्टैरपि चिरजीविभिः, उपवन-पादपैरुपशोभितम्, अदितिजठरमिवानेक-देव-कुला-ध्यासितं, पातालमिव महाबलिशोभितं भुजङ्गाधिष्ठितं च, सुरालयैरपि पवित्रं, भोगिभिरपि निरुपद्रवम्।

यत्र च सुरतभरखिन्नसुप्तसीमन्तिनीरत्नताटङ्कमुद्राङ्कित-बाहुदण्डैः, प्रचण्डप्रतिपक्षलक्ष्मीकेशपाशकुसुममालाऽऽमोद-

---

स्तम्भितजलदैः। उपवनपादपैरुपशोभितमित्यत्र दिशि दिशीति शेषः। अत एवोत्तम्भितजलदैः। अनुकरेति। ("अश्वादेस्ताड़नी कशा" इत्यमरः)। घासो भक्षणम्। शेषं स्पष्टम्। भरतचरितैरिव सदा रामाश्रितैः; पक्षे—सन् श्रेष्ठः, य आरामस्तदाश्रितैः। असंस्कृततरुणैरिवातिदूरं प्रसारिते अग्रिमे येषां तैः, कटाक्षदर्शनानभिज्ञत्वादिति भावः, [बहुव्रीहौ "सक्थ्यक्ष्णः स्वाङ्गात् षच्" इति षच्] यद्वा—अतिदूरं प्रसारिता अग्राः पाणयो येषां तैः; ("अथाञ्जलिर्द्वयोः" इत्यमरः) पक्षे—अग्रा विभीतकाः, ("विभीतकः। नाऽक्षवृक्षः कर्षफलो भूतावासः कलिद्रुमः" इत्यमरः)। मत्तमातङ्गकुम्भस्थलदारणोद्यतसिंहैरिवोद्यतकेसरैरुद्भूतस्कन्ध-केशैः, जातिविशेषैरेतत्; पक्षे—केसराः सटाः, ("चामरेयः केसरी नागकेसरः" इत्यमरः)। सारिष्टैरपि अरणसूचकयोगविशेषसहितैरपि, चिरजीविभिः; पक्षे—सारिष्टैः फेनिलफलसहितैः, ("अरिष्टः फेनिलः समौ" इत्यमरः)। अदिति-जठरमिव देवमातृकुक्षिवत्, अनेकं देवकुलं देवसमूहः, तेनाध्यासितम्; पक्षे—देवकुलं देवगृहम्। सुरालयैर्मद्यगृहैरपि, पवित्रमिति विरोधः; सुरालयैर्देवगृहै-रित्यविरोधः। भोगिभिः सर्पैरपि, निरुपद्रवमिति विरोधः; भोगिभिः सुखिभि-रिति परिहारः।

सुरभितकरकमलः, प्रशस्तकेदार इव बहुधान्यकाव्यसम्पादकः, शृङ्गारशेखरो नाम राजा प्रतिवसति।

यो बलभित् पावको धर्मराट् निर्ऋतिः प्रचेताः सदागतिः धनदः शङ्कर इत्यष्टमूर्त्तिरप्यनष्टमूर्त्तिः, पार्थ इव सुभद्रोपेतः समोमसेनश्च, कृष्ण इव सत्यभामोपेतः सबलश्च।

सुराणां पाताऽसौ स पुनरतिपुण्येकहृदयो
ग्रहस्तस्थाने गुरुरुचितमार्गे स निरतः।
करस्तस्यात्यर्थं वहति शतकोटिप्रणयितां
स सर्वस्वं दाता तृणमिव सुरेशं विजयते॥

यत्र कुसुमपुरनाम्नि नगरे, शृङ्गारशेखरो नाम राजा प्रतिवसतीति सम्बन्धः। सुरतेति स्फुटम्। प्रथम इति स्फुटम्, अनेन क्रमपदपूर्वकसारस्वतः स्वायत्तीकृतेति ध्वनितम्। प्रशस्तकेदार इव विशदक्षेत्रमिव, बहुधान्यकाव्यसम्पादकः; ("पुन्नपुंसकयोर्वप्रः केदारः क्षेत्रम्" इत्यमरः) पक्षे—बहुधा बहुप्रकारेण, धान्यकाव्यसम्पादकः।

यः शृङ्गारशेखरः, बलभिच्छक्रबलमेत्ता, पावकः पवित्रकर्त्ता, धर्मश्च राजते धर्मराट्, निर्गता ऋतिः पीडा यस्य तादृशः, ("ऋतिर्गतौ तृष्णायां च स्पर्द्धायां च शुभेऽपि च" इति रभसः) प्रकटं चेतो यस्य स प्रचेताः, सतां या सार्वत्रिकी, गतिर्निर्बाधा यस्मात् तादृशः, धनदो धनदाता, शङ्करः कल्याणकारी; पक्षे—बलभिदिन्द्रः, पावको वह्निः, धर्मराट् यमः, निर्ऋतो राक्षसः, प्रचेताः वरुणः, सदागतिर्वायुः, धनदः कुबेरः, शङ्करः शिवः, इत्यष्टमूर्त्तिरष्टगुणविशिष्टा मूर्त्तिरस्येत्यष्टमूर्त्तिरप्यनष्टमूर्त्तिः नाष्टौ मूर्त्तयोऽस्येत्यनष्टमूर्त्तिरिति विरोधः। अनष्टा मूर्त्तिरस्येत्यनष्टमूर्त्तिरिति परिहारः। पार्थ इवार्जुन इव, सुभद्रयोपेतः, भीमसेन सहितः समोमसेनः; पक्षे—शोभनभद्रेण कल्याणेन युतः, भीमया सेनया सहितः। कृष्ण इव सत्यभामयोपेतः, सबलः सबलभद्रः; पक्षे—सत्यं [illegible] दोषिश्च, मा च लक्ष्मीश्च, ताभिर्युतः, सबलः ससैन्यः।

सुराणामिति।—बलविन्द्रः, सुराणां देवानां पाता रक्षकः, मद्यप इत्यपि श्लेषसङ्गत्या अर्थः, शृङ्गारशेखरः पुनरतिपुण्यः पावनम्, एकं हृदयं यस्येत्युत्कर्षं गतात्, तस्येदृशः, स्वस्थाने स्वभार्यायां, गुरुर्बृहस्पतिः, यद्वा यथेषु पण्डितः, तस्येदृशः,

जीवाकृष्टिं स चक्रे मृधभुवि धनुषः प्रत्यचायाः प्रचुरासीदतासु-
र्लब्धासिर्मार्गणानामभवदरिबले तद्वयग्रस्तेन लब्धम्।
मुक्ता तेन क्षमेति त्वरितमरिबलैरुत्तमाङ्गैः प्रतिष्ठा
पञ्चत्वं हेविसैन्ये स्थितमवनिपतिर्नाप सङ्ग्रान्तरं सः॥

यत्र च राजनि राजनीतिचतुरे चतुरुदधिमेखलाया भुवो नायके शासति वसुमतीं पितृकार्य्ये हृषोत्सर्गः, शशिनः कन्या-तुलारोहणं, योगे शूलव्याघातचिन्ता, दानच्छेदः करिकपोलेषु,

अन्यानि गुरुमंदान्, यद्वा निर्वक्त्रं इत्यर्थः, ("निर्वक्त्रोपरागार्कादयो यद्वाः" इत्यमरः) स राजा, उचितमार्गे निरतः सक्तः, तत्रैवस्थ, करी इतः, शतकोटिप्रणयितां शतप्रणयितां, वहति, ("शतकोटिः स्वरुः शस्त्रो दम्भालिरशनिर्द्वयोः" इत्यमरः) शतकोटिसङ्ख्याकद्रव्यप्रणयिता सामिलाषतेति याचकरूपोऽर्थः, स राजा, सर्वस्वं दाता, ["न लोका—" इति निषेधात् कर्मणि षष्ठी न] सुरेशमिन्द्र, तृणमिव विजयते, ["विपराभ्यां जेः" इत्यात्मनेपदम्] विरोधाभासोऽलङ्कारः। शिखरिणी छन्दः, "रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी"।

जीवेति।—स शूद्रारशेखरः, मृधभुवि धनुषो जीवायाः प्रत्यचायाः, आकृष्टि-आकर्षणं, चक्रे, प्रचुरैतासुरासीत्; धनुषा जीवाकृष्टिः प्रत्योर्मरणमित्यसङ्गत्यलङ्कारः; व्यक्तातिशयोक्तिश्च। ("मौर्वी जीवा गुणो गव्या शिञ्जा वाणासनं गुणे" इति हैमः) अरिबले मार्गणानां लब्धासिरभवत्, तेन राज्ञा, तेषामरीणां, यशो लब्धं, तेन राज्ञा, क्षमा शान्तिः, मुक्तेत्यरिबलैस्त्वरितमुत्तमाङ्गैः प्रतिष्ठा मुक्ता, हेविसैन्येऽरिबले, पञ्चत्वं मृत्युः, स्थितं, ("स्यात् पञ्चता लाभधर्मः" इत्यमरः) स राजा, सङ्ग्रान्तरं युद्धान्तरं, न आप प्राप, एकस्मिन्नेव युद्धे रिपूणां नाशादिति भावः, ("मृध-मास्कन्दनं सङ्ग्रामः"। "लक्ष्यं लक्षं शरव्यं च" इति वैजयन्त्यमरः)। शेषोऽत्र। स्रग्धरा छन्दः, "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्।"

यत्र यस्मिन्, चतुरुदधिमेखलाया भुवो नायके राजनीतिचतुरे राजनि वसुमतीं पृथिवीं, शासति सति। परिसङ्ख्याह। पितृकार्य्ये हृषस्य नीलस्य अन्यस्य वा, उद्वाहपूर्वकस्त्यागः, हृषो धर्मस्य, एवकारः सर्वत्र योज्यः। यद्यपि पदार्थान्तरेष्वपि परिसङ्ख्योपपद्यते, तथापि वसन्ततिलकस्यैव गतिरिति ध्वनयितुम-सङ्कुचस्य पितृकार्य्यस्य वर्णनमिति भावः। शशिन एव कन्या तुला च राशिः, तस्या-

दक्षिणवामकरणं दिङ्निश्चये, शरभेदो दधिषु, शृङ्खलाबन्धो वर्णग्रथनासु, उत्प्रेक्षाऽऽक्षेपः काव्यालङ्कारेषु, लक्षदानच्युतिः सायकानां क्षिप्तां सर्वविनाशः, कोशसङ्कोचः कमलाकरेषु, जातिहीनता दुष्कुलेषु न पुष्पमालासु, शृङ्गारहानिर्जरत्करिषु न जनेषु, दुर्वर्णयोगः कटकादिषु न कामिनीकान्तिषु, गान्धारविच्छेदो रागेषु न पौरवनितासु, खर्भाभावो नीचसेवकेषु न परिजनेषु,

---

सारोद्यं, तुषारोद्वयोग्यस्यालक्ष्मीपराधिनोऽभावादिति भावः। योगे विघ्नाद्यियोगी एव, शूलव्याघातो योगविशेषो, तयीश्चिन्ता, न तु शूलेन व्याघातलाडनं, तस्य चिन्ता। करिजघोलेषु एव दानस्य मदस्य, विच्छेदः, न तु वितरणस्य विच्छेदः दिङ्निश्चये एव दक्षिणवामकरणम् अन्यादयं दक्षिणोऽन्यं वाम इति, दक्षिणवामौ हस्तौ पादौ कर्णौ वा, तयोः करणं छेदनं, [कृञ् हिंसायाम। बाहुलकादौ ल्युट्]। दधिष्वेव शरभेदः शरस्य दध्यवभागस्य, भेदो नाशः, न तु शरेषांभेदः। वर्णग्रथनास्वेव काव्यप्रबन्धवस्तुविशेषेष्वेव, शृङ्खलाबन्धः, न तु शृङ्खलया पादबन्धेन, बन्धः। काव्यालङ्कारेष्वेवोत्प्रेक्षाऽऽक्षेपः उत्प्रेक्षाऽऽक्षेपावलङ्कारौ, तदयुक्तः शब्दो लक्ष्यते श्लेषवचनोपपत्तेः; उत्प्रेक्षा अनवधानं, तया आक्षेपो निन्दा, अतोऽत्रैव नास्ति, ("उत्प्रेक्षाऽनवधानेऽपि काव्यालङ्कारयोरपि च" इति विश्वः। "अवर्णोक्षेपनिर्वादपरीवादापवादवत्" इत्यमरः)। सायकानामेव लक्षस्य दानं लक्षणं, तस्य च्युतिः, न तु लक्षदानस्य वितरणस्य, च्युतिः। क्षिप्तामेव सर्वविनाशः सर्वनाशः, [व्यत्ययमिप्रायेण बहुवचनम्] न तु सर्वेषां बाणानां पक्षिणां, नाशः। कमलाकरेष्वेव कोशस्य कुड्मलस्य, सङ्कोचः, न तु कोशस्य सङ्कीर्णधनस्य, सङ्कोचः दुष्कुलेष्वेव जात्या सामान्येन, हीनता, न पुष्पमालासु, तत्र जातीनां सत्कुसुमानां, सत्त्वात्, ("जातिर्जातं च सामान्यम्" इत्यमरः)। जरत्करिष्वेव शृङ्गारहानिर्मण्डनहानिः, न तु जनेषु शृङ्गारस्य रसस्य, हानिः, ("रसे वाक्ये च शृङ्गारः करिमण्डन एव च" इति विश्वः)। कटकादिष्वेवाभरणेष्वेव, दुर्वर्णस्य रजतस्य, योगः, न तु कामिनीकान्तिषु कुत्सितवर्णयोगः, ("दुर्वर्णे रजतं कथम्" इत्यमरः)। रागेष्वेव गान्धारस्य स्वरस्य, विच्छेदः, न तु पौरवनितासु गान्धारं सिन्दूरं, तस्य छेदः, एतेन न काप्येतद्राज्ये विधवेति ध्वनितम्; ("सिन्दूरं गान्धारं—" इत्यमरः। "गान्धारं रक्तचूर्णे च सिन्दूरं रक्तवालुकम्" इति हारावली)। नीचसेवकेष्वेव

मलिनाम्बरत्वं निशासु न जनेषु, चलरागता गीतेषु न विदग्धेषु, हृषद्दानिर्निधुवनलीलासु न पौरुषे, भङ्गुरत्वं रागविकृतिषु न चित्तेषु, अनङ्गता कामदेवे न परिजने, मारागमो यौवनोदयेषु न प्रकृतिषु, द्विजाघातः सुरतेषु न प्रजासु, रसनाबन्धो रतिकलहेषु न दानानुमतिषु, अधररागिता तरुणीषु न परिजनेषु, कर्त्तनमलकेषु न पुरन्ध्रीषु, निस्त्रिंशत्वमसीनां न पुरुषाणां, करवालनाशो योधानां परं व्यवस्थितः।

यस्य च महिषी दिग्गजकपोलमदलेखेवानन्दितालिगणा,

खर्मस्य परम्परागुद्धेः, अभावः, न तु परिजनेषु खर्मस्य वस्त्रभेदस्य पौरुषस्य वा, अभावः, ("खर्मः परम्परागुद्धौ वस्त्रभेदेऽपि पौरुषे" इति धरणिः)। निशास्वेव मलिनाम्बरत्वं, न जनेषु, अम्बरं वस्त्रमाकाशस्य। गीतेष्वेव गानेष्वेव, चलरागता, न विदग्धेषु, रागो मालवादिरनुरागस्य। निधुवनलीलास्वेव हृषस्य शुक्रस्य, हानिः, न पौरुषे हृषस्य धर्मस्य, हानिः, ("ज्येष्ठाऽस्त्रधर्मशुक्रेषु स्मृतोऽसौ हृषभे हृषः" इत्युत्पलिनी)। रागविकृतिष्वेव भङ्गुरत्वं, न चित्तेषु भङ्गुरत्वं कुटिलत्वम। कामदेवे एवानङ्गता अशरीरत्वं, न परिजनेऽनङ्गता असम्बन्धिता। यौवनोदयेषु एव मारस्य कामस्य, उदयः, न प्रकृतिषु मारस्य मारणस्य, उदयः, [मृङ् प्राणत्यागे। भावे घञ्]। सुरतेष्वेव द्विजैर्दन्तैः, आघातः, न तु प्रजासु राज्याङ्गेषु प्रजासु, द्विजानां ब्राह्मणानां पक्षिणां वा, घातः। रतिकलहेष्वेव रसनायाः काञ्च्याः, बन्धः, न दानानुमतिषु रसनायां जिह्वायां, बन्धो जडता, ("स्त्रीकट्यां मेखला काञ्ची सप्तकी रसना तथा"। "रसज्ञा रसना जिह्वा" इत्यमरभरतौ)। तरुणीष्वेवाधरस्याधरोष्ठस्य, रागिता, न परिजनेष्वधरे नीचे, अनुरागिता। अलकेष्वेव कर्त्तनं छेदनं, न पुरन्ध्रीषु स्त्रीषु, सूनोत्पादनं, ("दारा: स्यात् तु कुटुम्बिनी। पुरन्ध्री" इत्यमरः। "कर्त्तनं च द्वयोश्छेदे नारीणां सूतनिर्मतौ" इति विश्वः)। असीनामेव खड्गानामेव, निस्त्रिंशत्वं निर्गतास्त्रिंशद्भ्योऽङ्गुलिभ्यो निस्त्रिंशस्तस्य भावः, ["षड्भ्यो लुक्" इति टच्] न पुरुषाणां निस्त्रिंशत्वं क्रूरत्वं निष्कृपत्वं वा, ("निस्त्रिंशोऽथ निस्त्रिंशः क्रूरे खड्गेऽपि वैधवे" इत्युत्तरत्रम)। योधानामेव परं केवलं, करवालेन खड्गेन, नाशो व्यवस्थितः, नान्यत्र क्रूरत्व राजभागस्य दृढत्व वा, नाशो नाशनं शिथिलनं क्षीणता वा, नाशः।

पार्वतीव सुकुमारा, सर्वान्तःपुरप्रधानभूताऽनङ्गवती नाम। तयोश्च मध्यमोपान्ते वयसि वर्त्तमानयोः कथमपि दैववशात् त्रिभुवनविलोभनीयाकृतिः, पुलोमतनयेवानन्दितसहस्रनेत्रा, तनया वासवदत्ता नाम बभूव। अथ सा रावणभुजोल्लासितगोत्रा, परिणामसुपयात्यपि यौवनभरे परिणयपराङ्मुखी तस्थौ।

एकदा तु विजृम्भमाणसहकारकोरकनिकुरम्बनिपतितमधुकरमालामदकलझङ्कारजनितपथिकजनमञ्जरः, कोमलमलय-मारुतोद्भूत-चूतप्रसवरसास्वाद-कषायकण्ठ कलकण्ठकुहू-कृतभरितसकलदिङ्मुखः, विकचकमलखण्डलीयमानमत्तकलहंसकुलकोलाहलमुखरितसकलसरोवरः, परभृतनखकोटिपाटितपाटलिकुड्मल-वृन्तविवरविनिर्गतमधुधारासारशीकरकणनिकरसमालम्ब-दक्षिण-समीरणबाणव्रणितपथिकजनबधूहृदयः,

---

यस्य अङ्गारशेखरस्य, महिष्यनङ्गवती नामेति प्रसिद्धावित्यन्वयः। दिग्गजकपोलमदलेखेवानन्दितोऽलीनां, पक्षे—आलीनां सखीनां, गणो यया सा, पार्वतीव शोभनः कुमारः कार्त्तिकेयो यस्याः, पक्षे—सुकुमारा अतिमृदुला, सर्वेष्वन्तःपुरेषु प्रधानभूता, ("प्रधानं क्लीवमेकस्मिन् प्रधानस्तूत्तमे पुमान्" इति मेदिनी)। तयोरनङ्गवतीशृङ्गारशेखरयोः। कथमपि यत्नेन। यत्नस्यापि स्वतोऽप्रभुत्वादाह, दैववशात्, त्रिभुवने विलोभनीयाकृतिरभिलषणीयाकृतिः, अत एव पुलोमतनयेव शचीव, आनन्दितः सहस्रनेत्र इन्द्रो यया सा, पक्षे—आनन्दितं सहस्राणां नेत्रं यया सा, वासवदत्ता नाम तनया बभूव। अथ सा वासवदत्ता, रावणभुजेनोल्लासितो गोत्रः पर्वतः, पक्षे—गोत्रं कुलं यया सा। ("दोर्दोषा च भुजा भुजे" इति मेदिनी)। परिणामसुपयात्यपि यौवनभरे परिणयपराङ्मुखी तस्थौ।

एकदा वसन्तकाल आगतोऽन्वयः। विजृम्भमाण इति।—झङ्कारः शब्दविशेषः। कोमलेति—कषायः सुरभिः, कण्ठः स्वरो यस्य, ("द्रवेऽङ्गरागे सुरभौ रसे वर्णे कषायः" इति विश्वः)। "सुरभिः स्यान्मनोज्ञेऽपि" इति रत्नकोशः। "कण्ठो यत्ने ऽन्तिकाने ध्वनौ मदनपादपे" इति विश्वप्रकाशः) कलकण्ठः कोकिलः, ("तामाचः कोकिलः पिकः कलकण्ठः काकपुष्टः" इति हेमः) कुहूरुतं भरितं पूरितम्। विकचेति। परभृतेति।—कोटिरग्रम्। शीकरा बिन्दवः, ("शीकरोऽम्बु-

मधुमदमुदितकामिनीगण्डूषसीधुसेकपुलकितबकुलः, मदनरस-परवशविलासिनीतुलाकोटिविकट-चटुलचरणारविन्दमन्दप्रहार-प्रहृष्ट-कङ्केलितरुगतः, प्रतिदिशमश्लीलप्रायगीयमानगीतश्रवणो-त्सुक-षिङ्गजन-प्रारब्धचर्चरीगीताकर्णनमुह्यमानानेकपथिकगतः, दुर्जन इव सतामरमः, दुष्कुल इव जातिहीनः, रावण इवापीत-लोहितपलाशगतसेवितः, महाशृङ्गारीव सुगन्धवहः, सुराजेव समृद्धकुवलयः, वास्तविक इव विवर्द्धितसुखाशः, सत्कविकाव्य-बन्ध इवाबद्धतुहिनः, सत्पुरुष इव दोषानुबन्धरहितः, कैवर्त्त

ख्याः ख्ताः" इत्यमरः) समालब्धो मिलितः। व्रतितं सञ्जातम। मधुमदेति—नवाङ्कुरोद्गमेन सपुलक इवाचरित इति भावः, तथा चोक्तं—"पादाहतः प्रमदया विकसत्यशोकः शोकं जहाति बकुलो मुखसीधुसिक्तः" इति। तुलाकोटिर्मञ्जीरं, तेन विकटं विरहिण्यां चटुलं चञ्चलं, यच्चरणारविन्दम। प्रतिदिशमिति [बीप्सायाम-व्ययीभावः। प्रारब्दादिलाटच्] अश्लीलप्रायं ग्राम्यप्रायम। चर्चरी "चाचर" इति भाषायां प्रसिद्धम। दुर्जन इव सतां साधूनाम, अरमोऽप्रीतिजनकः; पक्षे—तामरसेन कमलेन सहितः सतामरसः, ("पङ्केरुहं तामरसम्" इत्यमरः)। दुष्कुल इव जातिः सामान्यं, तेन हीनः, ("जातिर्जातं च सामान्यम्" इत्यमरः) पक्षे—जाति-मालती, ("सुमना मालती जातिः" इत्यमरः)। रावण इवापीतं लोहितं रुधिरं येनादृशे:, पलाशगतेः रक्षसां गतेः, सेवितः, ("रुधिरेऽसृग्लोहितास्र-रक्तक्षतजशोणितम्" इत्यमरः। हरिद्रौ राक्षसश्च पलाशस्फूर्जनः स्मृतः" इति हैमः) पक्षे—आपीतैरीषत्पीतवर्णैः, लोहितैः रक्तैः, पलाशगणैः पलाशवृक्षगणैः, सेवितः, ("रोहितो लोहितो रक्तः" इत्यमरः)। शृङ्गारीव सुगन्धं सुगन्धद्रव्यं, वहति ताद्दशः; पक्षे—शोभनो गन्धवहो वायुर्यस्मिन् सः, ("पृषदश्वो गन्धवहो गन्ध-वाहानिलाशुगाः" इत्यमरः)। सुराजेव ["न पूजनात" इति निषेधान्न टच्] समृद्धः कुवलयो भूमण्डलो यस्मात; पक्षे—समृद्धानि कुवलयानि यस्मिन्। वास्तविक इव तात्त्विकपदार्थ इव, विवर्द्धिता सुखाशा येन ताद्दशः; पक्षे—वि अरदपेक्षया विशेषेण, वर्द्धितः सुखाशो राजतिमिषः, केचित् तु वास्तविको वाटिकापाल इत्याहुः, ("सुखाशो राजतिमिषः शोभनाशाप्रचेतसोः" इति विश्वः)। सत्कविकाव्यबन्ध इवाबद्धतुहिनः, तु हि नाबध्यानि यत्र ताद्दशः; पक्षे—तुहिनं हिमम्,

इवावद्धराजीवोत्पलमालः, समृद्धकासारशकुनिसार्थ इव निन्दितमरुवकः, शक्र इवेन्द्राणीरुचिः, महावीर इवाधरीकृतदमनकः, पिङ्ग इवाल्लानसुभगः वसन्तकाल आजगाम।

अतिदूरप्रवृद्धेन मधुना जगति को वा न विक्रियते? यदतिमुक्तको मुनिरपि विचकास। कुसुमशरस्य नवचूतप्रसवशरमूलनिलीना मधुकरालो यत्नेनैव रेजे। हन्तविनिर्गत-

---

सत्पुरुष इव दोषस्यानुबन्धेन रहितः; पक्षे—दोषा रात्रिः, तदनुबन्धेन रहितः, रात्रिस्वाभाव्यात्। तदपचयपातितेति भावः। "नीले मेघे वसन्तः स्यात्"। नीलरात्रिस्तूर्ययस्य नवांशोत्तरं दिनमानं—१०।३। रात्रिमानं—२८।५७ इति प्रसिद्धं ज्योतिषे। कैवर्त्त इव दाश इव, आवद्धाः राजीवोत्पलमालाः सत्स्यभेदाः येन सः, ("राजीवाख्या मत्स्ये सत्स्ये पद्मे राजोपजीविनि" इति विश्वप्रकाशः। "कैवर्त्तो दाशधीवरौ।" "रोहितो मद्गुरः प्रालो राजीवः शकुलस्त्रिभिः" इति द्वयोरप्यमरः) पक्षे—राजीवं पद्मम्, उत्पलं कुवलयं, मालाः दधाः, ("स्यादुत्पलं कुवलयम्" इत्यमरः। "प्रालः पादपमात्रे स्यात् प्राकारे शकुलद्रुमे" इति विश्वप्रकाशः)। समृद्धकासारस्तम्बस्थो शकुनिसार्थः पक्षिसमूहः, ("कासारः सरसी सरः"। "शकुन्तिपक्षिशकुनि"। "तमीरखौ मरुवकः" इति त्रिकाण्डशेषः) "मरुवा" इति लोके, यद्वा—मरुवकः पिङ्गीतकः, "मेनफल" इति लोके, ("पिङ्गीतको मरुवकः त्रसनः करहाटकः" इत्यमरः) पक्षे—मरुवको मरुद्देशस्थो वकः। शक्र इवेन्द्राणी शची, तस्यां रुचिरभिलाषो यस्य तादृशः; पक्षे—इन्द्राणी निर्गुण्डी, "मेउडी" इति ख्याता लोके, ("सिन्दुवारेन्द्रसुरसौ निर्गुण्डीन्द्राणिकेत्यपि" इत्यमरः)। वसन्तप्रकरणे एव दमनकस्योपवर्णनान्महावीर इवेति प्रचितः पाठः। पिङ्ग इव पिट इव, अल्लानसुभगः; पक्षे—अल्लानैर्मण्डासङ्घाभिः, "कउसरेया" इति ख्याता, सुभगः, ("अल्लानस्तु मण्डासङ्घा" इत्यमरः)।

अतिदूरप्रवृद्धेन मधुना वसन्तेन मद्येन वा, जगति को न विक्रियते? [कर्मणि षष्ठ्]। अतिमुक्तको मुनिरपीति स्वष्टम्; पक्षे—अतिमुक्तकः पुष्पद्रुमः, मुनिरगस्त्यः, विचकास। उत्प्रेक्षया आह, कुसुमशरस्येति।—("शरावां पत्ररचना अल्लावा परिकीर्त्तिता" इति शारावली। "अल्लं स्यात्पिठरमने वस्त्रे रचितेऽपि च" इति विश्वप्रकाशः) श्रेष्ठं स्वष्टम्। हन्तेति।—हन्तात् प्रसवबन्धनात्,

विचकिलकलिकातले मञ्जु गुञ्जन् मधुकरो मकरकेतोस्त्रिभुवन-विजयप्रयाणपटहध्वनिमिव चकार। नवयावकपङ्कपल्लवित-सनूपुरतरुणीचरणप्रहारानुरागवशान्नवकिसलयच्छलेन तमिव रागमुदवहदशोकः। मधुरमधुपरिपूरितकामिनीमुखकमल-गण्डूषसेकादिव तद्रसमात्मकुसुमेषु बिभ्रद्बकुलतरू रराज। अन्तराऽन्तरा निपतितमधुकरनिकरकिर्मीरितः कङ्केलिगुच्छो-ऽङ्गनिर्वाणमनोभवचिताचक्रानुकारी पथिकजनहृदयदाह-मुवाह। विकचविचकिलराजिरलिकुलपटलेन्द्रनीलमणिमयी मुक्तावलीव मधुश्रियो रुरुचे। विरहिणां हृदयमथनाय कुसुम-शरस्य चक्रमिव नागकेसरकुसुममशोभत। पथिकजनहृदय-मल्यं ग्रहीतुं मकरकेतोः पलाव इव पाटलिपुष्पमदृश्यत। कन्दर्पकेलिसम्पल्लम्पट-लाटीललाटतट-धम्मिल्लमलनमिलितपरि-मलसमृद्धमधुरिमगुणः, कामकलाकलापकुशलचारुकर्णाट-

---

विनिर्गतानां विचकिलानां मल्लिभेदानां, कलिकातले मञ्जु गुञ्जन् मधुकरो मधुव्रतः, मकरकेतोस्त्रिभुवनविजयप्रयाणपटहध्वनिमिव चकार ("स्युतौ विचकिलौ मल्ली-प्रभेदे मदनेऽपि च" इति विश्वप्रकाशः)। अशोको नवयावकपङ्केन नवलाक्षारसेन, पल्लवितं रक्तं, सनूपुरं समञ्जीरं, तरुणीचरणं तस्य प्रहारस्तदनुरागवशान्नवकिसलय-च्छलेन तं रागमिवोदवहत्, ("भवेत् पल्लवितं लाक्षा-रक्ते सप्रसवे तते" इति विश्वप्रकाशः) बकुलतरवस्तुना मद्येन, परिपूरितं यत् कामिनीमुखकमलं तस्य गण्डूषसेकात् तद्रसमात्मकुसुमेषु बिभ्रदिव रराज, [तरु रराजेत्यत्र "रोरि" इति स्त्रीपे "दृक्षोपः" इति ह्रस्वः]। अन्तरा निपतितो मधुकरैः किर्मीरितश्चित्रः, कङ्केलिगुच्छोऽशोकगुच्छः, अङ्गनिर्वाणमङ्गोपशान्तं, यन्मनोभवचिताचक्रं तदनुकारी विरहिणां हृदयदाहं मनसापम, उवाह [वह प्रापणे] ("निर्वाणमस्वङ्गमनम्" इति विश्वः)। अलिकुलपटलेन विकचविचकिलराजिर्मधुश्रिय इन्द्रनीलमणिमयी मुक्तावलीव रुरुचे। विरहिणामिति स्पष्टम्। पथिकजनहृदयमल्यं ग्रहीतुं कुसुमकेतोः पलाव इव पलेन मांसेन, अवति मल्यानां वृद्धिं जनयति इति वा पलावी वणिग्, तद्वत् पाटलिपुष्पमदृश्यत, सदारैरिति शेषः, ("पाटलिः पाटला

सुन्दरीस्तनकलशघुसृणधूलिपरिमलामोदवाही, करणरणित-कान्त-कुन्तलीकुन्तलोल्लासनसङ्क्रान्त-परिमल-मिलितालिमाला-मधुरतरझङ्काररवमुखरितनभस्तलः, नवयौवनरागतरलकेरली-कपोलपालिपत्रावली-परिचयचतुरः, चतुःषष्टिकलाकलाप-विदग्धमुग्धमालव-नितम्बिनी-नितम्बविम्ब-संवाहनकुशलः, सुरत-श्रमपरवशाम्भोनीरन्ध्र-पीनपयोधर-भारनिदाघ-जलकणनिकर-शिशिरितः मलयानिलो ववौ ।

अत्रान्तरे वासवदत्तासखीजनादिदिताभिप्रायः शृङ्गार-शेखरः स्वसुतायाः स्वयंवरार्थमशेषधरणितलभाजां राज्ञा-मेकत्र सङ्गममकरोत् । ततो दग्धकृष्णागुरुपरिमलामोद-

---

मोघा" इत्यमरः) "पाडला" इति लोके । वाग्वीः शृङ्गारितां पुरस्कृत्य तत्तद्देशाङ्गनाभिः सह सम्भोगमनुप्राप्तेनाङ्ग । मलयानिलो ववाविति सम्बन्धः । कन्दर्पकेलिसम्पत् कामक्रीडासम्पत्तिः, तस्यां लम्पटाः सक्ताः, लाट्यो लाटदेशस्त्रियः, तासां ललाटतटः, धम्मिल्लः संयताः केशाः, तयोर्मर्दनेन मिलितः परिमलो जन-मनोहरो गन्धः, तेन समृद्धमधुरिमगुणः, ("धम्मिल्लः संयताः कचाः" इत्यमरः)। कामकलाकलापे कुशलाः प्रवीणाः, याः कर्णाटसुन्दर्यस्तद्देशाङ्गनाः, तासां स्तन-कलशेषु घुसृणं कुङ्कुमपरिमलसदामोदोऽतिनिष्ठुरो गन्धः, तद्वाही; स्तनस्पर्शी ध्वनिरत्र; ("कुङ्कुमं पीतकावेरं घुसृणं कुसुमाल्लकम्" इति द्वारावली। "आमोदः सोऽतिनिष्ठुरी" इत्यमरः)। करणेषु गीताङ्गहारसंवेशक्रियादिषु, रचिकाः कान्ताः कुन्तल्यः कुन्तलदेशाङ्गनाः, तासां कुन्तलानां केशानाम्, उल्लासनेन सङ्क्रान्तपरिमलेन मिलितालिमाला भ्रमरपङ्क्तयः, तासां मधुरतरझङ्कारे रवैर्मुख-रितनभस्तलः; अनेन क्रियमाणं सूचितं च ध्वनितम्; ("करणं साधने चेष्टे कार्यकारणयज्ञकर्मसु। गीताङ्गहारसंवेश-क्रियाभेदेन्द्रियेषु च॥ वात्सवादौ च करणः सुतः शूद्राविशोः सुते॥" इति विश्वप्रकाशः)। नवयौवनरागतरलकेर-लीनां कपोलपालिपत्रावलीपरिचये सम्बन्धे चतुरः; अत्र परिचयेन निर्माणमपि ध्वनितम्। नितम्बसंवाहनं तत्स्पर्शोऽपि व्यष्टत्।

अत्रान्तरे वासवदत्तायाः सखीजनादिदिताभिप्रायः शृङ्गारशेखरः स्वसुतायाः वासवदत्तायाः, स्वयंवरार्थं सकलधरणीनां सङ्गममकरोत्। ततो भुक्तुं भुक्तेषु

मोद्दितमधुव्रतव्रातबहलगुमगुमायितमुखरितम्, अतिरभस-हासच्छटादीधितिधवलिमपरिमिलितम्, अनेकपरिहासकथा-कलापविदग्धशुङ्गारिजनसमाकुलं, दह्यमानसुगन्धिसौरभाकृष्ट-पुरोपवनषट्पदकुलसमाकुलम्, अर्जुनसमरमिव नन्दिघोष-मुखरितदिगन्तरं मञ्चमारुरोह वासवदत्ता।

तत्र च केचित् कलाङ्कुरा इव विजितनगरमण्डनाः, अपरे पाण्डवा इव दिव्यचक्षुःकृष्णागुरुपरिमिलिताः, अन्ये

लोत्तरं, वासवदत्ता मञ्चमारुरोहेत्यन्वयः। दग्धः कृष्णागुरुः कालागुरुः, तदा-मोदमोदितमधुव्रततातानां बहलगुमगुमायितेन प्रचुरान्यक्तशब्देन, मुखरितम्। अतिरभसेति। चेटीनामित्यादिरत्र। अनेकेषां भूपतीनां परिहासः कुलवयो-रूपगुणहीनत्वेन परिहासः, कथाकलापः योग्यानां वंशादिवर्णनसमुदायः, तत्र विदग्धचतुरशब्दः, यः शृङ्गारिजनो लोकः, नायिकानायकरसभावाभिज्ञः सखीरूपः, तेन समाकुलं व्याप्तं, ("जनो लोके सङ्कीर्णात् परलोके च पामरे" इति विश्व-प्रकाशः) "अपोद्धाचित्रतोल्लासी भिन्नोष्टः स सङ्कटनाम्। विदीर्णोज्ज्वल मध्या-नामवमानां समुद्भवः॥ सङ्कटः" इति वाग्भटालङ्कारः। तथा च कालिदासः, —"ततो नृपाणां श्रुतवृत्तबंशा" इति; यद्वा—अनेकपरिहासकथाकलापे ययोः परस्परानुरागानन्तरमनेकपरिहासकथाकलापे, विदग्ध.। शेषं पूर्ववत्। तथा च कालिदासः,—"तवागतायां परिहासपूर्वं सख्यां सखी वेवधरा बभाषे। आर्ये! प्रजानीऽन्वत इत्यथैनां मधूरभूयाकुटिलं ददर्श॥" इति। दह्यमानेति पूर्व-विशेषणेन मतार्थम्; अर्जुनसमरमिव नन्दिघोषेण तदभिधानेन रथेन, मुखरित-दिगन्तरम्; तदुक्तं—"गाण्डीवं धनुरेतस्य कृष्णस्तस्य महात्मनः। नन्दिघोषो रथश्चास्य गतिश्चस्य न भूतले॥" इति; पक्षे—नन्दिरानन्दः, घोषस्तूर्यादिशब्दः, तेन मुखरितदिगन्तरं, ("नन्दिरानन्दने प्रोक्तः प्रतीहारे हरस्य च" इति विश्व-प्रकाशः) यद्वा—नन्दिनोऽतिशयेनोच्चस्य इत्यर्थः, तेषां घोषेणेति पूर्ववत्, ("नन्दिरा-नन्दनानाढ्य-निनदीरपि चेष्यते" इत्युत्तरत्रत्यम्)।

तत्र तेषु, केचित् कलाङ्कुरा इव मूलदेवा इव, विजितनगरमण्डना विजिततदभि-धानवेश्याः, कलाङ्कुरैव कामशास्त्रकलाऽभिज्ञतया नगरमण्डना वेश्या जितेति वार्ता; ("वर्षाभूर्ती मूलदेवो मूलभद्रः कलाङ्कुरः" इति शारावली) विजितं नगरस्य

गरहिवसा इव सुदूरप्रहृष्टसुखाशाः, इतरे व्याहर्तुमुद्यता इव स्खलनार्थिनः, केचिद्व्याधा इव शकुनश्रावकाः, केचिदाखेटका इव रूपानुसारप्रवृत्ताः, केचिज्जैमिनिमतानुसारिण इव तथागतमतध्वंसिनः, केचित् स्खलना इव सांवत्सरफलदर्शिनः, केचित् सुमेरुपरिसरा इव कान्तस्मरमयाः, केचित् विकच-

---

मण्डनं भूषणं येषां, सर्वोत्कृष्टभूषणधारणादिति भावः; पक्षे—विना गवर्षेण, जितं नगरं बाणपुरं, तस्य मण्डनाः, बाणासुरतुल्याः, राक्षसा इवेत्युपहासोऽपि। अपरे पाण्डवा इव दिव्यचक्षुः कृष्णः, कृष्णा द्रौपदी, गुरवो द्रोणादयो द्रौपदीगुरवो वा, तैर्मिलिताः; पक्षे—दिव्यचक्षुषः सुलोचनाश्च, ते कृष्णागुरुपरिमिलिताश्च कालागुरुधूपधूपायितसर्वाङ्गाश्च; पक्षे—दिव्यचक्षुषोऽन्धाः, कृष्णाः श्यामवर्णाः, अगुरुपरिमिलिता इवरहितवरहिता इत्युपहासः। ("दिव्यचक्षुः सुनयने कृष्णेऽन्धे सिन्धकेऽपि च" इति धरणिः। "विदुः परिमलं गन्धे रक्षणेऽपि च" इति विश्वः)। अन्ये गरहिवसा इव सुदूरं प्रहृष्टाः सुखाशा राजतिमिषा यैस्ते, सुखाशानां वसन्ते हर्षेरिति भावः; पक्षे—सुदूरं प्रहृष्टा सुखस्य वासवदत्तारतिमहोत्सवस्य, आशा येषां ते; पक्षे—सुदूरं प्रहृष्टा सुष्ठु खलिवाक्यमिव, आशा येषां ते, दुश्चिताक्षिप्तैर्यत्नादिति भाव इत्युपहासः। अपरे व्याहर्तुं परान् वक्तुम्, उद्यता इव स्खलनार्थिनः स्खलन्त्यार्थिनः; पक्षे—सुष्ठु शोभना, अवला वासवदत्ता, तदर्थिनः; स्खलं बलं पराक्रमम्, अर्थयन्ते वैद्यादिभ्यस्ते इत्युपहासः। केचिदाखेटो मृगया, तदासक्ता रूपस्यानुसरणे प्रवृत्ताः। केचिज्जैमिनिमतानुसारिणो मीमांसानुसारिणः, ते इव तथागतानां नास्तिकानां, मतध्वंसिनः; ("सर्वज्ञः सुगतो बुद्धो धर्मराजस्तथागतः" इत्यमरः) पक्षे—तथाऽऽगतानां यथा स्वगेहे स्थितास्तथाऽऽगतानां, न तु सभोचितवस्त्रभूषणधारिणां सौन्दर्योन्मिषितानुषां, मतं "किमिव हि मधुराणां मण्डनं नाकृतीनाम्" इत्येवंरूपं, तद्विलसन्निन्दकाः; पक्षे—तथाऽऽगतं कुलपरम्परोचितं, मतं शैवादिमतं, तद्विलासिनो लाञ्छकाः, आचारहीनतात्योपहासबीजम्; तथा च शौचर्षः,—"जनः खिलाचारमुखं विगायति" इति। केचित् स्खलना इव सांवत्सरो ज्योतिषिकः, तद्वत् फलदर्शिनः, यथा ज्योतिषिको निम्बादिफले मिथ्यारूपफलं दर्शयति, एवं स्खलना अपि सुरतादिना निम्बादिफलं दर्शयन्तीत्यर्थः; पक्षे—सांवत्सरं फलं वर्षफलं, दर्शयन्ति स्त्रीपुंसादिलाभार्थं ताडयन्ति, ("सांवत्सरो ज्योतिषिकः" इत्यमरः) "दीपादन्यत्रादपि मध्यादपि जघनभेदिनीऽप्यन्तात्।

कुमुदाकरा इव भास्वद्दर्शननिमीलिताः, केचिद्वार्त्तराष्ट्रा इव विश्वरूपावलोकनजनितेन्द्रजालप्रत्ययाः, केचिदात्मनि वारणबुद्ध्या बलवन्तोऽपि सुवाहाः, केचित् पाणिग्रहणार्थिनोऽप्यसुकरं मन्यमानाः, केचिदधरीभूता अपि स्थिराः, केचित्

आनीय झटिति घटयति विधिरभिमतमभिमुखीभूतः॥" इति नियमरहितत्वेनाधीरत्वं व्यङ्ग्यमुपक्षाखबीजम्। केचित् सुमेरुपरिसरा इव प्रान्तभूमय इव, कार्त्तस्वरं सुवर्णं, तन्मयाः; पक्षे—कार्त्तस्वरमयाः सुवर्णमयाः; पक्षे—का दुष्टम्, कार्त्तस्वरमया वा, ("रुक्मं कार्त्तस्वरं जाम्बूनदम्" इत्यमरः) कृष्णतोपक्षासबीजम्। केचिद्दिवसकुमुदाकरा इव भास्वद्दर्शनेन सूर्य्यदर्शनेन, निमीलिताः सङ्कुचिताः, कुमुदानां सङ्कोचस्तदाप्यये सत्या: क्रोशन्तीतिवदुपचारात्, ("भास्वदिवसत्यमाम्र—" इत्यमरः) पक्षे—भास्वतोऽतितेजोयुतस्य जनस्य, दर्शनेन निमीलिता निमीलितनयनाः, वासवदत्तादर्शनादेव येषामयं प्रकारस्तेषामयं का मतिरिति स्पष्ट एवोपक्षासः। केचित् धार्त्तराष्ट्रा इव विश्वरूपस्य क्षणदर्शितविश्वरूपस्य, दर्शनेन जनितेन्द्रजालप्रत्ययाः, अनेन मायाजालमेव कृतमिति धार्त्तराष्ट्राभिप्रायः; पक्षे—विश्वस्य जगतः, रूपं सौन्दर्य्यं यस्यां सा त्रैलोक्यसमवायिसौन्दर्य्यपरमाणुनिर्मिता वासवदत्ता, तस्या दर्शनेन जनितेन्द्रजालप्रत्ययाः, तथा च कन्दर्पकेतुवर्णनप्रस्तावे मूलकार एव स्वयमेव नैषुण्यस्य सौन्दर्य्यस्यादि स्पष्टमेव वक्ष्यति, अतो दृष्टेरभूतपूर्वे सुरूपयोः संयोजनम्, अत एव स्वप्नदर्शनोत्तरं कन्दर्पकेतौ साभिलाषा इच्छेत्यादिनाऽननुरूपभर्तृसङ्गता अत्या निन्दयिष्यति; अतस्तच्चालमत्र व्यङ्ग्यम्। केचिदात्मनि स्वस्मिन्, वारणबुद्ध्या गजबुद्ध्या, बलवन्तोऽपि सबला अपि, सुवाहाः सुखेन वाहो वहनं येषां ताहृशाः, [वह प्रापणे घञ्] यो ह्यतिबलः पुमान् स न पुरुषान्तरेण सुखोद्वहनीय इति विरोधः; पक्षे—शोभना वाहा अश्वा येषां ते, यद्वा—वाहा भुजा येषां ते, ("वाहो बाहुतुरङ्गयोः" इति मान्यतः) पक्षे—सुवाहाः शोभनाश्वजातिपुरुषाः, ते हयजातिपुरुषा इव न यथाकथञ्चिदपि जातित्रयनायिकोपयुक्ता इति दिक्; प्रपञ्चस्तु रतिरहस्यादौ द्रष्टव्यः, अत्रोपक्षासबीजं तत्र एवावधेयम्। पाणिग्रहणार्थिनो वासवदत्तापाणिग्रहणार्थिनः, असुकरं दुष्करं, मन्यमानाः, स्वेच्छासत्वेऽपि स्वयंवराधीनत्वात् तस्य; पक्षे—असुकरमसवः प्राणाः, तत्कारकं प्राणप्रदम्। केचिदधरीभूता अप्यपृथ्वीभूता अपि, स्थिराः; पृथिव्य इति विरोधः; ("विश्वम्भरा स्थिरा। धरा धरित्री" इत्यमरः) पक्षे—अधरीभूता

पाण्डुपुत्रा इवाच्छहृदयाज्ञानकृतत्तमाः, केचिद्दृढकथानुबन्धिनो गुणाढ्याः, केचित् तिर्य्यग्गतयः सुगन्धवाहाः, केचित् कौरवसैनिका इव द्रोणाशासूचकाः, केचित् कुमुदाकरा इवासोढ़शूरभासः स्थिता राजपुत्राः। तानेकैकशः समवलोक्य विरक्तहृदयासौ कुमारिका तस्मात् कर्णवंशादवततार।

हीनतामापादिता अपि, स्थिरा निश्चला इति परिहारः, स्फुटमेवावोपहासबीजं निर्लज्जतारूपम्। केचित् पाण्डुपुत्रा इवाच्छहृदयस्य पाण्डकतत्त्वस्य, अज्ञानाद्धृतत्तमा धृतभूमयः; पक्षे—अक्षाणां वासवदत्तासम्बन्धिनामिन्द्रियाणां, हृदयस्य तत्त्वस्य मनसो वा, अज्ञानेनानवबोधनेन, धृतत्तमा गतभान्तयः, इयमस्मीकरिष्यति न वेति व्याकुलीभूता इति भावः, तरलताऽत्र दोषः। केचित् दृढकथानुबन्धिनो दृढकथाव्ययन्यकर्त्तारः, गुणाढ्यास्तन्नामानः कवयः; [बहुवचनं पूजार्थम्] पक्षे—दृढकथानुबन्धिनो बृहत्कथावक्तारः, गुणाढ्या गुणैः सभ्यादिभिरन्वेष्याः; पक्षे—गुणैर्वागुरादिभिः, आढ्याः, सर्वदा मृगयासक्ततया व्यसनिता दोषः। केचित् तिर्य्यग्गतयः कुटिलमार्गगामिनः, सुगन्धवाहाः सुगन्धधारिणः; पक्षे—तिर्य्यग्गतयो वायवः, वायोस्तिर्य्यग्गमनं वैशेषिकभाष्ये, सुगन्धवाहाः शोभनवायवः। केचित् कौरवसैनिका इव द्रोणाचार्य्यादाशा नयाशा, तत्सूचकाः द्रोणाचार्य्योऽस्मत्सेनापतिरिति नास्माकं पराजय इत्येव परस्परसूचकाः; पक्षे—द्रोणः काकः, तस्मादाशा वासवदत्तासाप्राप्त्याशा, तत्सूचकाः, उक्तं च स्थानस्थितप्रकरणे वसन्तराजे—"इष्टार्थदोऽस्यादिकवाहनस्थस्फुरादिसंस्थस्तदवाप्तिकारी। वध्वागमं जल्पति तोरणस्थो दृष्यार्थदो दृष्यतरुस्थितस्य॥" इत्यादि। ("द्रोणः कपोपतौ क्षण-काके स्यादाढ़केऽपि च" इति विश्वप्रकाशः)। केचित् कुमुदवना इवासोढ़शूरभासोऽसोढ़सूर्य्यकान्तयः; पक्षे—शूरो वीरः, तालव्यादिः शूरशब्दः सूर्य्यवाचकोऽपि, ("शूरस्वाकभटे सूर्य्ये" इति विश्वः। "सुभटे शूरः सूर्य्ये च दान्तस्तेऽपि" इत्यमरविवेकः)। तानेकैकशः समवलोक्य विरक्तहृदया, वर्णितदोषदर्शनात्, असौ कुमारिका कर्णवंशान्नासात्, अवततार, ["सङ्ख्यैकवचनाच्च वीप्सायाम्" इत्यत्र चकारो वीप्सायामित्यस्यानन्तरं द्रष्टव्यः, सङ्ख्यैकवचनाद्वीप्सायां च, चात स्वार्थेऽपि, स च नाभिधानस्वभावादेकशब्दादेव, तेनैकशब्दाद्वीप्सायां प्रत्ययाभावे द्विर्वचनेऽव्ययत्वार्थेकृत्वसुचि पक्षे जातैकैकम इत्येतत्सिद्धिः] ("कर्णवंशो भवेत्कर्ण," इति हारावली)।

अथ तस्यामेव रात्रौ स्वप्ने बालिनमिवाङ्गदोपशोभितं, कुङ्कणकण्ठमिव हारिकण्ठं, कनकमृगमिव रामाकर्षणनिपुणं, जयन्तमिव वचनामृतानन्दितबृहस्पतिं, क्षणमिव कंसहर्षं न कुर्वन्तं, महामेघमिव विलसत्करकम्, आदिकन्दं रूपपादपस्य, आरोहणगिरिं शृङ्गाररत्नस्य, प्रभवगिरिं सुन्दरकथानदीनां, सुरभिमासं वैदग्ध्यसहकारस्य, आदर्शतलं सौजन्यमुखस्य, आदिबीजं विद्यालतानां, स्वयंवरपतिं कीर्त्तेः, सर्वागृहं लक्ष्मी-सरस्वत्योः, आदिगृहं शीलसम्पदां, कोशमिव महासौन्दर्य्यस्य, त्रिभुवनविलोभनीयाकृतिं युवानं ददर्श। स च चिन्तामणि-

---

चन्द्रागतेषु राजकुमारेषु विरागोत्तरं, तस्यामेव तद्विषयसम्बन्धिन्यामेव, रात्रौ स्वप्ने निद्रायां, सा युवानं ददर्शेत्यन्वयः। बालिनमिवाङ्गदेन तन्नामकवानरेण; बालिनमिवेत्यादिसमंराजमाषकाङ्क्षदिलक्षे माधुर्य्यं गुणः; पक्षे—अङ्गदेन केयूरेण। कुङ्कणकण्ठमिव कुङ्क इति कण्ठो ध्वनिरस्य तमिव कोकिलमिव, हारिकण्ठं मनोहर-स्वरम्; पक्षे—हारी हारयुक्तो मनोहरो वा, कण्ठो गलो यस्य तम्। कनक-मृगमिव रामस्य दाशरथेः, आकर्षणनिपुणम्; मारीचनामा राक्षसः कनकमृगो बभूवेति प्रसिद्धं रामायणे; पक्षे—रामाणां स्त्रीणाम्। जयन्तमिवेन्द्रपुत्रमिव, वचनामृतेनानन्दितो बृहस्पतिर्गुरुर्येन तम्; ("बृहस्पतिः सुराचार्यः पुरुहूतः पुरन्दरः"। "जयन्तः पाकशासनिः" इति त्र्यीरत्नकरः) पक्षे—वचनामृतेनानन्दिते बृहान्तौ श्रवणौ श्रोत्रे येन तं, ("श्रुतिः स्त्री श्रवणं श्रवः" इत्यमरः)। क्षणमिव कंसस्य हर्षं न कुर्वन्तं, तदल्पकालादित्यर्थः; पक्षे—कं जलं, न सहर्षं कुर्वन्तम्? अपि तु सवर्षमेव। महामेघमिव विलसत्करकं स्फुरद्वर्षोपलम्; ("वर्षोपलस्तु करका" इत्यमरः) पक्षे—करो हस्त एव करकः [स्वार्थे कः]। रूप-पादपस्य सौन्दर्यतरोः, आदिकन्दम्। शृङ्गाररत्नस्यारोहणगिरिं प्रादुर्भावादिम्। [बृहद् यौगप्रादुर्भावे]। सुन्दरकथानदीनां रम्यकथानदीनां, प्रभवगिरिमुत्पत्ति-गिरिम्। सुरभिवसन्तः, तत्प्रीतिमत्तासहितं वैदग्ध्यसहकारस्य। सौजन्यमेव मुखं तस्यादर्शतलम्। विद्यालतानामादिबीजम्। कीर्त्तेः स्वयंवरपतिम्। लक्ष्मी-सरस्वत्योः सर्वागृहम्; तथा च कालिदासः,—"निसर्गभिन्नास्पदमेकसंस्थमाश्रयं द्वयं श्रीश्च सरस्वती च" इति। शीलसम्पदामादिगृहम्। महासौन्दर्यस्य कोशमिव।

नाम्नो राज्ञस्तनयः कन्दर्पकेतुर्नाम। सा च स्वप्ने एव नामादिकमश्रौषीत्।

(x)अनन्तरमहो! प्रजापते रूपनिर्माणकौशलमिदं, मन्ये स्वयैव नैपुण्यस्य सौन्दर्यदर्शनोत्सुकमनसा कामलभुवा जगत्त्रयसमवायिरूपपरमाणूनादाय विरचितोऽयम्, अन्यथा कथमिवास्य कान्तिविशेष ईदृशो भवति? दृष्ट्वैव दमयन्ती नलस्य कृते वनवासवैशसमवाप। मुधैवेन्दुमती महिष्यप्यजानुरागिणी बभूव। अफलमेव दुष्यन्तस्य कृते शकुन्तला दुर्वाससः शाप-

---

विभुवने विभुवनस्य वा विलोभनीया विलोभनकर्त्री, आकृतिर्यस्य तम्। [कर्तर्यनीयर्]। स इति स्पष्टम्।

अनन्तरं जायदवस्थायाम्, इति बहुविधं भाषमाणा सखीजनेन समं मुमूर्च्छेत्यन्वयः। "प्रथमे लभिलाषः स्याद् द्वितीये चिन्तनं भवेत्। तृतीये तु श्रुतः प्रीत्या चतुर्थे गुणकीर्तनम्॥ उद्वेगः पञ्चमे प्रोक्तो विलापः षष्ठ उच्यते। उन्मादः सप्तमे प्रोक्तो भवेद्व्याधिरथाष्टमे॥ नवमे जडता प्रोक्ता दशमे मरणं भवेत्॥" इति भरतोदिता दशावस्था वर्णयितुर्दशां वर्णयति। अहो! प्रजापते रूपनिर्माणकौशलमिदं मन्ये उत्प्रेक्षे। "मन्ये शङ्के ध्रुवं प्रायो नानिश्चैवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिव शब्दोऽपि तादृशः॥" स्वयैव नैपुण्यस्य प्रज्ञानिर्माणनैपुण्यस्य, सौन्दर्यदर्शनोत्सुकमनसा कामलभुवा ब्रह्मणा, जगत्त्रयसमवायिरूपपरमाणूनादाय निर्मितः। दृष्ट्वैवादि। इन्दुमती भोजराजतनया, अजे तदभिधाने राज्ञि अनुरागिणी दृष्ट्वैव बभूव, अजस्येन्दुमत्यपेक्षया हीनरूपत्वादिति भावः, तथा च कालिदासः,—"कुसुमं वान्त्या वयसा गुणेन गुणेषु तैर्लोचनयप्रधानैः। त्वमात्मनस्तुल्यमनुं वधूत्वे रत्नं समागच्छतु काञ्चनेन॥" इत्यजात्मनस्तुल्यमित्यनेनोपमानकल्पनेनाजा अधिकगुणवत्त्वप्रतिपादनात्, अत एव रत्नं काञ्चनेन समागच्छतीति सङ्गच्छते। कन्दर्पकेतुपेक्षयाऽजादीनां कुरूपत्वमिति तासां तेष्वनुरागो दृष्ट्वेवेति तु अयुक्तमेव। महिष्याः कैरव्याः, अजे छागे, अनुरागो विरोधाभासः, एतन्मूलकोऽपि परिहासः, यद्यप्यजवरवधसमये इन्दुमत्या न महिषीत्वं, ब्रह्मादि वासवदत्तापरिहासदशायां तत्त्वेन न कोऽप्यनुपपत्तिः। अफलमेव

मनुबभूव। निरर्थकं मदनमञ्जरी नरवाहनदत्तं चकमे। निष्कारणमेवोरुयुगविनिर्जितरम्भा रम्भा नलकूबरमचीकमत। विफलमिव धूमोर्णा स्वयंवरार्थागतानेकदेवगणगन्धर्वसहस्रेषु धर्मराजमाचकाङ्क्षदिति बहुविधं चिन्तयन्ती विरहसुमुर्मरमग्निमधिरूढेव, बाडवाग्निशिखाकवलितेव, कालाग्निरुद्रपावकग्रस्तेव, पातालगुहाप्रविष्टेव, शून्यकरणग्रामे हृदये

दुष्प्रलब्ध राज्ञः, ["न लोकाव्यय—" इति निषेधस्तु कारकषष्ठीविषयः] क्लृते तादर्थ्ये, [अव्ययम्] दुर्जनस्य प्रायं यत्किञ्चासत्प्रवृत्तया स जनस्त्वां न अरिष्यतीत्येवं रूपम्, अनुबभूव, ("अर्थे क्लृतेऽव्ययं तावत् तादर्थ्ये वर्त्तते व्ययम्" इति क्षीरसारः) स्पष्टं चैतदभिज्ञानशाकुन्तले—"विचिन्तयन्ती यमनन्यमानसा तपोधनं वेत्सि न मामुपस्थितम्। अरिष्यति त्वां न स बोधितोऽपि सन् कथां प्रमत्तः प्रथमं कृतामिव॥" इति।, मदनमञ्जरी तन्नामिका स्त्री, नरवाहनदत्तं राजर्षिभेदं, निरर्थकमेव चकमे। ऊरुयुगविनिर्जितरम्भा रम्भा स्वर्वेश्या, निष्कारणमेव नलकूबरं कुबेरसूनुम्, अचीकमत, अवाञ्छयत्; तथा च श्रीहर्षः,—"अस्त्यत्रिकुञ्जे श्रीवत्सधामा विधाय रम्भा चिरं भामतुलां नलस्य। तवानुरक्ता तमनाप्य भेजे तन्नामगन्धाद्गलकूबरं सा॥" उत्तमोपभोगिनो नीचे प्रवृत्तिनिन्दाहेतुः; तथा च भर्तृहरिः,—"मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी?" [कमेर्लुङि "कमेर्णिङ्" इति स्वार्थे णिङि "णेरनिटि" इति लोपे "णौ चङि" इत्युपधाह्रस्वे "चङि" इति द्वित्वम्। "सन्वल्लघुनि" इति सन्वद्भावे "सन्यतः" इतीत्वेऽभ्यासस्य "दीर्घो लघोः" इति दीर्घः। अट्] धूमोर्णा स्वयंवरगतानेकदेवगणगन्धर्वसहस्रेषु, ["यस्मा धानादरे" इति चकारादनादरे सप्तमी] तानवाहत्य धर्मराजं पितृपतिं, विफलमेवाचकाङ्क्षत् [काङ्क्षि वाञ्छि माङ्क्षि काङ्क्षायाम्। लुङ्] इति बहुविधं चिन्तयन्ती। विरहसुमुर्मरेत्यादिनाऽग्निमवस्थां वर्णयति। विरहसुधानलमधिरूढेव, ("सुमुर्मरस्तु सुधानलः" इति वैजयन्ती)। बाडवाग्निर्वाडवानलः, तच्छिखा ज्वाला, तया कवलितेव, ("बाडवो वडवानलः"। "वह्नेर्डयोल्वणज्वालौ" इत्युभयत्राप्यमरः)। ज्वालाग्नियों रुद्रपावकः शिवाक्षिकनीनिकजन्मा, तेन ग्रस्तेव। इति विरहदाहमभिप्रायान्तरं वर्णयति। पातालगुहायां प्रविष्टेव। शून्यकरणग्रामं शून्येन्द्रियवर्गं,

लिखितमिव, उत्कीर्णमिव, प्रत्युप्तमिव, कीलितमिव, निगलित-मिव, वज्रलेपघटितमिव, अस्थिपञ्जरप्रविष्टमिव, मर्मा-भ्यन्तरस्थितमिव, मज्जासारगवलितमिव, प्राणपरीतमिव, अन्तरा-त्मानमधिष्ठितमिव, रुधिराश्रयद्रवीभूतमिव, पललसंविभक्त-मिव कन्दर्पकेतुं मन्यमाना उन्मत्तेव, बधिरेव, मूकेव, शून्येव, निरस्तकरणग्रामेव, मूर्च्छांगृहीतेव, ग्रहगृहीतेव, यौवनसागर-तरङ्गपरम्परापरिगतेव, रागरज्जुभिरपवारितेव, कन्दर्पकुसुम-बाणैः कीलितेव, शृङ्गारभावनाविषघूर्णितेव, रूपपरिभावना-शस्त्रक्षिप्तेव, मलयानिलापहृतजीविते, प्रियसखि! अनङ्ग-लेखे! वितर हृदये पाणिपद्मं दुःसहो विरहसन्तापः। मुग्धे! मदनमञ्जरि! सिञ्च चन्दनोदकेन। सरले! वसन्तसेने! संहर्ष कैशपाशम्। तरले! तरङ्गवति! विकिर केतकीधूलिम्। वामे! मदनमालिनि! वीजय शैवलदलेन। चपले! चित्र-लेखे! लिख चित्रे चित्तचौरं जनम्। भाविनि! विलासवति! निक्षिप मुक्ताचूर्णनिकरम्। रागिणि! रागलेखे! स्थगय

यद्धृदयं तत्र लिखितमिव। अन्तरात्मानमधिष्ठितमिवान्तरात्मनि स्थितम्, ["अधि-ष्ठीङ्स्थासां कर्म" इति कर्मसंज्ञा]। पललं मांसं, तेन विभक्तमिव। सप्तमी-मवस्थां दर्शयति, उन्मत्तेव। अष्टमीमवस्थां व्याधिमाह, बधिरेव मूकेव। नवमी-मवस्थां जडतामाह, शून्येवेत्यादि। मदनव्याधिनिराकरणार्थं शिशिरोपचारं वर्णयन् पुनरष्टमीमवस्थां सूचयति। प्रियसखि! अनङ्गलेखे! अनङ्गस्य लेखा यस्यां सा हे दुःसहदुःसहसन्तप्ते! विरहवेदनाऽनभिज्ञतया शिशिरं तदुपचारेषु, हृदये पाणिपद्मं वितर देहि, दुःसहो विरहसन्तापः। मुग्धे! अनभिज्ञे! मदनमञ्जरि! चन्दनोदकेन सिञ्च। सरले! मन्मथविकारानभिज्ञे! वसन्तसेने! कैशपाशं कैशकलापं, संहर्षु, ("पाशः पक्षय हस्तय कलापाधाः कचात् परे" इत्यमरः)। तरले! चञ्चलचित्ते! तरङ्गवति! केतकीधूलिं केतकीपरागं, विकिर। वामे! विपरीतक्रियाकारिणि! मदनमालिनि! नलिनीदलेन वीजय। चपले! चित्रलेखे! चित्रे चित्तचौरं जनं लिख। भाविनि! भावाभिज्ञे! मुक्ताचूर्णनिकरं

नलिनीदलसमूहेन पयोधरभारम्। कान्ते! कान्तिमति! मन्दमपनय बाष्पबिन्दून्। एहि भगवति! निद्रे! अनुगृहाण माम्। धिगिन्द्रियैरपरैः, किमिति लोचनमयान्येव ममाङ्गानि न कृतानि विधिना? भगवन्! कुसुमायुध! अयमञ्जलिस्ते, अनुचरो भव भाववति तादृशे जने। मलयानिल! सुरतसमुत्करठादोषागुरो! वह यथेच्छम्, अपगता मम प्राणा इति बहुविधं भाषमाणा सखीजनेन समं सुमूर्च्छ।

अनन्तरं परिजनप्रयत्नोच्छ्वसितजीविता सती क्षणमति-

लिखित। रागिणि! रागवति! नलिनीदलसमूहेन पयोधरभारं जघनयाच्छादय। कान्ते! कान्तिमति! मन्दं बाष्पबिन्दूनपनय, बिन्दूनिति बहुवचनं पीडावर्दितसूचकम्; तथा च भरतः,—"बाष्पो नामानुभवः पूर्वमनो व्यायते विधा। निमित्तत्रयसम्बन्धादानन्देष्वार्तिसम्भवः॥ आनन्दे विप्लुवन् भवतीर्थायां सतरङ्गितायाम्। आर्तावश्रुस्त्रावित्वबहुबहुबिन्दुसन्दर्भः॥" इति। सप्तमीभवस्त्रामुत्पादं वर्णयति। व्यभिचारी चोत्पादः, अत्र विभावः प्रियविरोधविभवसंत्रासादयः, अनुभावो ध्यानऽऽलपितहाहारोदनादयः। भगवति! सर्वैश्वर्ययुते! प्रसन्नेयं तं पुनर्दृष्टिगोचरं करिष्यतीति स्तुतिः, निद्रे! मामनुगृहाण, पूर्वं तत्सम्बन्धात् यथा सुखमनुभूतमेवं पुनरपि सुखानुभवं यथा भवे तथा रचयेत्यनुग्रह इत्यर्थः। अपरैरिन्द्रियैः किम्? तददर्शनेनानुपयुक्तत्वादुत्प्रेक्षा, [क्तेत्यस्य गम्यमानत्वात् लुप्तोपा, गम्यमानाऽपि क्रिया चारचविभक्तौ प्रयोजिका] वैधसा लोचनमयान्येव ममाङ्गानि न कृतानीति तं विधिम्; ["उभयतश्च: काम्यां धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते॥" इति शेषे तसिलन्त द्वितीया]। भगवन्! कुसुमायुध! अयमञ्जलिर्नमस्कारः, भाववत्यभिप्रायाभिज्ञे, तादृशे जनेऽनुचरो भव तस्य सेवको भवेत्यर्थः, यथा मां पीडयसि तथा तमपि पीडयेति त्वयिवात्सल्यादयोग्यत्वाच्च नाभ्यर्थ्यसि; सम्बन्धं विना मुधाविष्कारामावेनात्यन्तपरतन्त्रत्वेन क्षीणत्वादनुचरत्वोक्तिः। मलयानिल! सुरतसमुत्करठादोषागुरो! यथेच्छं वह, यथेष्टवहनात् क्षोऽप्युच्छ्वसिष्यतो भविष्यतीत्यभिप्रायात् प्रार्थना, [प्रार्थनायां लोट्]। मे प्राणा अपगताः, [वर्तमाने क्तः] ("पुंसि भूम्नास्तव: प्राणाः" इत्यमरः)।

मिश्रिरघनसाररसनिस्यगाकूलपुलिने, क्वचनमतितुहिनमलयज-रससरित्परिसरे, क्वचनमरविन्दकाननपरिवारितसरस्तटविटपि-च्छायासु, क्वचनमनिलोल्लासितदलेषु कदलीकाननेषु, क्वचं कुसुमशय्यासु, क्वचं नलिनीदलसंस्तरेषु, प्रलयकालोदितहादय-रविकिरणकलापतीव्रविरहाग्निदह्यमानामतिकृशां विप्राणामिव तनुं बिभ्रती, प्रचलदमन्दमन्दरान्दोलितदुग्धसिन्धुतरलतरङ्ग-च्छटाधवलहासच्छुरिताधरपल्लवं तन्मुखारविन्दं, द्विजकुलमिव श्रुतिप्रणयि तदीयच्चयुगलं, सहजसुरभिमुखपरिमलमाघ्रातु-कामेव सुदूरविनिर्गता सा नासावंशलक्ष्मीः, कलङ्कमुक्तेन्दुकला-कोमला पीयूषफेनपटलपाण्डुरा सा द्विजपङ्क्तिः, तदृष्ट-चरमनङ्गमतिशयानं रूपं, धन्यानि तानि स्थानानि, ते च जनपदाः, पुण्यानि नामाक्षराणि च तानि सुकृतभाञ्जि यान्यमुना परिष्कृतानीति मुहुर्मुहुः परिभावयन्ती, दिक्षु विदिक्षु लिखितमिव, नभस्युत्कीर्णमिव, विलोचने प्रतिबिम्बित-मिव, चित्रफलके लिखित्वा पुरो दर्शितमिवेतस्ततो विलोकयन्ती व्यतिष्ठत।

अनन्तरं परिजनप्रयत्नेनोच्छ्वसितं जीवितं वत्साराजस्य सत्यतिमिश्रिरघन-सारररसनिस्यगाकूलपुलिनेष्वतिशीतलचन्दनरसपूरजलदीर्घतीरे पुलिनेषु, क्वचनमतितुहिन-मलयजरससरित्परिसरेष्वतिशीतचन्दनजलदीर्घेषु, क्वचनमरविन्दकाननपरिवारितेषु यत् सरस्तट विटपिच्छायासु, क्वचनमनिलोल्लासितानि दलानि येषां तादृशेषु कदलीकाननेषु, क्वचं कुसुमशय्यासु, क्वचं नलिनीदलसंस्तरेषु नलिनीदलास्तरेषु, प्रलयकालोदितहादयरवीणां किरणकलापवत् तीव्रो यो विरहानलस्तेन दह्यमाना-यत एवातिकृशां विप्राणां तनुमिव विभ्रती बिभर्त्ति तनुमिति, मुहुर्मुहुः परिभावयन्ती दिक्षु लिखितमिवेत्यादीनतस्ततो विलोकयन्ती व्यतिष्ठतेत्यन्वयः। मुखचन्द्रसंनकर्षा चतुर्थी दर्शा प्रचलदित्यादिना वर्ण्यते। प्रचलदमन्दो मन्दरश्चदान्दोलितः क्षुभितः, दुग्धसिन्धुस्तस्य तरलतरङ्गच्छटावद्धवलो यो हासो हासः, तेन क्षुरितमधरपल्लवं यस्य तादृशं तन्मुखारविन्दं मुखमेवेत्युपमितकर्मधारयवत्। द्विजकुलमिव ब्राह्मणसमूहमिव

अथ तस्याः सारिका तमालिका नाम तत्सखीभिः सङ्गालोच्य कन्दर्पकेतोर्भावमाकलयितुं प्रस्थिताऽऽगता च मयैव सार्द्धमत्रैव तरोरधस्तात् तिष्ठति" इत्युक्त्वा विरराम।

अथ मकरन्दः सहर्षमुत्थाय तमालिकां विदितवृत्तान्तामकरोत्; सा च कृतप्रणामा मकरन्दाय पत्रिकामुपानयत्। अथ स तां स्वयमेवावाचयत्।

"प्रत्यक्षदृष्टभावाऽप्यस्थिरहृदया हि कामिनी भवति।
स्वप्नानुभूतभावा दृढयति न प्रत्ययं युवतिः॥"

वंशनिव वा, श्रुतिवेदः कर्णश्च, तत्र प्रत्यये प्रत्ययवत्, तदीयचक्षुर्गतम्। सङ्केतेति कलङ्कमुक्तेति च्छेदम्। अनङ्गमतिप्रयाणं तदनिर्वचनीयं, रूपमदृष्टचरम्। [भूतपूर्वे चरट्] धन्यानि तानि स्थानानि, ते च जनपदाः, यत्र स वसतीति शेषः। तानि नामाचरणाभिधानवर्णानि, सुकृतभाञ्जि पुण्यानि, यान्यसुना परिष्कृतान्यलङ्कृतानि, इति परिभावयन्ती चिन्तयन्ती, दिक्षु विदिक्षु लिखितमिव, नभस्याकाशे, उत्कीर्णमिव विकीर्णमिव, विलीचने प्रतिबिम्बितमिव, चित्रफलके लिखित्वा पुरो दर्शितमिवेतस्ततो विलोकयन्ती, अननुभूतमपि सङ्कल्पेनावलोक्यते; तदुक्तं—"कामक्रोधभयोन्मादाच्चौरसर्पाद्युपद्रवात्। असत्यान्यपि पश्यन्ति पुरतोऽवस्थितानिव॥" इति, व्यतिषक्त, ["समवप्रविभ्यः स्थः" इति तङ्]।

पत्रहारिणी तूर्णम्; "कामिन्याः कामिनस्यापि सन्देशार्थां तु पत्रिकाम्। प्रापयत्यचिरेणैतामाहुः पत्रस हारिकाम्॥" इति। अथ तस्याः सारिका तमालिका नामेति प्रसिद्धौ, तत्सखीभिः सङ्गालोच्य कन्दर्पकेतोर्भावं वासवदत्तानुरागम्, आकलयितुं प्रस्थिता मयैव सार्द्धं सह, आगता चात्रैव तरोरधस्तात् तिष्ठतीत्युक्त्वा विरराम।

अथ शुकवाक्यश्रवणोत्तरं, मकरन्दः सहर्षमुत्थाय तमालिकां विदितो वृत्तान्तो यस्मात्साद्यमकरोत्, सा च तमालिकाऽपि, कृतप्रणामा सती मकरन्दाय पत्रिकामुपानयत्। अथ स मकरन्दः, तां पत्रिकां, मयि सख्येतावन्मात्रमपि प्रणयोऽस्य मा भूदित्यभिप्रायात् स्वयमेवावाचयत्।

आर्यया आह। प्रत्यक्षं दृष्टो भावः पुरुषाभिप्रायोऽनया तावदस्मिन् कामिनी

तच्छ्रुत्वा कन्दर्पकेतुरमृतार्णवमग्न इव सर्वानन्दानामुपरि वर्त्तमानो मन्दमुत्थाय प्रसारितबाहुयुगलस्तमालिकामालिलिङ्ग। अथ तयैव सार्द्धं किं करोति? किं वदति? कथमास्ते? इत्यादि सकलं वासवदत्तावृत्तान्तं पृच्छंस्तत्र तां निशां दिवसमप्यतिवाह्य कन्दर्पकेतुरचाल। अत्रान्तरे भगवानपि मरीचिमाली तं वृत्तान्तमिव कथयितुं मध्यमलोकमवततार।

अथ वासरतान्नचूडचूडाचक्राकारः, चक्रवाकचक्रसङ्क्रामितसन्तापतयेव मन्दिमानमुद्वहन्, मन्दारस्तबकसुन्दरः, सिन्दूराहतसुरराजकुम्भिकुम्भविभ्रमं बिभ्राणः, ताण्डवचण्डवेगोच्छलितधूर्जटिजटाजूटकूटबन्धबन्धुरविकटवासुकिभोगमणितटङ्कसनाभिमण्डलः, सन्ध्यासन्धिनीसरसयावकपटचारुः, वारुणीवारविलासिन्यरुणमणिकुण्डलकान्तिः, कालकरवालछत्तवासरमहिषस्कन्धचक्राकारः, मधुपूर्णकपालपात्रमिव कालकपालिनः, अम्लानकुसुमस्तबक इव नभःश्रियः, गगनाशोकतरुस्तबक इव, कनकमयदर्पण इव प्रतीचीविलासिन्याः, भगवान् दिनमणिश्चरमार्णवपर्यसि तरलतरङ्गवेगोच्छलितविद्रुमविटपाकृतिर्ममज्ज।

हि यतः, अस्थिरहृदया सत्यनुरक्त एवासावित्यनियतचित्ता, भवति, स्वप्नानुभूतभावा युवतिः प्रत्ययं स्वप्नदृष्टं स्वानुरक्तत्वनिश्चयं, न दृढयति न दृढीकरोतीत्यर्थः, प्रत्यक्षदृष्टे यत्रानिश्चयस्तत्र परोक्षे का वार्त्तेति भावः। काव्यार्थापत्तिरलङ्कारः, "कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते" इति। आर्या छन्दः, "यत्रैतत् सप्त गणा गोपेता भवति नेह विषमे जः। षष्ठोऽयं न लघु वा प्रथमेऽर्द्धे नियतमार्य्यायाः॥ षष्ठे द्वितीयलात् परके नै मुखलाच्च यति पदनियमः। चरमेऽर्द्धे पञ्चमके त्वादिह भवति षष्ठो जः॥" इति लक्षणात्।

तच्छ्रुत्वेति स्पष्टम्। अथ तयैवेत्यपि स्पष्टम्। अत्रान्तरे भगवान् मरीचिमाल्यपि वृत्तान्तं वासवदत्ताबृत्तान्तं, कथयितुमिव मध्यमलोकं भूलोकम्, अवततार।

अथ चरमार्णवपर्यसि मज्जनेति सुगमम्। वारुणीव वारुणकुलस्य कुटा-

क्रमेण च रजोविलुठितोत्थितकुलायार्थिपरस्परकलह-विकलकलविहङ्कुलकलकलवाचालशिखरेषु शिखरिषु, वसति-काङ्केषु ध्वाङ्क्षेषु, अनवरतदह्यमानकालागुरुधूपपरिमलोद्गारेषु वासागारेषु, दूर्वाऽञ्चिततटिनीतटनिविष्टविदग्धजनप्रस्तूयमान-

---

चक्राकारः। चक्रवाकाणां चक्रं समूहः, तत्र सङ्गतिः सत्तापी येन तद्भावः, तयैव मन्दिमानमलसतेजस्कम्, उदयन्। मन्दारस्तवकसुन्दरः। किञ्चूरेणाहतो-ऽभिभूतः, क्षादितः, यः सुरराजकुञ्जिकुञ्जसदृशम् तदाकारत्वादस्येकत्वान्नास्तीति विशिष्टमं विशालं च, विभाषः। [पूर्वार्धेऽलभावितस्यर्धीऽत्र भूज्] ("द्विपावि-धूर्वसुतिकुञ्जिकोलजाः" इति शारावली)। कृष्णवर्णखदिरेणीच्छालितेन धूर्जटि-जटाजूटकूटवत्येन बन्धुर उन्नतानतः, अत एव विषमविन्यासो यो वासुकिस्तस्य भीषणश्चिः कृष्णश्चिः, स एव ताटङ्कः स्त्रीणां कर्णभूषणं, तत्सनाभिस्तत्तुल्यरूपः, मस्तको यस्य सः; वर्तुलत्वाद्यं ताटङ्करूपकं, ("बन्धुरं तून्नतानतम्" इत्यमरः)। कृष्णेव सन्धिन्यक्षादुग्धा इवाक्षा वा गौः, तस्याः सरसयावकपटवत्सारः; "पीनाया-स्तिदुग्धाया गोः प्रकाराय मानवाः। रक्षयन्ति शिरोदेशमस्याश्च बहुधा खिल॥" क्वचिद्यावकपटलीति पाठः; अस्मिन् पाठे—यावकपटलशब्देन यावकपटलमिव यावकपटलं लोकप्रसिद्ध-"मैंहदी" इति पदविशेषं रञ्जनतिलकं विवक्षितम्; ("सन्धिनी तु इवाक्षाक्षादुग्धगवीः सूता" इति विश्वप्रकाशः) सन्ध्यापुरन्ध्रीति पाठः सुगमः। कृष्णेव वारविलासिनी तस्या वदनमणिकुण्डलवत् कान्तिरस्य सः। कालागर-वालेन कृष्णच्छिन्नः, वासरमणिपरिक्षयसदृशाकारः ("करवालः कृपाणवत्" इत्यमरः)। कालागरधूपिनी मधुपूर्णकपालपालनिव। नभःश्रियोऽज्ञानकुसुमलवक इव, तत्कोरकणायेति भावः। गगनमेवाभोगतरुस्तस्य स्तवक इव। प्रतीचीविलासिन्याः वदनमवदर्पण इव। [illegible]भंगवांस्तरमार्चपयसि मग्नश्च।

क्रमेण भगवती सन्ध्या समदृश्यतेत्यन्वयः। पूर्वं रजोविलुठितानि पश्चादुत्थि-तानि कुलायार्थीनि एव परस्परकलहविकलानि कलविङ्कुलानि तेषां कलकलेन वाचालानि शिखराण्यपि तेषां तादृशेषु शिखरिषु इत्येषु सत्सु; ("कलविङ्क-चिरहितो रटद्वनौकाः इवाचलः" इति शारावली। "शिरोऽग्रं शिखरं वा ना" इति मेदिनीकरः)। कृष्णवर्णेत्यादिना, काङ्क्षा येषां तादृशेषु, ध्वाङ्क्षेषु वायसेषु [

काव्यकथाश्रवणोत्सुकश्रिग्रुजनकलकलनिवारणक्लेषु हृद्देषु, आलोलिकातरलरसनाभिः कथितकथाभिर्जरतीभिरतिलघुकरतालजनितसुखे श्रिग्रयितुमिच्छौ श्रिग्रुजने, विरचितकन्दर्पमुद्रासु क्षुद्रासु, कामुकजनानुबध्यमानदासीजनविविधाश्लीलवचनश्रुतिविरसीकृतमन्थ्यावन्दनोपविष्टेषु श्रिष्टेषु, रोमन्थमन्थरकूरकुटुम्बकाध्यास्यमानस्रदिष्ठगौष्ठीनपृष्ठास्तरण्यस्थलीषु, निद्रालुद्रोणकुलकलितकुलायेषु काननकाकायेषु, कापेयविकालकपिकुलेष्वाश्रमतरुषु, निर्जिगमिषति जरत्तरुकोटरकुटीरकुटुम्बिनि कौशिककुले, निमिरतर्जननिर्गतासु दहनप्रविष्टदिनकरकरश्रिखास्विव प्रस्फुरन्तीषु दीपलेखासु, मुखरितधनुष

अनवरतेति स्पष्टम्। कूर्माभिरचितं यत् तटिनीतटं तत्र निविष्टविदग्धजनैः प्रस्तूयमानानां काव्यकथानां श्रवणोत्सुकाः, अत एव श्रिग्रुजनकलकलनिवारणार्थं क्रुद्धास्तादृशीषु हृत्सु। आलोलिकायां वाचालां निद्रार्थं क्रियमाणे "झरलोल" इति लोकप्रसिद्धे मुखध्वनिविशेषे, तरला रसना जिह्वा यासां ताभिः, कथितकथाभिर्जरतीभिरतिलघुकरतालजनितसुखे श्रिग्रयितुमिच्छौ, श्रिग्रुजने, तदुक्तम्—"आलोलिका मुकुलिका उलुलिर्मुखघट्टिका" इति। विरचिता कन्दर्पमुद्रा प्रसाधनं यासिन्तासु, क्षुद्रासु वेश्यासु, ("क्षुद्रा वेश्यानटीकरट-कारिकास्वरघासु च" इति विश्वप्रकाशः)। कामुकेति स्पष्टम्। रोमन्थेन चर्वितस्यैव पुनश्चर्वणेन, मन्थरैश्च कूरकुटुम्बकैर्नाध्यास्यमानं सदिष्टं सदुतरं, गौष्ठीनानां भूतपूर्वगोष्ठानानां, पृष्ठं पृष्ठवत् पृष्ठं यासु तादृशीष्वरण्यस्थलीषु सतीषु, ("गोष्ठं गोस्थानकं तत्तु गौष्ठीनं भूतपूर्वकम्" इत्यमरः)। निर्जिगमिषति कुलं काककुलं, तेन कलितकुलायेषु व्याप्तनीडेषु, काननकाकायेषु काननसमूहेषु, ("निकायस्तु पुमान् सङ्घे सद्मनिग्राहिसंहतौ" इति विश्वप्रकाशः)। कापेयं कपिसम्बं, तेन विकटानि कपिकुलानि येषु तेष्वाश्रमतरुषु, ["कपिशालोढंक्"]। कूरकुटुम्बकाश्चिरन्तनकाकाः, कोटरा निष्कुटाः, ते एव कुटीराणि तेषु कुटुम्बिनि कुटुम्बवति, कौशिककुले निर्जिगमिषति निर्गन्तुमिच्छति, ("निष्कुटः कोटरं वा ना" इति "वाटः कुटी" इति च हलायुधः) ["कुटीग्रामीयुष्माभी रः" इत्यसले रः]। निमिरतर्जनार्थं

वर्षति शरनिकरमनवरतमशेषसंसारशमुषीमुषि मकरध्वजे, सुरतारम्भाकल्पशोभिनि शब्दलीभाषितभाजि भजति भूषां भुजिष्याजने, सैरिन्ध्रीविध्यमानरशनाकलापजल्पाकजघनस्थलीषु जनीषु, विश्रान्तकथाऽनुबन्धतया प्रवर्त्तमानानेकजनगृहगमनत्वरेषु चत्वरेषु, समावासितकुक्कुटेषु निष्कुटेषु, कृतयष्टिसमारोहणेषु बर्हिणेषु, विहितसन्ध्यासमयव्यवस्थेषु गृहस्थेषु, सङ्कोचोदञ्चदवाञ्चत्केसरकोटि-सङ्कट-कुशेशय-कोशकोटर-कुटीरशायिनि षट्चरणचक्रे, अथानेन वर्त्मना भगवता भानुमता समागन्तव्यमिति सर्वपद्मयैर्वसनैरिव मणिकुट्टिमालिरिव विरचिता वरुणेन, कालक्तस्य दिवसमहिषस्य रुधिरधारेव,

---

निर्गतालिव दहनप्रविष्टदिनकरकराणां शिखानां, शिखासु प्रस्फुरन्तीषु दीपलेखासु, "सौरं तेजः सायमग्निं सङ्क्रमते"। "आदित्यः सायमग्निं प्रविशति" इत्यादिस्मृतिः। शुकसरितबर्हिषि [समासान्तविधेरनित्यत्वान्नञ्] शरनिकरं वर्षति, अनवरतमशेषसंसारशमुषीमुषि सकलसंसारमतिहारके, मकरध्वजे, ("धीः प्रज्ञा शमुषी मतिः" इत्यमरः)। सुरतारम्भाकल्पेन वेशेन, शोभिनि शब्दलीनां कुट्टनीनां, भाषितं वचनं, भजति तादृशि, भूषां भजति भुजिष्याजने प्रेष्याजने, ("आकल्पवेशौ नेपथ्यम्"। "शब्दली कुट्टनी समे"। "नियोज्यकिङ्करप्रेष्य-भुजिष्यपरिचारकाः" इति त्रिष्वमरः। "भुजिष्या प्रेष्यमात्रे स्यात् स्वतन्त्रायामपि स्मृता" इति धरणिः)। सैरिन्ध्रीविध्यमानरशनाकलापेन काञ्चीकलापेन, जल्पाकजघनस्थलीषु जनीषु वधूषु, ("सैरिन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका"। "जल्पाकस्तु वाचालः" इति द्वयोरमरः। "जनी स्त्रीमन्तिनीबध्वोरुत्पत्तौ च जनिर्मता" इति विश्वः)। विश्रान्तकथाऽनुबन्धतया प्रवर्त्तमानानेकजनेषु गृहगमनत्वरा येषु तेषु चत्वरेष्वङ्गणेषु, ("चत्वरं चतुरादिरे" इत्यमरः)। निष्कुटेषु गृहारामेषु, समावासितकुक्कुटेषु, ("गृहारामास्तु निष्कुटाः" इत्यमरः)। बर्हिणेषु मयूरेषु, कृतयष्टिसमारोहणेषु, ("मयूरो बर्हिणो बर्ही" इत्यमरः)। गृहस्थेषु विहितसन्ध्यासमयव्यवस्थेषु। सङ्कोचेति स्पष्टम्। अथानन्तरं, वक्ष्यमाणेन वर्त्मना भानुमता समागन्तव्यमिति सर्वपद्मयैर्वसनैर्मणिकुट्टिमालिमण्डितङ्गभूमिरिव, रचिता, ("कुट्टिमोऽस्त्री

विद्रुमलतेवाम्बरमहार्णवस्य, रक्तकमलिनीव गगनतडागस्य, काञ्चनसेतुरिव कन्दर्पगमनस्य, मञ्जिष्ठारागाकृष्णपताकेव गगनहर्म्यतलस्य, लक्ष्मीरिव स्वयंवरपरिगृहीतपीताम्बरा, भित्तुकीव तारानुरक्ता रक्ताम्बरधारिणी, भगवतो सन्ध्या समजृम्भत।

अथेन च क्षणदारागरचनाचतुरासु सन्ध्याग्रिष्याखिव वेश्यासु, तुलाधारशून्यायां पण्यवीथ्यामिव दिवि, घनघटमानदलपुटासु पुटकिनीषु, तिमिरप्रतिहस्तकेष्विव तत इतः परिभ्रमत्सु कमलसरसि मधुकरेषु, विकलकुररीकृतच्छलेन रविविरहविधुरासु विलपन्तीष्विव सरोजिनीषु, गणके इव नक्षत्रसूचके प्रदोषे, हरकण्ठकाण्डकालिमसनाभि, दैत्यबल-

---

निबद्धा भूः" इत्यमरः)। काञ्चनसेत्यादि सप्तम्। लक्ष्मीरिव स्वयंवरपरिगृहीतः पीताम्बरो विष्णुर्यया; पक्षे—पीताम्बरं पीतनभः। भित्तुकीव तारायां देवतायाम्, अनुरक्ता, रक्ताम्बरधारिणी रक्तवस्त्रधरा; पक्षे—तारा नक्षत्राण्यनुरक्ता यस्याम्, [आदितारन्यादिः] रक्तनम्बरमाकाशो यस्याम्।

अथेन गणके इव नक्षत्रसूचके प्रदोषे तिमिरमकृष्णतेत्यन्वयः। अथेन रात्रिः, तस्या रागरचना तत्र चतुरासु सन्ध्याग्रिष्याखिव वेश्यासु; पक्षे—अथेन आ साकल्येन, रागा भैरवादयः, तेषां रचना यथायथं स्वरग्राममूर्च्छनासहितं गानं, तत्र चतुरासु; यथा—अथेनानां स्वसुखप्रदानाम्, आ साकल्येन, रागरचना प्रीतिरचना, तत्र चतुरासु। तुलाधारा वणिजः, तैः शून्यायां पण्यवीथ्यामिव दिवि; पक्षे—तुला राशिराधारो येषां ते चन्द्रादयः, तैः शून्यायाम्; तथा च माघः,—"अविभाव्यतारक-मदृष्टदृष्टिमप्युतिविम्बनम्रलिनभाजु नभः। विगतोष्णतापमतिसान्द्रमभादपदोषतेव विगुणस्य गुणः॥" इति, ("तुलाधारस्तुलाराशौ भवेद्वाणिजकेऽपि च" इति विश्वः)। घनं निबिडं, घटमानदलपुटासु पुटकिनीषु कमलिनीषु; राजादेर्यस्यापदि विपत्तिनो विषमपसारयन्ति, सभीकाश्च खड्गादिधारणमाचरन्तीति लोकव्यवहारो ध्वनितः, "दृढताल" इति भाषायां, ("नालीकिनी पुटकिनी विसनालिन्य पद्मिनी" इत्यमरः)। कमलसरसि तिमिरप्रतिहस्तकेष्विवेतस्ततो भ्रमरेषु परिभ्रमत्सु, ("प्रतिहस्तकोऽपरहस्तकः") "घुमाना" इति भाषायाम्; [संज्ञायां कन्]

मिव प्रकृष्टतारकं, भारतसमरमिव वर्द्धमानोलूककालकलं, धृष्टद्युम्नवीर्य्यमिव कुण्ठितद्रोणप्रभावं, नन्दनवनमिव सञ्चरत्कौशिकं, कृष्णवर्त्मेवाखिलकाष्ठापहारकं, सगर्भमिव घनतरपाषाणकर्कराभु गिरितटेषु, सचक्षुरिव सिंहनयनदीधितिच्छटाकपिलेषु सानुषु, सजीवमिव तमोमणिभिः, संवर्द्धित-

---

मालिन्येन साम्यात् प्रतिफलतीत्प्रेक्षणम्; प्रभौ पराभूते सूदः परहस्तदारादीन् समया स्वमुखान् लक्ष्मीनिवृत्तया प्रेषयत्येवेति लोकपरिहो ध्वनितः। कृत्तिरहविधुरास्वत एव विकलकुररीकृतच्छलेन पक्षिविशेषशब्दनिषेण, विधवलोकेव सरोजिनीषु। [illegible] इव दैवज्ञे इव, नक्षत्रसूचके शुभाशुभकार्य्योपयोग्यश्विन्यादिनक्षत्रसूचके; पक्षे—नक्षत्राणि तारा:, तत्सूचके द्योतके, प्रदोषे, ("दैवज्ञगणकावपि" इत्यमर:)। [illegible] कण्ठरार्द्धं गलस्तब्ध:, तत्कालिमसनामि। दैवज्ञवलमिव प्रकृष्ट: श्रेष्ठ:, तारको दैत्यविशेषो यत्र; ("कार्द्धं चावसरे बाष्पे नालि स्तब्धे च गायिनाम्। स्तब्धे रङ्गिणि च" इति धरणि:) पक्षे—प्रकृष्टतारका औडुनादिनक्षत्राणि यत्र, तथा च माघ:,— "क्षपितुस्त्वषाऽपि दृढमंऽपि न य: स तमी तमोभिरधिगम्य ततान। द्युतिमयदोद्यदुडुगणो लघव: प्रकटीभवन्ति मलिनाश्रयत:॥" [illegible]समरमिव वर्द्धमान उलूककुलकलो यत्र; पक्षे—उलूका: पेचका:, ("उलूक: कुलमेदेऽपि पेचके लक्ष्मणेदिनि" इति विश्व:) [सङ्घादि प्रयोजनयोर्ढक्] [illegible]वीर्य्यमिव द्रुपदपुत्रवीर्य्यमिव, कुण्ठितो द्रोणस्याचार्य्यस्य, प्रभावो यत्र, पक्षे—कुण्ठितो द्रोणानां काकानां, प्रभावो यत्र, (द्रोणो ना दग्धकाके स्यादश्वत्थाम्नो गजावपि" इति कोष:)। [illegible]नवनमिवेन्द्रवनमिव, सञ्चरन् कौशिक इन्द्रो यत्र; पक्षे—कौशिका उलूका:, ("कौशिक: पेचके श्रेष्ठे विश्वामित्रे च कौशिक:" इति विश्व:)। [illegible]र्त्मेवाखिलकाष्ठापहारकम्; अपहारकम्; पक्षे—काष्ठा दिश:, ताभ्यामपहारकमाच्छादकम्; यद्वा—कृष्णवर्त्मानमिव दुराचारमिव, अखिलकाष्ठानामाखिलोत्कर्षाणाम्, अपहारकं नाशकं, ("कृष्णवर्त्मा धृताग्नि स्यादुराचारे विधन्तुदे"। "काष्ठा तारतरदिङ्मार्गा काममानप्रकर्षयो:। स्यादृद्धि स्थानलाभे च काष्ठमाख्यातनिश्चये॥" इति विश्वप्रकाश:)। [illegible]र्भमिव सलक्ष्यमिव, अधिकमिति यावत्, क्वचित् सगर्वमित्यपि पाठ:, घनतरा: पाषाणा: कर्कराश्च यत्र तासु गिरितटेषु, "क्वाकर" इति माघव्याम्। [illegible]रिव सिंहनयनदीधितिच्छटाकपिलेषु सानुषु;

मिवाग्निहोत्रधूमलेखाभिः, मांसलितमिव कामिनीकेशपाश-संस्कारागुरुधूमपटलैः, उद्दीपितमिव घनतरलीनमधुकर-पटलमेचकितपेचकिकापोलतलदानधाराशीकरैः, पुच्छीकृतमिव विततततालमालाच्छायासु, लीयमानमिव कज्जलश्यामभोगि-भोगेषु, प्रावरणमिव रजनीपांशुलायाः, पलितौषधमिव वृद्ध-वारविलासिन्याः, अपत्यमिव रजन्याः, सुहृदिव कलिकालस्य, मित्रमिव दुर्जनहृदयस्य, बौद्धदर्शनमिव प्रत्यक्षद्रव्यमपह्नुवानं, तिमिरं व्यजृम्भत।

सुप्तसिंहेति पाठस्तु भ्रामकत्वादुपेक्षितः। तमोमणिमिर्ज्योतिरिङ्गणैः, खद्योतैरिव, इतस्ततो भ्रमणादिति भावः, ("ध्वान्तोन्मेषखद्योतसमीमणिर्ज्योतिरिङ्गणः" इति व्याडिः)। धूमिकोद्गधूमलेखाभिः संवर्तितमिव। कामिनीकेशपाशसंस्कारार्थमगुरु-धूमपटलानि तैर्मांसली बलवान्, तद्वदाचरितमिव, [शिखादित्वात्] ("बलवान् मांसलोऽस्त्रियः" इत्यमरः)। घनतरं निबिडतरं, लीनानामुपविष्टानां, मधुकराणां पटलैर्मेचकितानां श्यामवदाचरितानां, पेचकिनां मज्जानां, कपोलतलदानधारा-शीकरैरुद्दीपितमिव, ("उलूके काणिः पुच्छ-मूलोपान्ते च पेचकः"। "काल-श्यामलमेचका:" इति धरणिरमरः) प्रौढीकृतिः। विततता या तमालमाला तच्छायासु पुच्छीकृतमिव। कज्जलश्यामभोगिभोगेषु सर्पशरीरेषु, लीयमानमिव। रजनीपांशुलाया रात्रौ कृष्णाभिसारिकायाः, प्रावरणमिव, ("स्त्रैरिणी पांशुला च स्यात्" इत्यमरः)। वृद्धवारविलासिन्याः पलितस्य जराकृतकेशशुक्लत्वस्य, औषधं तन्निवारकमिव, तमस्तमसे केशानां विशेषानुपलम्भादिति भावः, पलितं वेश्यानां लौकिकाभङ्गहेतुरिति ता एव वर्णिताः, ("पलितं जरसा शुक्लं केशादौ" इत्यमरः)। रजन्या रात्रेः, अपत्यमिव, तत उद्भूतत्वादिति भावः। कलिकालस्य सुहृदिव, तदाचरणाप्रकटत्वान्मालिन्यस्य साम्यात् सुहृत्त्वम्। दुर्जन-हृदयस्य मित्रमिव। बौद्धदर्शनमिव बौद्धशास्त्रमिव, प्रत्यक्षमपि चक्षुरिन्द्रियगोचरमपि, न तु परमाण्वादिवदतीन्द्रियं, द्रव्यमपह्नुवानं, सर्वं शून्यमयं जगदिति मन्य-मानाले—"सूर्याचन्द्रमसौ व्योम तारावक्त्रं वसुन्धरा। सरितः सागराः शैला-श्चित्तस्यैव विभूतयः॥" इति प्रत्यक्षपरिकल्पितमप्यर्थमनुवदन्ति।

मुदितमिवातिमत्तमातङ्गमनोहरगण्डमण्डले, प्रक्षालित-मिवातिमान्द्रबहलच्छदविततमालतमालकानने, स्फुरित-मिवातिकान्तकान्तांजनघनतरकीकसपाशसंहतौ, मिलितमिवेन्द्र-नीलमणिरश्मिभिः, अतिशयमांसलं तम इवावटतटाटवीषु, भाटोपमिव स्फुटपाटवोत्कटप्रकटविशङ्कटकुटजविटपोत्कट-विनटितषट्पदालिषु, घनतरघोरघस्मरविषधरभोगभासुरं, मदभरमत्तदन्तिदन्तद्युतितर्जनजर्जरं तमः।

निशाकरारम्भसमये इव सङ्कुचत्कुवलयव्याजेन विरचिता-ञ्जलिपुटे नतिमति तमोतिमिरे क्षणेन च सन्ध्यातारुण्यारुणेश्वरी-च्छलितमट्टानट-जटाजूट-कूटकुटिलविवर-विवर्त्तित-जह्नुकन्या-वारिधाराविन्दव इव विकीर्णाः, दुर्द्धरधरणिभारभरभुग्नभोग-

---

अतिमत्तमातङ्गमनोहरगण्डमण्डले मुदितमिव हृष्टमिव। अतिमान्द्रबहल-च्छदविततमालतमालकानने प्रक्षालितमिव। अतिकान्तकान्तांजनघनतरकीकसपाशसंहतौ स्फुरितमिव। इन्द्रनीलमणिरश्मिभिर्मिलितमिव। अतिशयमांसलं तमः अवटा गर्त्ताः, तटा घटस्य तवोत्पन्नाम्ब, ("अवटः स्यात् खले गर्त्ते कूपे कुड्यकशीर्षणि" इति विश्वप्रकाशः)। स्फुटं पाटवं पटुत्वं, तेनोत्कटमुदग्रं, प्रकटा व्यक्ताः, विशङ्कटा महान्तः, ये कुटजविटपास्तेषूत्कटविनटितषट्पदालिषु साटोपमिव सावष्टम्भमिव; ("विकटः सुन्दरे भीमे विशालविकरालयोः" इति विश्वप्रकाशः। "विशङ्कटं वृषकुटम्" इत्यमरः)। घनतरं घोरं भयानकं, घस्मरो भक्षकः, यो विषधरस्तस्य भोगः महासुरभं; ("घोरं भीमं भयानकम्"। "भक्षको घस्मरोऽघरः" इत्यभयवाप्यमरः) ["सुरभयदः क्वाच् घसेः"]। मदभरमत्तदन्तिदन्तद्युतितर्जनेन जर्जरं शिथिलावयवं तमः; मदमत्त इति विशेषणं राजानं तारुण्यशोभनाय, तच्च दन्तयोः शैत्याय।

निशाकरारम्भसमये चन्द्रोदयारम्भसमये, सङ्कुचत्कुवलयव्याजेन विरचिताञ्जलिपुटे इव, अत एव नतिमति नम्रे, तमोतिमिरे इति क्षणेन तारका व्याजलक्ष्येत्यर्थः। पूर्वं तमःप्रारम्भे सा इव वर्णिता, इदानीं चन्द्रोदयप्रारम्भे इति न किञ्चिदसङ्गतम्। उत्तरस्य तारुण्यं हृद्यं, तमोऽङ्गस्य, तमोरम्भ, तेनोच्छलिते महानटस्य शम्भोः, जटाजूटकूटकुटिलविवरे विवर्त्तिता या जह्नुकन्या गङ्गा, तस्या वारिधाराविन्दव इव

दिग्गजमातङ्गमण्डलकरपरिमुक्तशीकरच्छटा इव, अतिदवीयो-नभस्तलभ्रमणखिन्नदिनकरतुरगवान्तफेनस्तबका इव, गगन-महासरःकुमुदकाननसन्देहदायिन्यः, विश्वं गणयतो विधातुः ग्रन्थिकठिनीखण्डेन तमोमसीश्यामेऽजिने इव नभसि संसार-स्यातिशून्यत्वाच्छून्यविन्दव इव, विततता जगत्त्रयविजयविनिर्गतस्य मकरकेतो रतिकरतलविकीर्णलाजा इव, गुटिकाख्यगुलिका इव पुष्पधन्वनः, वियदम्बराग्निफेनस्तबका इव, रतिविरचिता गगनाङ्गणे आतर्पणपञ्चाङ्गुलय इव, विकीर्णा व्योमलक्ष्मीहार-मुक्तानिकरा इव, चन्द्रचिताचक्रादात्यावेगव्यस्ताः कामकीकस-खण्डा इव, तिमिरोद्गमधूमधूमलसन्ध्यानलपरितप्तगगनमहा-

---

इव विकीर्णा विस्तृताः; ("ताण्डवं नटनं नाट्यम्" इत्यमरः। "आडम्बरः समारम्भे गजगर्जिततूर्य्ययोः" इति विश्वप्रकाशः)। कुम्भधरणिभारभरभुग्नभीमदिग्गज-मातङ्गमण्डलं समूहः, तत्करैः शुण्डाभिः, परिमुक्ताः शीकरच्छटा अम्बुकणच्छटाः, ता इव; ("करी वर्षोपले पाणौ शुण्डाग्रत्यग्ररश्मिषु" इति विश्वप्रकाशः)। अतिदवीयो दूरं, नभस्तलं तत्र भ्रमणेन खिन्ना दिनकरतुरगास्तेषां फेनस्तबका इव; ("दवीयश्च दविष्ठं च सुदूरे" इत्यमरः)। गगनमहासरसः कुमुदकाननसन्देहदायिन्यः, तुल्यत्वा-दित्यर्थः। विश्वं गणयतो विधातुस्तमोमसीश्यामेऽजिने चर्मणीव, नभस्याकाशे, ग्रन्थौ चन्द्र एव, कठिनो खटिका, तस्याः खण्डेन शकलेन, रचिता इति शेषः, संसारस्यातिशून्यत्वात् नश्वरत्वेनेत्यर्थः, शून्यबिन्दव इव; ("कठिनी खटिकायां तु" इति विश्वप्रकाशः)। जगत्त्रयविजयार्थं विनिर्गतस्य मकरकेतोः कामस्य, रतेः प्रियायाः, करतलविकीर्णलाजा इव। पुष्पधन्वनो गुटिकाख्यं "गुलेल" इति भाषायां, तस्य गुलिका इव, "गुरिया" "गोली" इति वा इयं भाषायाम्। वियदम्बराग्निः फेनस्तबका इव। गगनाङ्गणे रतिविनिर्मिता आतर्पणम् "आलिपन" इति भाषायां, तस्य पञ्चाङ्गुलयः "चुट्की" इति भाषायां, ता इव, उत्सवादावा-तर्पणेनाङ्गुली रञ्जयित्वा कुङ्कुमादि रञ्जयन्तीति सम्प्रदायः; ("आतर्पणं च सौहित्ये विन्यादालिम्पनेऽपि च" इति विश्वप्रकाशः)। विकीर्णा विक्षिप्ताः, व्योमलक्ष्म्या हारमुक्तानिकरा इव। चन्द्र एव चिताचक्रं तस्मादात्यावेगेन व्यस्ता इतस्तत उत्पतिताः, कामकीकसखण्डाः कामास्थिखण्डाः, ते इव, ("चिता चित्या चितिः स्त्रियाम्"।

खलोकटाहभज्यमानलाजानुकारिण्य इव तारका व्यराजन्त। ताभिः खिचितमिव वियदशोभत। दीर्घोच्छ्वासरचनाकुलं सुश्लेषवक्रघटनापटु सत्कविवचनमिव चक्रवाकमिथुनमतीवाखिद्यत। कमलिनीवन-सञ्चरणलग्न-मकरन्दबिन्दुलुब्ध-मुग्ध-मधुकरमालाशबलगात्रं, कालपाशेनेव मूर्त्तरामशापेनाक्रम्यमाणं, चक्रवाकमिथुनं विजघटे। रविविरहविधुरायाः कमलिन्या हृदयमिव द्विधा पपाट चक्रवाकमिथुनम्। आगमिष्यतो हिमकरदयितस्य पार्श्वे सञ्चरन्ती कुमुदिन्या भ्रमरमाला दूतीवालक्ष्यत। तारका-

---

"कोठं कुष्ठमस्त्रि च" इति द्वयोरप्यमरः)। तिमिरमेव धूमलेन धूमलः कृष्णलोहितः, तस्यैवानलो वह्निः, तेन परितप्तो गगनमहाकाह्यस्यैव कटाहस्तत्र भृज्यमानलाजानुकारिण्यः, ("भृज्यधूमलौ कृष्णलोहितः" इत्यमरः)। ताभिस्ताराभिः, खिचितं सञ्जातकुष्ठमिव, वियदराजत, ("कोठो मण्डलकं कुष्ठं स्त्रियः" इत्यमरः) खिचितमिति पाठे—सञ्जातचित्रम्। दीर्घोच्छ्वासो दीर्घपरिच्छेदः, तद्रचनया आकुलं व्याप्तम्; यद्वा—दीर्घोच्छ्वासरचनानां कुलं गृहं, शोभनः श्लेषोऽलङ्कारो गुणविशेषो वा, वक्रं छन्दोभेदः, तद्रचनापटु सत्कविसत्काव्यमिव; पक्षे—दीर्घोच्छ्वासेन सङ्कीर्णकुलजं, रचनया आकुलं व्याकुलम्; सुश्लेषवक्रघटना शोभनः श्लेष आलिङ्गनं यत्र ताडनौ, वक्रघटना मुखसंयोजनं, तत्र पटु चक्रवाकमिथुनमतीवाखिद्यत, ("आख्यायिका परिच्छेद आश्वासोच्छ्वासकावपि" इत्युत्तरतन्त्रम्। "कुलं जनपदे गृहे। सजातीयगणे गोत्रे देहेऽपि कथितं कुलम्॥" इति विश्वप्रकाशः) "एकरूपेण वाक्येन द्वयोर्भणनमर्थयोः। तत्रैव यत्र शब्दैः श्लेष इत्यभिप्रेतः॥" इति भोजराजः। "श्लिष्टमसृष्टश्लेषितम्" इति गुणप्रकरणे दण्डी। "वक्रं नाद्यावसौ स्यातामन्त्येऽनुष्टुभि ख्यातम्" इति केदारः। ("पटुस्तीक्ष्णेऽस्फुटे दक्षे निष्ठुरे निर्दशेऽपि च" इति वृद्धः)। कमलिनीवनसञ्चरणैर्लग्नमकरन्दबिन्दुलुब्धा शुब्धा सती, मुग्धा रम्या, मधुकरमाला तथा शबलं चित्रं, गात्रं यस्य तत्। कालपाशेनेव मूर्त्तरामशापेन वा सम्यक्, यद्वा रात्रौ न मिलतस्तया क्रम्यमाणं चक्रवाकमिथुनं विजघटे विघटितम्। रविविरहविधुरायाः कमलिन्या हृदयमिव चक्रवाकमिथुनं द्विधा पपाट, [घट पट गतौ]। कुमुदिन्याः पार्श्वे सञ्चरन्ती भ्रमरमाला आगमिष्यतो हिमकरदयितस्य चन्द्रप्रियस्य, दूतीवालक्ष्यत, [सञ्चरन्ती-

व्याजादस्तङ्गतस्य दिवाकरस्य शोकादिव स्थूलाश्रुबिन्दुभिः काकुभो व्यरुदन्। भास्वतो निजदयितस्य विरहादभिनवकिञ्जल्करात्रिव्याजेन मुर्मुर इव नलिनी कोषहृदये जज्वाल। रविरश्मिभस्मितनभोवनमसीराशिरिव, श्रुतिवचनमिव परिहृतदिगम्बरदर्शनं, सद्यो द्राक्षितराजपट्ट इव, समुद्रप्रवाह इव, ग्रावरमन्धकारं व्यजृम्भत।

क्षणेन च क्षणदाराजकन्यकाकन्दुकः, कन्दर्पकनकदर्पणः, उदयगिरिबालमन्दारपुष्पस्तबकाकृतिः, प्राचीललाटतटकुङ्कुमबिन्दुचक्राकारः, कनककुण्डलमिव नभःश्रियः, दिव्यवधूप्रसाधिकाहस्तस्खलत्तालक्तकपटलमिव, गगनसौधकनककुम्भ इव, प्रस्थानकनककलश इव त्रिभुवनविजयविनिर्गतस्य मकरकेतोः,

---

त्यत्र तृतीयाप्तेन योगाभावात् "ममस्तनीयायुक्तात्" इति नात्मनेपदम्]। अस्तङ्गतस्य दिवाकरस्य शोकात् ककुभस्तारव्याजेन व्यरुदन्। कमलिनी कोषहृदये भास्वतो निजदयितस्य विरहादभिनवकिञ्जल्करात्रिव्याजेन मुर्मुर इव तुषानल इव, जज्वाल, ("मुर्मुरस्तु तुषानले" इति वैजयन्ती)। रविरश्मिभस्मितनभोवनस्य मसीराशिरिव। श्रुतिवचनमिव वेदवाक्यमिव, परिहृतं दिगम्बरस्य बौद्धस्य, दर्शनं शास्त्रं येन तत्; पक्षे—दिगम्बरश्रीः दिगाम्नायश्रीः, दर्शनं येन तत्। आर्षं आर्षदीसत्वम्, [श्रीपत्वेन विवक्षायामण्। भवे तु ठञ् स्यात्] एवं आर्षस्य तमसो निर्हत्य इत्यादयो व्याख्याताः। तमो व्यजृम्भत।

क्षणेन रजनीपतिरुदयमासादयत्यर्थः। क्षणदा रात्रिः कन्यका कन्दुको गेन्दुकः, ("गेन्दुकः कन्दुकः" इत्यमरः) "गेन्दा" इति "गालसमुरिया" इति भाषायाम्। कन्दर्पस्य कनकदर्पणो मुकुरः, ("दर्पणे मुकुरादर्शौ" इत्यमरः) कनकपटं रक्तत्वेन साम्यार्थम्। उदयगिरिबालमन्दारपुष्पस्तबको नव्यमन्दारगुच्छकः, तदाकृतिः, ("स्याद्गुच्छस्तु स्तबकः" इत्यमरः) बालपदमारूढ्यातिशयाय। प्राचीललाटतटे कुङ्कुमबिन्दुचक्रवदाकारो यस्य, ("चक्रं कुङ्कुमम्। काश्मीरजन्माग्निशिखम्" इत्यमरः)। नभःश्रियः कनककुण्डलमिव कर्णवेष्टनमिव, ("कुण्डलं कर्णवेष्टनम्" इत्यमरः)। दिव्यवधूनां प्रसाधिका तद्वत् तस्मात् स्खलत्तालक्तकपटलमिव

कन्दर्पकार्त्तस्वरतूणमुखकान्तितस्करः, प्राच्यशैलशिखराग्रप्ररूढ़-जपाकुसुमच्छविः, स्वच्छकुङ्कुमपिण्डपूर्णपात्रमिव निशा-विलासिन्याः, कुङ्कुमाक्तैकस्तनकलश इवाखण्डलाशाङ्गनायाः, क्षीरसिन्धुरिव हरिणाधिष्ठितः, राम इव लक्ष्मणान्वितः, सुग्रीव इव तारापतिः, सुराजेव रक्तमण्डलः, उदयारुणमण्डलः, रजनी-पतिरुदयमासासाद। ततः कामिनीहृदयसङ्क्रामित इव, चकोराङ्गनानेत्रपुटपीत इव, रक्तकुमुदकोषलीढ़ इव, क्षौमतां क्षणदाक्षतो जगाम रामः।

अनन्तरं शर्वरीव्रजाङ्गनाऽऽविष्कृतनवनीतस्वस्तिक इव, कुसुमकेतोः मुखच्छायामुद्रितमुकुर इव, श्वेतातपत्रमिव मकर-केतोः, दन्तपालिचक्रमिव वियन्महाऽसेः, श्वेतचामरमिव मदन-

---

गगनेति स्यटम्। प्रस्खानवनकेति च। कन्दर्पस्य कार्त्तस्वरतूणमुखकान्तेः सुवर्ण-निषङ्गमुखशोभायाः, तस्करोऽपहारकः, तच्छेष्टत्वादिति भावः, ("तूणीपासङ्ग-तूणीरनिषङ्गाः" इत्यमरः)। प्राच्यां भवः प्राच्यः शैलस्तच्छिखराग्रे प्ररूढं जपा-कुसुमं तच्छविः, ["दृश्यतेऽर्थे" इति यत्] ("कोडपुष्पं जपापुष्पम्" इत्यमरः)। स्वच्छकुङ्कुमेन पिण्डं सान्द्रं, पूर्णपात्रमिव निशाविलासिन्याः, ("पिण्डं सान्द्रे बले काले तूलेऽपि परिकीर्त्तितम्"। "पूर्णपात्रं वस्तुपूर्ण-पात्रे वद्वांचकेऽपि च" इति हैमोऽपि विश्वः) कुङ्कुमाक्तैकस्तनकलश इवाखण्डलाशाङ्गनाया इन्द्रदिगङ्ग-नायाः, ("आखण्डलः सहस्राक्षः" इत्यमरः)। क्षीरसिन्धुरिव हरिणा विष्णुना, अधिष्ठितः; पक्षे—हरिणेन। राम इव लक्ष्मणेनानुगतः; पक्षे—लक्ष्म्या चिह्नेन। सुग्रीव इव तारा तन्नामिका स्त्री; पक्षे—तारा नक्षत्राणि। सुराजेव रक्तं मण्डलमनात्यादिसमूहो यस्य; पक्षे—मण्डलं बिम्बम्। उदयेनारुणं मण्डलं बिम्बं यस्य सः। ततः कामिनीहृदये सङ्क्रामित इव। चकोराङ्गनाभिर्नेत्रपुटैः पीत इव। रक्तकुमुदकोषैर्लीढ़ इवास्वादित इव। क्षौमतां जगाम क्षणदाक्षतो रात्रिसम्बन्ध-मण्डलत्वं क्षौमिकत्वम्।

अनन्तरं शर्वरपतिसम्बन्धः, उज्जगाम। शर्वरी व्रजाङ्गना गोपी, तस्या आविष्कृतः नवनीतस्य स्वस्तिकचतुष्कमिव, "चौक्र" इति भाषायां, ("नवनीतं नवोद्धृतम्" इत्यमरः। "स्वस्तिको मङ्गलद्रव्ये चतुष्कचतुर्भेदयोः" इति विश्वप्रकाशः)।

महाराजस्य, वालुकापुलिनमिव निर्मायमुनायाः, स्फाटिकशिलेव गगनमहातापसस्य, भस्मेव कालोरगस्य, कस्तूरिव नभोमहार्णवस्य, चैत्यमिव मदनारिदग्धस्य मकरकेतोः, चिताचक्रमिव कलङ्काङ्गारशबलं सङ्कल्पजन्मनः, गगनगामिगङ्गापुण्डरीकमिव, अम्बरमहार्णवफेनपुञ्ज इव, पारदपिण्ड इव कालधातुवादिनः, राजतकलश इव दूर्वाप्रवालशबलः, कन्दर्परथचक्रचारुः, अम्बरप्रासादस्य पारावत इव, उदयाचलचारुचूडामणिरिव, ऐरावतलुप्तसिन्दूरकुम्भस्थलमिव, भग्नशृङ्गपुराणगोमुण्डखण्ड इव तारकाक्षेतगोधूमशालिनो नभःक्षेत्रस्य,

---

कुसुमकेतोर्मुखच्छायामुद्रितो मुकुर इव। नक्षत्रकेतोः श्वेतातपत्रमिव। विद्यन्महाऽऽसेराकाशखड्गस्य, [पाशयतीति पाशिः, पाश रज्जौ, ख्यन्तः, अच इः] इन्द्रस्य गजदन्तस्य, पाशिर्गजदन्तमयः कक्कर इति यावत्। मदनमहाराजस्य श्वेतचामरमिव, ("चामरं तु प्रकीर्णकम्" इत्यमरः)। निर्मायमुनाया वालुकापुलिनमिव। मदनमहातापसस्य स्फाटिकशिलेव पूजार्थं स्फाटिकमयग्रिवलिङ्गमिव। काल एवोरगः कालोरगः, तस्याङ्गमिव। नभोमहार्णवस्य कस्तूरिव मृग इव। मदनारिणा शिवेन, दग्धस्य मकरकेतोश्चैत्यमिव, ("चैत्यमायतने बुद्ध-गृहे चाद्दश्यपादपे" इति विश्वः)। कलङ्काङ्गारः, यद्यपि "अङ्गारोऽलातमुल्मुकम्" इत्यमरः, साग्निकाष्ठसङ्गारः, "अङ्गारवन्तिमिव व्यथमानमास्ते" इति प्रयुक्तं भवभूतिना, तथाऽपि निरग्न्यग्निदग्धं श्मशानं काष्ठनिष्ठाङ्गारपदेन विवक्षितं योग्यत्वात्, "कोइला" इति भाषायां, तेन शबलं चिताचक्रमिव सङ्कल्पजन्मनः; एतादृशेऽर्थे श्रीहर्षेण देशीय "इङ्गाल"शब्दः प्रयुक्तः, "चितेन्धनेङ्गालनिवापयत्नः परः" इति)। गगनगामिगङ्गाया मन्दाकिन्याः, पुण्डरीकमिव सितान्भोजमिव, यदत्र वक्तव्यं तदग्रे वक्ष्यते। अम्बरं व्योमैव, महार्णवस्तत्फेनपुञ्ज इव। कालधातुवादिनः पारदपिण्ड इव। दूर्वाप्रवालशबलो राजतकलश इव, दूर्वाप्रवालेति कलङ्कसाम्यात्। कन्दर्परथचक्रचारुः। अम्बरमेव प्रासादो राजगृहं, तस्य पारावत इव, (राजप्रश्नरत्ने "प्रासादो देवभूभुजाम्"। "पारावतः कलरवः कपोतः" इति द्वयोरप्यमरः)। उदयाचलचारुचूडामणिः। ऐरावतस्य लुप्तसिन्दूरं सृष्टसिन्दूरं, कुम्भस्थलमिव। श्वेतगोधूमैः, श्वेतत्वं तारासाम्यात्, "आविली गोहूं" इति भाषायां, शालिनः शोभमानस्य, नभःक्षेत्रस्य भग्नशृङ्गः, भग्न-

मलयजपिण्डपाण्डुरराजतपात्रमिव सिद्धाङ्गनाहस्तसख्तं, ग्रह-पतिरुज्जगाम। यस्य पुण्डरीकं लोचनमधुकराणां, प्रयत्नीय-सेकतमिव चित्तहंसानां, स्फाटिकव्यजनं विरहवक्षोनां, श्वेत-माणचक्रं मन्मथसायकानाम्।

अत्रान्तरेऽभिसारिकासार्थप्रहितानां प्रियतमान् प्रति दूतीनां दुरर्थाः सेर्ष्याः सप्रपञ्चा विकारभङ्गुराः प्रवादा बभूवुः। तथा हि, अवस्त्रोक्षतमात्मानं नाकलयसि तत्त्वतः? कान्त!

विशाखत्वं वर्तुलत्वार्थं, पुराणचर्मरहितः, गोमुण्डखण्ड इव, सौमनिर्माणार्थं रचार्थं वा चेत्रे गोमुण्डः सभारोप्यते। सिद्धाङ्गनाहस्तात् सख्तं भष्टं, मलयजेन घृष्टचन्दनेन, पिण्डं चूर्णम्, अत एवातिपाण्डुरं राजतपात्रं रौप्यपात्रमिव; यद्वा—मलयजपिण्डैर्घृष्ट-चन्दनगुटिकाभिः, पाण्डुरमित्यादि; उभयत्र भंगनवर्णं चन्दनपङ्कबिन्दवो गुटिका वा तारा विकीर्णा इति ध्वनयितुम्। लोचनमधुकराणां पुण्डरीकमिव; वर्तुलत्व-साधितसाम्यार्थं विकासपर्य्येलमायद्देतु कुमुदम, एवं पूर्वत्रापि। चित्तहंसानां प्रयत्नीयसेकतमिव प्रयत्नाद्देसिकतानयद्देश इव। विरहवक्षोनां स्फाटिकव्यजनं, तत्सन्धचक्रत्वादिति भावः, अत्र व्यजनं वर्तुलमग्रिसन्धुचक्रं विवक्षितं, "छित्तनी" इति भाषायाम्।

अथान्तरे मानिनीमानपाटनपटुकुमुदिनीकान्तोदयावसरे, अभिसारिकासार्थ-प्रहितानां ज्योत्स्नाऽभिसारिकासमूहप्रेषितानां, दूतीनामन्योऽन्यसङ्कटनविरह-निवेदनादिकर्मकुशलानां, प्रियतमान् प्रति वल्लभान् प्रति, दुरर्था उपालम्भाऽऽवर्जन-रूपार्थदुष्टोपेताः, सेर्ष्याः उपालम्भे, विकारैर्मदनविकारजन्यैश्चित्तवृत्तिविशेषैः, भङ्गुरा मानावस्थायामिव न केवलं पुरुषा एवापि तु किञ्चित्स्खापराधव्यङ्ग्या इत्यर्थः, आवर्जने इदम्; सप्रपञ्चा वक्रोक्त्यादिसहिताः, प्रवादाः प्रकृष्टवैदग्ध्यविशिष्टा वादाः, बभूवुः, ("रतार्थिनी तु सङ्केतं याति या साऽभिसारिका" इति रसरत्नहारः)। उपालम्भे प्रत्यक्षस्तुतमयीत्यादि स्वगुणं प्रकटयन्नाह, अवस्त्रोक्षतं कौपीनावशेषीकृतम, [भङ्गुरा भङ्गेतिवदत्रापि नञर्थः, उक्तं च—"तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः॥" इति] आत्मानं तत्त्वतो नाकलय-यसि? न जानासि? यथा धनलुब्धया कामनञ्या मलमलक्षीषो वसुपालितो-ऽपवाहितस्तथा त्वयापि मा मतिर्भविष्यतीति वक्ति, आत्मानमित्यादि; यद्वा—

स्त्रीणां कृतं कार्मणादि कर्म, [कृतमिति कृञः कर्मणि क्तः] तत्त्वतो नाकलयस्यत आत्मानमव रच ; यथा कामसञ्ज्ञया आत्मानमवन् रचन् स महर्षिमरीचिः सैवक इव परिभाषितस्तथा त्वमपि भविष्यसीति ब्रवीम्यात्मानमवेति ; स्पष्टं चैतदपहारवर्म-चरिते ; ("मृषाकर्म तु कार्मणम्" इत्यमरः) वैग्रियं सत्वेदमभिधाय कृत्रटासक्तं सत्याऽभिधत्ते—आत्मानं प्रत्यवतीत्यवा, [अवेः कर्त्तर्यच्] सा चासौ स्त्री अन्यदन्ती, तया कृतमवस्त्रीकृतं नीचनारीकर्म, भृङ्गकीटन्यायादतिस्त्रीसेवनात् त्वं स्त्रीव परेत्यायसे इति गदति—अवेत्यादि, अवस्त्रीकृतं बधकयोर्विडूतम्, आत्मानं तत्त्वतो नाकलयसि ; आवर्जने—सितत्त्वतो बहुत्वाद्वेतोः, [विज् वर्जने, क्तः] त्वमेव मम प्रिया नान्येत्यव अपथ इति अपथकपपाठादित्यर्थः, [सितत्वत इत्यत्र "झरो झरि" इति पाठिकसत्कारलोप इति तु जगदेरव्य प्रमाद एव, "अनचि च" इति तकारद्वित्वे रूपसाम्य बोध्यम] अवस्त्रीभ्यो नीचस्त्रीभ्यः, कृतं पर्य्याप्तम, आत्मानं नाकलय मा जानीहि, मत्सख्येव त्वमभिलषते इति त्वं नीचनारीवस्त्री मा भूरिति भावः, ("कृतं युगेऽपि पर्य्याप्ते विहिते हिंसिते फले" इति विश्वप्रकाशः) कं सुखं, सुखकारी, लयः संश्लेष आलिङ्गनं विलासो वा यस्य सः, न कलयोऽकलयः, न अकलयो नाकलयः, त्वत्तो मत्सख्या अन्यथा, सितं बहु, स्त्रीकृतं स्त्रीभ्यः पर्य्याप्तम, आत्मानम, अव प्रीणय, मत्सख्या सह रतिं विधायात्मानं सन्तोषयेति भावः ; ("कं मूर्द्धसुखवारिषु" इति। "लयो विलासे संश्लेषे" इति च विश्वप्रकाशः) यद्वा—नाकस्य दुःखस्य, लयः संश्लेषः, सम्बन्धो यस्य, ("अकं पापे च दुःखे च" इति विश्वः) यद्वा—अस्य वासुदेवस्य, यो वक्षोऽवः, तत्र स्त्री लक्ष्मीः, तया कृतं पर्य्याप्तम्, अवस्त्रीकृतं लक्ष्मीपूर्णम्, आत्मानं तत्त्वतो नावलयसि ? जानासि चेत् कथं तां परित्यज्यान्यवासक्तो भवसि ? ("अकारो वासुदेवः स्यात्"। "वक्षः-स्थले च वः प्रोक्तः" इत्येकाक्षरदयम्) "यमकश्लेषचित्रेषु वयोर्ऽलयोर्न भित्" इत्यनु-शासनाद्भेदाभावेनावार्थान्तरवर्णनम ; यद्वा—सितत्वतो बहुत्वाद्वेतोः, अर्थात् तया प्रेम्णा बहुत्वादवस्त्रीकृतमात्मानं नाकलय, सा किल त्वां धनेनाप्यविष्यतीति अध्यम ; यद्वा—सितत्वाद्वतो बन्धविशेषबहुत्वात्, स्त्रीकृतमात्मानं नाकलय, अव तत्समीपे गच्छ ; यद्वा—नाकस्येवाकाशस्येव, लयः संश्लेषो यस्य, निरवकाशस्येत्यर्थः, ("आकाशे विदिवे नाकः" इत्यमरः) यद्वा—केन सुखेन, लयो विलासः, तेन सितो बहुलत्वात्सञ्जीवनम् ; त्वत्तोऽन्यस्य स्त्री न, [सर्वनामीरन्यार्थकयोरुल्लतोः सखिवत्तस्य पञ्चम्यत्तस्य प्रयोगो यथायथं बोध्यः] यथा पतिव्रतया नाकपतिः सेव्यते, एवं पराङ्गना विदग्धेन सेवनीयेत्यर्थः, कृतं मिथ्याभाषणादिना हिंसितम,

प्रस्तर इव क्रूरोऽसि, न चाकर्षकचुम्बकद्रावकेष्वेकोऽसि, भ्रामको-ऽसि परम्। कितव! धर्मार्थान्यप्रयुक्तः वैपणिक इव मुधा

आत्मानमव द्योतय, सत्यसन्धावधात् तेजोऽभिद्रह्यिर्गायते इति तदाचरति व्यक्तम्; [कृञ् हिंसायाम्] यद्वा—कि जले, क्रयो विलासः, तेन सितावगतः जलक्रीड़ा-विदितः, ("सितस्त्वसिते वद्धे सिता शर्करा" इति हैमः। "सितः समासे धवले विवस्वत्सारथेरपि" इति विश्वप्रकाशः) यद्वा—नाके स्वर्गे, क्रयो विलासो येषां ते नाकलया देवाः, तद्वत् सितावगतः; यद्वा—अवस्त्रीकृतं स्त्रीहिंसितम्, आत्मानं तत्त्वतो नाकलयसि? पूर्वं तथैव धनदानादिना सर्वसृष्टपोषतानादादितः, इदानीं तामिवायासयसि? सा दरिद्रावस्था ते किं विस्मृता? इति व्यक्तम्; क्रय्य जलक्रय, क्रयो विलासो नौचरमनरूपः, तेन सितावगत नौचरमनप्रसिद्ध, स्त्रीकृतं स्त्रीहिंसितम्, आत्मानमव; यद्वा—अकारो वासुदेवः, तेन तुल्यमव, इवार्थे वः, अव कृष्ण इव, स्त्रीकृतं स्त्रीपर्यायम्, आत्मानं तत्त्वतो नाकलयसि? अन्यासिः सह क्रीडां करोषि चेत् कृष्ण, परन्तु तत्सख्याऽपि सह क्रीडां कुर्विति भावः, ("व वा यथा तथेवेवं साम्ये" इत्यमरः) यद्वा—सितत्त्वतो धवलत्वाद्धेतोरेव, कृष्ण इव स्त्रीकृतं स्त्रीपर्यायम्, आत्मानं नाकलय, तदीयशरीरवर्ण एव त्वच्छरीरे नास्ति, क्रयं तदीयसानर्घ्यमिति भावः; यद्वा—येन यशसा, सितत्वं तत्तात्, नाके स्वर्गे, स इवेन्द्र इव, स्त्रीकृतमात्मानमव, ("यज्ञो यः खचितः श्रिष्टेः"। "स इन्द्रः" इत्येकाक्षरकोषः) ["अव रक्षे गतौ कान्तौ घोतौ तृप्तौ श्रुतौ। प्राप्तौ प्रेषेऽर्थने वेष्टे भागे तृप्तौ यङि वधे॥ स्वाम्यर्थेऽवगमे कामे क्रतौ" इति कवि-कल्पद्रुमः]। दूतीसंवादवाक्येक-व्याख्यादिदर्शिता मया। यत्यबाहुल्यभीतेन नैकस्मं स्वधियाऽधिकम्॥ हे कान्त! क्रय सुखय, क्रतो यस्मात्, प्रस्तर इव क्रूरोऽसि पाषाण इव कठिनोऽसि, निष्ठुरहृदयोऽसि, तथापि न चाकर्षको यत्सम्बन्धात् प्रस्तुतमपि लोहं निःसरति, अयस्कान्तमणिचुम्बको यत्सम्बन्धाल्लोहमुपगच्छति, सूर्यकान्तो वा सूर्यकरानिसृष्टयज्ञायासम्बन्धादिन्धनादावग्निमत्पद्यते, द्रावको यत्सम्बन्धाल्लोहं द्रवति, चन्द्रकरस्पर्शात् स्वयं द्रवति स चन्द्रकान्तो वा, भ्रामको यत्सम्बन्धाल्लोहं भ्रमति, स "गुरिया" इति ख्यातः, "पुच्छको द्रावकश्चाकर्षको भ्रामकस्तथा। एकाद्विचतुःपञ्च-षण्मुखाः सन्त्यमी ते॥" इति लोकप्रसिद्धेः; भ्रामकलोकोक्तेन यो नारीनाकर्षति स चाकर्षकः, रतिकोक्तेन यश्चुम्बति स चुम्बकः, औषधिविशेषयोगेन कृत्रादिनदर्शनेन वा यः कठिनमपि द्रावयति स

वाञ्छितवरवारिरिक्तमसि। सखेदमिव मनसा चिन्तयसि दुर्लभं जनम्। सत्त्वनारचरितो यो रिपुमण्डलाग्रतो निर्वृतिमुपेत्य तिष्ठति। स खलु वीरः प्रतिपक्षस्य यः सम्प्रहारतः कुञ्जरान्

द्रावकः, एतेषु नैकोऽसि, परं केवलं, भामकोऽसि, अन्यासक्तो योऽन्यनारीं भामयति प्रतारयति, स भामकः; कस्य मनुश्चित्तः, अन्तो यस्मात् कान्तः, आकर्षको धनुराकर्षकः, चुम्बकः सैन्यप्रवेशकः, द्रावकः परसैन्यविद्रावणः, तेषेकः श्रेष्ठः, असि, भामकोऽस्मादीनाम्, असे खड्गस्य, भामकी वा; कान्त! मनोहर! न प्रस्तर इव क्रूरोऽसि, प्रार्थितः सन्नपराधान् क्षमसे, आकर्षकचुम्बकद्रावका इवो बाणा यस्य स कामः, सप्तमीकोऽष्टितीयः, असि, भामकी नारीषेतसाम्, ("एकोऽष्टितीयौ श्रेष्ठे च"। "क्रूरो कठिननिर्दयौ" इत्यमरवापि विश्वः)। धर्मार्थमन्येन केनचिद्धर्मिष्ठेन राज्ञा सामरिकादिना वा, प्रयुक्त भातरं विना आक्षत्रजनान् परवारे नयेति प्रेरितः, वैषयिको लाविक इव, सुधा वृथा, वाञ्छिततरं वारि जलं येन तादृशः, अत्र खामिन एव धर्मो न लाविकस्येत्यर्थः; सुधा वाञ्छिततरं वारि जलं येन वा, तदनुरञ्जनदशायामिति भावः, अतिस्त्री सेवतिवदुपहासार्थं सेव्यर्थोक्तं, न तु तत्त्वकथनं, रसाभासापत्तेः; यद्वा—सुधा वाञ्छिततरवारिः खड्गो येन; आवर्जने—कितव! विदग्ध! धर्मार्थं धर्मप्रयोजनं, सुधावा अथवेनाः, अर्थिताः प्रार्थनो यस्य, अन्येन मनुष्या, प्रयुक्तं शस्त्रादि, तत्तेषर्थिको लाभकः, तरवारिः खड्गः, तद्वत् क्रूरः, धर्मार्थाद्धर्मप्रयोजनात्, अन्येनाधर्मेण, प्रयुक्तः; यद्वा—त्रिवर्गे धर्मार्थाभ्यामन्यः कामः, तेन प्रयुक्तः, ("कितवो द्यूतकरेऽक्ष-विदग्धेषु निगद्यते"। "तरवारिर्मतः खड्ग" इति धरणिहृदयम्। "सुधा तु निष्फलं वृथा" इत्यमरः)। तूष्णीं स्थिते पृच्छति—सखेदं सकष्टं, मनसा दुर्लभमिव जनं नायिकाऽन्तरं, चिन्तयसि; सखे! मित्र! दलित इव खण्डितमिव, सम्बोधने—सखे! दलित कलत्रमिव, दुर्लभं जनम्, ("इकार उच्यते कान्तः"। "द कलत्रे बुधैः प्रोक्तं क्षैत्रे दाने च दातरि" इत्येकाक्षरकोषे उभयत्र। "दः खण्डे दोऽवदाते च दातरि च्छेददानयोः" इति विश्वप्रकाशः)। स त्वसारचरितस्तुच्छव्यवहारः, या अगन्ति ता अगः, मनसलक्षणो मनसाम: कुलटा, रिपुभूता मनसामो रिपुमनसामः, तासु रतो रिपुमनसामरतो निर्वृतिं सुखम्, उपेत्य तिष्ठति, [अत्र अग कुटिलायां गतौ] यद्वा—निर्गता वृतिरावरणं यस्मात्तां निरावरणां वेश्याम्; वीरनिन्दायां—रिपुमनसामरतः अनुखड्गात्, निर्वृतिं सुखं, मधुपा मद्ये धृते सुखी तिष्ठतीत्यर्थः, निर्वृतिं चेलादेरावरणं वा, भयादुपेत्य; प्रहारे—

नयति। धृतोरुकरवालसख्योऽपि परमकाण्ड एव सम्यतन् महापदं विग्रहेण लभते। राजसेन रहितो राजसे न रहितो

—सत्त्वेन गुणेन, सारचरितो यो रिपुमण्डलायतः शत्रुमण्डलायतः, निर्हर्तिं जीविताम्; यद्वा—रिपुमण्डलायतः सपत्नीसमूहायतः, [सप्तम्यर्थे तसिः] निर्गता इतिरन्यपुरुषान्तरवरणेच्छा यस्याः, मत्स्वामी तामुपेत्य तिष्ठति, ["वर्त्तमान-सामीप्ये" इति लट्] पूर्वमन्याः सपत्नीरनादृत्य त्वं तस्यासेवानुरक्तः स्थितः, इदानीं तवैव कर्त्तव्यं त्वयैति द्योतति, ("द्योद्येयो मण्डलायः करवालः कृपाणवत्" इत्यमरः। "मण्डलं देशसङ्घयोः" इति विश्वः। "निर्हर्तिस्तु सुखे द्योद्ये अभवे मरणेऽपि च" इति धरणिः)। अपरा आह—स खलु वीरः शूरः, यः प्रतिपक्षस्य शत्रोः, सम्यक्प्रकारतः कुञ्जरान् गजान्, नयति; यद्वा—वि विशेषेण, दूरयति, दीर्घं पथिनो वा, दूरयतीति वीरः, सम्यक्प्रकारतो गमनात्, ("सम्यक्प्रारो रणे गतौ" इति हैमः) [दूर गतौ कम्पने च]; यद्वा—विशिष्टा इरा मद्यं यस्य मद्यप इति यावत्, ("इरा भूमिसुरावाणि-भारतीषु प्रयुज्यते"। "कुञ्जरोऽनेकपे केशे धातक्यामपि कुञ्जरा" "वीरस्तु सुभटे श्रेष्ठे वीरो भल्लातरेऽपि च" इति विश्वप्रकाशश्लिष्टेषु) प्रतिगतः पक्षं प्रतिपक्षो बलं तस्य; यद्वा—प्रतिपक्षस्य सख्युः सहायस्य वा, ("पक्षो मासार्द्धके शीर्ष-पार्श्वे साध्यविरोधयोः। केशादेः परतो हन्दे बले सखिसहाययोः॥ पतत्रे चुल्लीरन्ध्रे च देशाङ्गे राजकुञ्जरे॥" इति विश्वप्रकाशः) यद्वा—वि विशेषेण, दूं कामम्, दूं लक्ष्मीं वा, रात्यादत्ते वीरः, ("इकारः कथ्यते कामो लक्ष्मीरीकार उच्यते" इत्येकाक्षरकोषः) सम्यक् प्रकृष्टः, अत्युत्कृष्टः, हारो मुक्तादिमाला तान् सम्प्रहारतः, [द्वितीयार्थे तसिः] कुञ्जरान् केशान्, नयति, ("हारो मुक्तावली युद्धे" इति विश्व-प्रकाशः) यद्वा—सम्प्रहारतोऽत्युत्कृष्टरतियुद्धे, [सप्तम्यर्थे तसिः] ("खलु स्यात् प्रतिषेधेऽपि निश्चयेऽप्यवधारणे" इति विश्वः)। अन्या आह—धृत उरुकरेण विशालहस्तेन, बालानां शत्रुकेशानां, सञ्चयो येन; यद्वा—धृत उरुमण्डान्, करवालस्य कृपाणस्य, सञ्चयो येन; यद्वा—ऊरुपर्यन्तौ करावूरुकरौ, ताभ्यां धृतो बालानां प्रतिपक्षसत्कीकेशानां, सञ्चयो येन, आ-जानुबाहुरित्यर्थः; यद्वा—धृत उरुकरेण भूरिराजभाग्येन, बालानामज्ञानां, सञ्चयो येन; यद्वा—धृत उरुकरेणोरु-करार्थो वा बालानां सञ्चयो येन; यद्वा—धृत उरुकरबालानां सञ्चयः, सुरतबन्धे, विग्रहेण शरीरेण कलहेन युद्धेन पथिपरिश्रमेण वा, महापदं महाज्ञानं महापत्तिं वा, पुरं प्रति, परमत्यन्तं वा, अकाण्डेऽनवसरे, पुरमकाण्डे उत्कृष्टावसरे वा, ("विग्रही

ध्रुवम्। विशारदा विशारदाभ्रविशदा विशदात्मनीनमहिमा महिमानरक्षणक्षमा क्षमातिलक! धीरताधीरता मनसि भूतता-भूतता वचसि। साहसेन! साहसेन कमला कमलापराजिता-

---

युधि विस्तारे प्रविभानशरीरयोः" इति हैमः)। अपरा आह—राजसे रजोगुण-विकारे इति, अनरहितो मनुष्यालक्षणः, त्वं न राजसे, रहितो मत्सख्या जनैर्वा त्यक्तः; [रह त्यागे क्तः] यद्वा—राजसेन [प्रज्ञाद्यणि] रजोगुणेन, रहितो नूरहितो मनुष्यहितः, न राजसे ध्रुवम्; यद्वा—राजसः रजोगुणप्रधानः, इनरहितोऽप्रमुख्यं, न राजसे, यतो रहितः प्रभुणा त्वया, नरेषु हितो राजसे ध्रुवम्। ("ध्रुवं तु निश्चिते तर्के निश्चले शाश्वतेऽव्यये" इति विश्वप्रकाशः)। यमकालङ्कारः। अन्या आह—विगता शारदा सरस्वती यस्य तत्सम्बोधनं, धृष्टौ वा चतुरौ वा, ("विशारदो बुधे धृष्टे" इति विश्वप्रकाशः) स्त्रीविशेषणं वा, वि विशिष्टः, शारदोऽभ्रो मेघः, तद्विशदा निर्मलान्तःकरणा, विशन् प्रविष्टो भवन्, आत्मनीन आत्महितः, महिमा महित्वं यस्याः, मह उत्सवो येषां ते महिनः, तेषां मानरक्षणे सम्मानपालने, क्षमा, क्षमातिलक! पृथ्वीभूषण! भ्रान्तिलक! वाङ्मः भ्रान्तिप्रदर्शक! तव मनसि धीरता बुद्धिरता, सार्वकालिकीत्यर्थः, अधीरता कातरता, वचस्यभूतताऽसत्यता, भुवि पृथिव्यां, तता विस्तृता; यद्वा—चकारो वासुदेवः, तच्चाहृतलक्ष्मा इन्दर्वता; यद्वा—अवेव व्यवहारेण, मा लक्ष्मीः, सा तिलकमस्य; यद्वा—यच्चस्य विभोतलक्ष्म, मा लक्ष्मीः, तत्तिलक! ("अक्षः कर्षे तुवे चक्षे प्रकटव्यवहारयोः। आत्मजे पाशके चाक्षम्" इति विश्वप्रकाशः) विशेषेण शारं हिंसां, ददातीति विशारदः, [शृङ् हिंसायां घञ्] महिमा अनन्ति प्राप्नन्ति ते महिनाना मानधनाः, तेषां रक्षणवचन! हे धीर! ताताद्दृश्यः, धीरतास्व मनसि तव वचसि भूतता सत्यता, भूतता पृथ्वीख्याता, ("भूतं स्याद्धे विशाचादौ भूतं सत्योपमानयोः" इति विश्वः) विशारदाभ्रविशदा विशिष्टशरन्मेघस्वच्छा, निष्कपटहृदयेति यावत्, आत्मनि स्वविषये, विशिष्टं श्रं श्रेयः, यति विशदाः, [दो अवखण्डने] इनस्य सूर्यस्य, महिमा महत्त्वं यस्य तादृशस्त्वम्। ("श्रं श्रेयसि शकारः स्याच्छिवे सौम्ये प्रशोभिते" इत्येकाक्षरकोषः। "श्रं धर्मे आस्तु आस्तरि" इति विश्वप्रकाशः) ["आत्मनविश्वजनभोगोत्तरपदात् खः" इति खः] आत्मनीने। अपरा आह—सा मत्सखी, त्वामाह, हे सेन! सप्रभो! धरतल! सा मनसाऽपि नान्यमनुसरामीति प्रतिज्ञाविशिष्टाऽहम्, आहसेन भवदीये-नाहसेन, कमल सुखम्, मत्सा आधारपात्री, [मद मद धारयै पचाद्यच्] पराजिता

पराजिता। सा त्वदर्पणा दर्पणाकारविमलाभया भयाञ्जविनि-र्जितकिसलया सलयाङ्गुलिविभ्रमेण विभ्रमेण प्रतिगवाक्ष-ग्रलाकाविवरं विलोकयन्ती विलोकयन्ती। त्वया विना साविना

कमला लक्ष्मीर्यस्याः सा कमलापराजिता, [आहिताग्न्यादिः] अत एवापराजिता अत्यन्तीभौ रूपसुरतकौशलादिभिरपराभूता ; ("पराजितपराभूतौ" इत्यमरः) यदा—आहसेनेषवाहसेन, अपराजिता एतदभिधाना देवी, पराजिता पराभूता, कै मत्तमत्ताः कमला शिरोमालिन्यविशिष्टा, सीमन्तकर्मण्यनभिज्ञेति यावत्, ताहशी कमला लक्ष्मीः ; यदा—साहसेनाभिसरणकर्मेण, कमला लक्ष्मीः, तत्परा कमलापरा लक्ष्मेति यावत्, जिता, यया लुप्ता नाभिसरत्येवं प्रीत्या मत्स्यभिसरतीत्यर्थः ; ननु कुरूपा सा केनापि नाद्रियते इति सा स्वतो धावति न तत्र मत्पुङ्गवैरित्याह—आहसेन सा प्रसिद्धा, कमला लक्ष्मीः, पराजिता, मत्स्यस्येति शेषः ; सखीभावमाह —[सा आदाने] खातीति सा न सा अत्या लुप्ता, कं सुखम्, अपराजिता त्वया पूर्वं प्रीत्याहनाद्दीपिता ; [राजृ दीप्तौ] यदा—साहसेन आहसेन, युक्तेति शेषः, सा मत्स्यी, कमला वरस्त्री, आकमला बहुसखीका ; ("कमला तु वरस्त्रियाम्" इति अमरः) [इस इति "खनडसोर्वा" इत्यप्-प्रत्ययान्तः] यदा—यया परा कमला, पराजिता सा मत्स्याख्य, आ-हसेनेषवाहसयुक्तेन त्वया, जितमात्मान-माहेत्यर्थः, कीदृशी ? सेना सप्रभुः, कमला लक्ष्मीर्यस्यास्तया लक्ष्मीदानभोगादि-युक्ता, न लक्ष्मीकलक्ष्मीवद्दानभोगहीनेत्यर्थः। इतरा आह, त्वय्यर्पणमस्यास्त्वदर्पणा, दर्पणाकारो मुकुराकारः, आभयो यस्याः, भयाञ्जेन करकमलेन, विनिर्जितकिसलया जितनवपल्लवा, अङ्गुलिविभ्रमेणाङ्गुलिभ्रमणेन, सलया सविलासा, ("लयो विलासे रूपेषे साम्ये तौर्यत्रिकस्य च" इति विश्वप्रकाशः) मत्तादिषु ग्रलाका जलूनामागमन-प्रतिषेधार्थं प्रत्यूहाः काष्ठादिनिर्मिताः, तासां विवरं विवरं प्रति प्रतिगवाक्षग्रलाका-विवरं, विलोकयन्ती पश्यन्ती, विलोकवत् पक्षिजलवत्, आचरन्ती विलोकयन्ती, यथा पक्षिणः पञ्जरग्रलाकाऽन्तरेण पश्यन्त्येवं साऽपि भवानागतो न वेति गवाक्षग्रलाकाऽन्तरेण पश्यति ; गवाक्षग्रलाकाऽन्तरदर्शनं परकीयात्मद्योतकम् ; ("स्वाक्षाखडाऽपि मदल-मारिकाग्रन्थयोः ग्रदे। कूले पञ्जरकाष्ठे च" इति विश्वप्रकाशः) उक्तं च—" स्वानुढा-स्वानुरक्ता स्त्री परकीया निगद्यते। उत्तमाधममेदाभ्यां द्विविधेयं पराङ्गना॥ अनुक्तिताऽनुरागेया स्त्रीयाकल्पोत्तमा भवेत्। तद्विज्ञा त्वमना ज्ञेया तद्वेदा अपि ताः द्विधा॥ परोढ़ाऽनूढ़काभेदात् द्विविधा द्विविधा मता। विदग्धाऽविदग्धा चेति

सायमनुभवन्ती दुःखानि। जीवनायक! जीवनाय कं दृष्ट्वा नाश्वयन्ति सुभगम्?। अन्यास्तावदासतां दासतां पुरतोऽहमेव भजामि मैत्रतोऽमैत्रतोऽस्तु। अञ्जसारतः सारतः किमपि

ऽनुभवानाऽथ खचिता॥ युता च कुलटा चेति षट्प्रकारीदिता बुधैः॥" इत्यजल्कृते रसरत्नहारे; यत्तु अप्रकटपरपुरुषानुरागा परकीयेति तन्न, कुलटाया असङ्गात्; तथालक्षणपक्षे ऽञ्जसानाः, विस्मरेण भवनेन, ("स्वाच्छन्द्याऽपि मदन-कारिका-ग्रन्थयोः मरे। पञ्चरकाष्ठे च" इति विश्वप्रकाशः)। इतरा आह, अविना मेघेन, त्वया विना सायं सायङ्काले, दुःखानि त्वद्वियोगदुःखानि, अनुभवन्ती तिष्ठति, तामनुसरेति व्यङ्ग्यम्; धीरेयं, "स्त्रियं सोत्प्रासवक्रोक्त्या मध्या धीरा दृढव्रता" इति रसरत्नहारः; अविना रचकेन, त्वया विना दुःखान्यनुभवन्त्यतः सायं सादम्, अनुभवन्ती तिष्ठति; [अत्र रचकादौ, "सर्वधातुभ्य इनिः" इतीनिः। घोऽन्तकर्मणि, "आदेचः" इत्यात्वम्, "आतो युक्" इति युक्]। अन्या आह, जीवनायक! प्राणधारक! जीवनाय जलाय, जलाद्धरणार्थमित्यर्थः, सुभगं शोभनपशुं त्वां, के नाश्वयन्ति? (अन-मेश्वर्यमाढ्यात्मा-ज्ञानवैराग्यशोभिषु। षण्णवीर्य्यप्रयत्नेच्छा-शोधमैश्वरमुच्यते॥" इति विश्वप्रकाशः) अधीरोक्तिरियम्, "अधीरा पङ्कधीरा" इति रसरत्नहारः; अरे!— जीवनायक! नक्रस्त्रीराचेश्च! जीवनाय प्राणधारणार्थं, के जनाः, सुभगमैश्वर्ययुक्तं त्वां, नाश्वयन्ति? के इति पुंलिङ्गनिर्देशो यदि पुरुषाः जलप्राणधारणार्थं त्वामाश्वयन्ति तर्हि स्त्रीणां का वार्त्तेति द्योतयितुम्। अपरा आह, अन्यया नक्रस्त्रीतिरिक्तया, अतः खिन्नत्वात्सम्बोधनम्, अत एवाह! तस्यां स्त्रीणांदासभावेन! असतां परपीडा-ऽनभिज्ञानां, पुरोऽग्रे, दासतां दास्यम्, अहमेव भजामि, अतोऽमैत्रतोऽमित्रभावात्, मैत्रमस्तु; ("यदो यदावदो वक्ष्ये" इत्यमरः) यद्वा—अन्येष्वदयेषु जडेषु ग्राहारिमि-त्यन्यस्मिन्भिन्नां, अस्तां क्षिप्ता, तया सह वर्त्तते तत्सम्बोधनम्; यद्वा—अन्याम्! अत एव दास! पुरोऽहमेव भजामीति तां दासतां पूर्वस्त्रीत्वात् नक्रस्त्र्या दासताम्, अव रक्ष; यद्वा—अन्यासेनान्यनारीपरित्यक्तेन, अवदा अमावद्यकर्त्री, "निर्मांसोच्छ्रित-पुष्पदानिकरे का षट्पदानां रतिः?" इत्यहं सतामेव दासतां भजामीति; यद्वा—अवनमाय, [अव्] अन्याज्ञानामावहा रचयत्यरं, अन्यरचयरचेति यौगिकं, प्रीतिप्रदा वा दृष्टिप्रदा वा; यद्वा—अन्यस्त्री नक्रस्त्रीऽस्यास्ति अस्मिन्! [तत्पुरो नपुंसकानां नक्षीपो वा वाच्यः, "दाक्षिणः क्षासि हे सुभु!" इत्यैम

कन्दर्पकं दर्पकं न तनोषि विश्रेषतोऽश्रेषतः स्थितमेव मरणम्। अठधियां शोधन! यशोधन! प्रेमडार्य्यामडार्य्याश्रयोत्कटाचैः क्रटाचैराविर्भूतदाक्षात्तदाक्षाः परिजनाः!। कमलाकृतिनारीणां कमलाकृतिनारीणां भवता मुखं न मलिनितम्?।

स्वस्तुङिकस्यो यथा रामविरक्षातिशयपोषकसत्ता सर्वथा प्रयोजकत्वद्योतनाय नपुंसक-प्रयोगः] अना: प्राचिन:, तेभ्यो हितोऽना, ["तस्मै हितम्" इति यत्] सतामनदा, त्वयेति शेष:, अक्षा तिरस्कृता, दक्षाणां दाक्षतां भज, कीदृशी? पुरो मनर्ध्या:, मेव लक्षीव, [ङलेर्विच्] हे अडाश्लेटक! अथापि पूर्ववत्, ("स: शिवश्चण्डमा वेधा."। "डकारश्लेटने मत:" इत्यमरवैजयन्तीकोश:) अन्या इतरा:, तावदासतां तिष्ठन्तु, अडमेव परो दाक्षं भजामि। अपरा आह, अक्षया अप्रेम्णैव, खारतो वक्षात, सा, तन्वी तव प्रियेति शेष:, त्वं रत: सक्त:, किमपि दर्पकं न तनोषि, किमुत्कटं, दर्पकं दर्पं, न तनोषि, विश्रेषतो विश्रेषात, अश्रेषतो निःश्रेषात्, मरणं क्षितमेव, साधुर्ध्वं गुरु:, "मृङि वर्णान्त्यजा: अक्षा अटवर्गा रथौ लघू। अक्षत्तिसंघुक्षतिर्वा तन्माधुर्य्यमिति स्मृतम्॥" इति काव्यप्रकाशे। परा प्राह, हे अठधियां जडबुद्धीनां, शोधन! यशसा अधन! बुद्धिशुद्धियशोधन! उत्कटमलौल्यम्, अधि येषु ते:, क्रटाचै: प्रेमडार्य्य! मुखडारधीय! अ त्वां क्रूरक्रटाचैरानन्दयति तस्मात्वं वक्ष दक्षय:, अत एवामडार्य्याश्रय! मडानीयाश्रय! अक्षं यत्नं, दाक्षं यथा तादृशी, आविर्भूतं दाक्षं यस्मिन् तत्सम्बोधनं, पदितो जनान् अभिव्यञ्जनान्, अक्षति,तया आर्जवादिना कृतप्रशस्तया, तत्सम्बोधनम्; आवर्जने—अठधियां जडबुद्धीनां, शोधन! शिक्षक! अतो यशोधन! प्रेमडार्य्य! केवलप्रणयवश्य! अतो मडार्य्याश्रय! अत्युन्नताभिप्राय! तदा मत्तया मानसमये, उत्कटाचै: क्रटाचैर्भक्तसन्निधिभि:, अक्षा अक्षसख्या:, परिजना अक्षदासय:, आविर्भूतदाक्षा: यस्मिन् काले तया मान: क्षमो भवता च क्रूरक्रटाचै: स दृष्टा, तदानभ्येत्याक्षदासयस्तत्परिजना अवलेक्षका: संजाता:, एवं च चिरसेवकानामक्षदासीनां प्रार्थनया सा सुलक्षणलोका सम्यादक्षितव्येत्यर्थ:; यद्वा—उत्कटव्यवहारै:; यद्वा—उत्कटाभिर्वोत्कटाभि:; यद्वा—तदा भवत्प्रेयसीषु, उत्कटाचै: क्रूरै: क्रटाचैरित्यादि पूर्ववत्, अत्र पक्षे सर्वथा तथैव दोष इत्यलं। काचिदाह, भवता अरीणां अमूषां, कमलाकृतिनारीणां कमलाकृतिनारीणां, कमलाकृति मुखं न मलिनितमिति न; यद्वा—कृतिना भवता अरीणां अमूषां, कमला लक्ष्मी:, न मलिनिता न मलिनीकृता, कमलाकृति पद्माकारं, नारीवदनमि-

विश्वस्य विश्वस्य व्यवस्था समासाद्यसमासाद्यमनेककाल-सङ्गीतसङ्गी तनुषे तनुषेकमनङ्गमनङ्गपुष्पेषुपुष्पेषु कृजा तरसा जातरसा मन्दाद्यमन्दा चणं भ्रमन्ती मुह्यति। कामधुरा-धरेण का मधुराधरेण मुक्ता रजोराजिविशेषकेण विशेषकेण मुखेन्दुना। तव हृदि लग्ना स्मदिमाकरेण करेण खेदविन्दु-

---

ऽक्षतनारीणां, मुखं न मलिनितम् ? इति काकुः, ["नपुंसकमनपुंसकेन" इति नपुंस-केकशेषः] ("क्तौ कृग्रह इत्यपि" इत्यमरः) यद्वा—कमलवत् चक्षुः, कमलं तेन भवता चरीणां नारीणां कमलाक्षति मुखं न मलिनितम् ? काकुः पूर्ववत् ; यद्वा—कमलाक्षतिन् ! पद्माचार ! निर्लेपत्वेन साम्यं, स्वीकृतमिति वा सम्बोधनम् ; चारीणामत्र साकल्येनातिक्षतिनतया वैदग्ध्येन वा कोऽपि नाम्नात् द्रावयितुं पटुरिति ध्वनितापलापात्, नारीणां कमलाक्षति कमलरम्यं, मुखं न मलिनितम् ? इति काकुः ; अथाकुरुपालम्भपक्षः। काचिदाह, विश्वस्य सर्वस्य, विश्वस्य विश्वासं लब्धा, सा तव प्रिया, समा सलज्जीला, विगता चवस्था मर्यादा वयो वा यस्याः, आदिलोपःसमा विषमा, त्वं तु साद्यमासादयोग्यं, तनुषे धरीराय, ("तनुः स्यात् तनुषा सार्द्धम्" इति शब्दभेदप्रकाशः) कमलसेहार्जने तनुषे आसेवसे विश्वस्य सर्वस्य,जनस्य कृते त्वया व्यवस्था समासादि यस्मं विषममसेत्यसमासा हे असमास ! इति वा, आर्षं प्रथमम्, अनङ्गः कामस्य, सेकं कं सुखं, ("पुंसं विकाशे कुसुमे स्त्रीणाञ्च रजसि स्मृतम्" इति विश्वः) अनङ्गमशरीरं, पुष्पेषुपुष्पेषु कामशरेषु, तरसा वेगेन, जातरसा सन्दाद्यं मन्देच्यं, भ्रमन्ती मुह्यति ; आवर्जने—ऐऽनङ्ग ! साक्षात् काम ! अनङ्गमसम्बुद्धं, प्रति पुष्पेषुपुष्पेषुकृजा कामबाणकृजा, तरसा वेगेन, जातरसोत्पन्नानुरागा, मन्दाद्यमन्दा यज्ञामन्यरा, चणं भ्रमन्ती मुह्यति। धुरायां धरो धुराधरः, [भागुरिमते टाप्] कामं धुराधरसेनाचलभारवाहकेन, चधरेण नीचेन, रजोराजिभिर्विशेषकं तिलकं यस्य तेन त्वया, विशेषश्च हारादेः शेषो यस्य तेन मुखेन्दुनोपलक्षिता मधुरा रम्या मूर्त्तिः, का स्त्री, मुग्धा ? न ज्ञायोत्यर्थः, एतादृशेनेतादृशी वस्तु उपभुक्ता। समासालङ्कारः, "समं आदर्शनं यत्र द्वयोरप्यनुरूपयोः" इति लक्षणात् ; आवर्जने—कामस्य धूः कामधूरा, ["ऋक्पूः" इति समासान्तः] तस्या चधरसेन मधुरः सुधाधिक्याद्, चधरोष्ठो यस्य तेन, मुक्तारजोराजिभिर्विशेषकं तिलकं यस्य तेन, एतस्मिन्नाचरणे वक्त्रे

पयोधरेण पयोधरेण वक्षःफलकास्फालनेन जितानाविलास्फालनेन। कामदारुण! मदारुणनेत्रास्त्रमयं रमयन्तं त्वामदयं मदयन्ती परमकमितारं परमकमितारं वाञ्छति। हारिणा हारिणा स्तनकुम्भेन हारिणाक्षिहरिणहारिणा चक्षुषा हारिणा।

मुखेन्दवो निर्मलतोयेषु रम्यत्वादस्यैव प्रयोगः; अतो विधिनेति विशेषेण श्रेयो यस्य तेन मुखेन्दुनोपलक्षिता वा काऽपि स्त्री, वर्तते, श्रेयो यदत्र मत्सखी ज्ञाता न चलति चेत् सामान्यदर्शनाभिधानेन नेष्यामीति कृतप्रधानाया इयमुक्तिः, ("तमाकृपस्तिलक-चित्रकादि विशेषकम्" इत्यमरः)। इतरा आह, तव दृष्टि लग्ना काऽपि वर्तते; अस्तदिव आकारेण, दासीत्वं व्यक्तं, करेण खेदबिन्दुभिः पयोधरौ जलधरेण, वक्षःफलकेऽसनं गमनं यस्य, पतितत्वादित्यर्थः, तेन पयोधरेणोपलक्षिता अनाविलास्फालनेन जिता, म्लानवर्णत्वादित्यर्थः; आवर्जने—अस्तदिव आकारेण करेण खेदबिन्दुपयोधरेण वक्षःफलकास्फालनं पूजनं, रम्यत्वं येन, जितमनाविलं स्वच्छं, आसनं येन, गौरत्वादिति भावः, तेन पयोधरेणोपलक्षिता, तव दृष्टि लग्ना, काऽपि वर्तते इति पृच्छति; अस्ति चेत् तामनुसरेति व्यङ्ग्यम्; "अक्षमंकठिनौ हस्तौ पादौ वाञ्छति कोमलौ" इति सामुद्रिकलक्षणं तु पुरुषविषयम्। [अक्ष गतिपूजनयोः] ("काक्षणं चण्डके ऐक्षि" इति विश्वः)। अथवा आह, कामेनाभिलाषेण, दारुण! मदारुणनेत्र! अस्त्रमयमदयं रमयन्तं त्वां, परित्यज्येति शेषः, मदयन्ती मत्ता त्वां, परमत्यर्थम्, अकं दुःखम्, इतारं प्राप्नवन्तं, परं भिन्नम्, अकमितारमकामुकम्, ("अकं पापे च रोगे च" इति विश्वः); आवर्जने—कामेन मदेन दारुण! कठिनमारोपामत्यर्थत्वेन दारुण! मदयन्ती सौभुसेवनात्, अत एवारुणनेत्र! कामदाभिलाषप्रद! अस्त्रमयमदयं रमयन्तं परमकमितारं परमकामुकं, परमकं परमसुखम्, इतारं त्वां वाञ्छति; ("कामुके कमितामुकः" इत्यमरः) अथापि समानकारः। परा आह, हारिणाऽन्यौऽन्यं युद्धवता, पतितत्वादिति भावः, हरिणा लक्षणानां ईक्षतासम्पादनेनेत्यर्थः, एतादृशेन स्तनकुम्भेनोपलक्षिता, हे नर्मे, कृष्णति हारि, [कृष गतौ, अच इः] हारिणा मर्मगतेन, अत एवाक्षिहरिणहारिणा प्रेक्षणेनाभिलाषहारकेण, कृष्णितत्वादित्यर्थः, चक्षुषा चोपलक्षितं त्वामाह, एतादृग्-दोषविशिष्टा त्वामेताहृशमाहेत्यर्थः; आवर्जने—हारिणाक्षिहरिणहारिणा हरिण-सम्बन्धिनेत्रानुहारिणा चक्षुषोपलक्षिता, हारिणा हारयता, हारिणा हरिः

अनन्तरं दुग्धार्णवप्रविष्टमिव, स्फटिकगृहप्रविष्टमिव, श्वेतद्वीपनिवासमुखमनुभवदिव जगदामुमुदे। क्रमेण च विघटमानदलपुट-कुमुदकाननकोष-मकरन्द-विन्दु-सन्दोहमुदित-मुग्ध-मधुकर-कुलकलरुतमुखरितदिगन्ते, चन्द्रिकापानभरालसचकोरकामिनीभिरभिनन्दितागमने, सुरतभरपरिश्रमखिन्नपुलिन्द-राजसुन्दरीखेदजलकणिकाऽपहारिणि प्रयाति सायन्तने तनीयसि निशानिःश्वासनिभे नभस्वति कन्दर्पकेतुस्तम्भालिका-मकरन्दसहायो वासवदत्ताजनकनगरमयासीत्।

अथ कटकैकदेशविरचिताभ्रंलिहशिखरेण, सुधाधवलेन,

कलधौतकुम्भानुकारित्वाद्रम्ये चेत्यर्थः, सनकुम्भेनोपलक्षिता, अनेन मत्सखी युवतिः सुन्दरावयवा प्रसादिता चेति, सुगन्धि जाम्बूनदम्। ("हा गर्भेऽपि निगद्यते" इत्येकाक्षरकोषः)। निरीक्ष्य लोकव्यवहारज्ञां रीतिं कवीनामयं कोविदालम्। व्याख्या मयेयं रचिता मदिरापादारविन्दे प्रणिधाय चेतः॥

चन्द्रिकाव्याप्तिं प्रपञ्चयति।—अनन्तरं चन्द्रोदयोत्तरं, दुग्धार्णवप्रविष्टमिव स्फटिकगृहेषु प्रविष्टमिव श्वेतद्वीपनिवासस्य सुखमनुभवदिव जगद्वलम्, आ सायन्तनेन, मुमुदे। [मुद हर्षे] क्रमेण च चन्द्रपंकेतुर्वासवदत्ताजनकनगरमयासीदित्यन्वयः। विघटमानं विकसत्, दलपुटं पत्रपुटं यस्य तादृक्, कुमुदकाननं तस्य कोषेषु मध्यभागेषु, मकरन्दविन्दुसन्दोहः पुष्परसविन्दुसमुदायः, तेन मुदितं हृष्टं, मधुकरकुलं तस्य कलरुतेन सुखरितदिगन्ते, चन्द्रिका ज्योत्स्ना, तस्याः पानभरेणालसचकोरकामिनीभिरभिनन्दितागमने स्तुत्यागमने, ("चन्द्रिका कौमुदी ज्योत्स्ना" इत्यमरः) सुरतभरपरिश्रमखिन्नाः पुलिन्दराजस्य म्लेच्छजातिविशेषराजस्य, सुन्दर्यस्तासां खेदजलिकाऽपहारिणि सायन्तने सन्ध्याकालिके, ["सायंचिरम्" इत्यादिना ट्युः] तनीयसि क्षुद्रे, अत एव निशानिःश्वासनिभे नभस्वति वायौ, प्रयाति सति तन्नालिकामकरन्दो सहायो यस्य सः, [आ प्रापणे, "अनरम" इति खगिटौ]।

अथ वासवदत्ताभवनं दर्शयेत्यन्वयः। कटकैकदेशे राजधान्येकदेशे, विरचितमभ्रंलिहं शिखरं यस्य तेन। ["वृक्षादिभ्यः" इति खप्] ("कटकं वलये

एकान्तर-निविष्ट-कनक-मुक्ता-मरकत-पद्मराग-शकलेन, वासवदत्तादर्शनार्थमवस्थितदेवतागणेनेव प्राकारवलयेन परिगतम्; अनिलोल्लासिताभिः, नभस्तरुमञ्जरीभिरिव, तर्जयन्तीभिरिव गगनार्णवश्रियं, पताकाभिरुपशोभमानम्; कनकशिलापट्टाङ्कण-प्रसृताभिः, कर्पूरकुङ्कुम-चन्दनेलालवङ्गगन्धोदक-परिमल-वाहिनीभिर्वाहिनीभिः, अज्ञाततटस्फाटिकपट्टसुखनिषण्ण-निद्रायमाणप्रासादपारावताभिः, प्रभ्रश्यत्तटनिकटविटपिकुसुम-स्तवकितसलिलाभिः, अनवरतमज्जदुन्मज्जदुन्मदयुवतिजन-घनजघनस्खालनोच्छलच्छीकरनिकरस्रपितवेदिकाभिः, कर्पूर-पूरविरचित-पुलिनतट-निविष्ट-निनदानुमीयमान-राजहंसीभिः,

---

स्तानौ राजधानीनिवेशयोः" इति विश्वः)। सुधा चूर्णाख्यलेपविशेषः, तया धवलेन। एकान्तरं निविष्टानि कनकं सुवर्णं, मुक्ता मरकतं गारुत्मतं, पद्मराग एषां शकलानि यत्र। वासवदत्तादर्शनार्थमवस्थितदेवतागणेनेव प्राकारवलयेन परिगतम्। ("प्राकारो वरणः आलः" इत्यमरः)। अनिलोल्लासिताभिर्नभस्तरुमञ्जरीभिर्गगनार्णवश्रियं तर्जयन्तीभिरिव पताकाभिरुपशोभितम्। ("पताका वैजयन्ती स्यात्" इत्यमरः)। कनकशिलापट्टाङ्कणेषु प्रसृताभिः, जलयन्त्रविशेषैरिति भावः, "फोहारा" इति "चहर" इति वा भाषायां, "पाटक्क" इति "परसार" इति भाषायां प्रसिद्धः। कर्पूरकुङ्कुमचन्दनेलालवङ्गानां गन्धो यत्र तादृगुदकं तत्परिमलवाहिनीभिर्वाहिनीभिर्नदीभिः। अज्ञाततटस्फाटिकपट्टेषु सुखेन निषण्णा अत एव निद्रायमाणाः प्रासादपारावता यासु, निषण्णत्वमत्राने निषण्णत्वे च निद्रा तस्यां सुखोपवेशनं हेतुरिति कारणमालालङ्कारः। प्रभ्रश्यद्भिस्तटविटपिकुसुमैः स्तीरवृक्षपुष्पैः, स्तवकितं सञ्जातस्तवकं, सलिलं यासाम्। अनवरतमज्जदुन्मज्जदुन्मद-युवतिजनस्य घनजघनास्खालनेनोच्छलच्छीकरनिकरेण स्रपिता आर्द्रीकृता, वेदिका विस्तरः, प्राक्स्नादौ कृतमुपवेशनस्थानं याभिर्वाभिर्वा ताभिः। ("स्यादितरस्तु वेदिका" इत्यमरः)। कर्पूरपूरेण विरचितं यत् पुलिनं तस्य तटे समीपदेशे, निविष्टा उपविष्टा, निनदैर्वाशितैः, अनुमीयमाना राजहंस्यो यासु ताभिः; भाक्षोऽत्र पुलिनप्रयोगः। प्रस्तावालङ्कारेणानुमानालङ्कारः, कर्पूरपुलिनवर्णनेन तत्पश्चरपरि-

विकचनीलोत्पलकानन-दर्शिताकाण्ड-चक्रवाक-तिमिरग्रहाभिः, युवतिभिरिव सुपयोधराभिः, सुग्रीवयुद्धकलाभिरिव कौलाल-क्षपितकुम्भकर्णाभिः, सागरकूलभूमिभिरिव सुन्दरीपादपराग-ग्रवलाभिः, नवनृपतिचित्तवृत्तिभिरिव कृच्छ्रापमानकारिणीभिः, अनेकतराभिरुपशोभितम्; शिखरगतमुक्ताजालव्याजेन पुर-युवतिजनदर्शनकुतूहलागतं तारागणमिवोद्वहद्भिः, उपान्त-निलीनाभिः काचकलशाकृतिमुद्वहन्तीभिः शिखिसंहतिभि-रुद्भासितैः प्रासादैरुपशोभितम्; क्वचिदनवरतदह्यमानकृष्णा-

---

मेघत्ववर्णनात् उदात्तालङ्कारोऽप्यत्र, तथाच दण्डी—"आशयस्य विभूतेर्या यत्नस्तत्त्व-मनुत्तमम्। उदात्तं नाम तं प्राहुरलङ्कारं मनीषिणः॥" इति। विकचेत्यादि।—रक्तोत्पलपाठपक्षे—रात्रौ विकासासम्भवात्, नीलोत्पलपाठपक्षे—चक्रवाकाणामेव तिमिरग्रहावर्णनात्तदुपयोगादुपेक्ष्यम्। युवतिभिरिव तरुणीभिरिव। ["युवानः" इति तिः] सुपयोधराभिः शोभनस्तनीभिः; पक्षे—धरतीति धरा, [पचाद्यच्] पयसो जलस्य, धराभिः। ("तरुणी युवतिः समे"। "स्त्रीस्तनाग्रौ पयोधरौ" इति हयोरप्यमरः)। सुग्रीवयुद्धकलाभिरिव कौलालेन रक्तेन, क्षपितः कुम्भकर्णो राक्षसो याभिः; पक्षे—कौलालेन पयसा, क्षपितः कुम्भस्य जलग्रहः, कर्णोऽग्रो याभिः; ("श्रोत्रितेऽग्रेऽपि कौलालम्" इति पञ्चग्रेऽप्यमरः)। सागरस्य कूलभूमिभिरिव तीरभूमिभिरिव, सुन्दरीपादपानां रागैः; अवलाभिः; पक्षे—सुन्दरीणां पादपरागै-श्चरणरेणुभिः, अवलाभिः। ("सुन्दरी तरुभिन्नारी स्त्रिदी: स्त्री वचिरेऽप्यवत्")। नवोऽचिरप्राप्तराज्यपदः, नृपतिस्तस्यचित्तवृत्तिभिरिव कुल्यस्य कुले साधोः, ["तत्र साधुः" इति यत्] अपमानकारिणीभिः, पिशाचैरप्यादाय: शिशुत्वान्न्यत्वाद्वा नैनमतिमन्यते इति तैरपमानकारः; पक्षे—कुल्यानां क्षेत्रिमाल्पसरिताम्, अपमानकारिणीभिः। ("कुल्याऽल्पा क्षेत्रिमा सरित्" इत्यमरः)। अनेकतराभिरुपशोभितम्। शिखरगतानां पक्षिप्रवेशद्वारार्थमुपरिस्थानां, मुक्ताजालानां मुक्तासमवायानां, व्याजेन पुरयुवतिजनस्य दर्शनार्थं कुतूहलं कौतुकं, तमादानं तारागणमिवोद्वहद्भिः। ("कुतुकं च कुतूहलम्"। "जालं समूह आनायो गवाक्षादावपि" इत्यमर-शाश्वतौ)। उपान्ते निलीनाभिर्निहितरां लीनाभिः, निश्चलतया स्थिताभिः, अत एव काचकलशाकृतिमुद्वहन्तीभिः शिखिसंहतिभिर्मयूरयूथैः, उद्भासितैः प्राकाश्ये-

गुरुधूमपटलैर्दंशिताकालजलदोदयम्; क्वचिदतिगम्भीरमुरज-रवाकृष्टसानन्दनर्त्तितनीलकण्ठम्; सायन्तनसमयमिव पतित-लोकलोचनम्; जनस्थानमिव दारोत्सवरामम्; मानुषकमिवाभिनन्दितसुरतम्; निधानमिव कौतुकस्य; वासमिव शृङ्गारस्य; कुलगृहमिव विभ्रमस्य, सङ्केतस्थानमिव सौन्दर्य्यस्य; वासवदत्ताभवनं भवनन्दनप्रभावो ददर्श।

द्रवसि द्रवसिद्धितो निगलिते!। चपला चपलायते

उपशोभितम्। क्वचिदनवरतदह्यमानकालागुरुधूमपटलैर्दंशितमशाली जलदानां निकायानाम्, उदयो येन यत्र वा। अत एव क्वचिदतिगम्भीरमुरजरवाकृष्टाः सानन्दं नर्त्तिता नीलकण्ठा बर्हिणो यत्र, रात्रौ मयूरशब्दवर्जनं तिर्य्यग्जोऽपि सर्वकालं सुखितः, मनुष्याणां तु का कथा? इति ध्वनयितुम्। ("मदका सुरना:"। "मयूरो बर्हिणो बर्ही नीलकण्ठः" इति हलायुधामरः)। सायन्तनसमयमिव पतितः लोकलोचनः सूर्य्यो यत्र; ("किरणमालिविलोचनरुचिरः" इति हारावली) पक्षे—पतितानि सौन्दर्य्यावलोकनार्थं लोकानां लोचनानि यत्र। जनस्थानमिव दारेषु रतोत्सवाः, उत्सवो रात्रौ रासो यत्र; पक्षे—दारयतीति दारः कन्दर्पः, तेनोत्सुका रामाः स्त्रियो यत्र। ("सुन्दरी रमणी रामा" इत्यमरः)। मानुषकमिव मनुष्यसमूह इव, अभिनन्दिता श्लाघाविषयीकृता, सुरता देवता येन; पक्षे—अभिनन्दितं सुरतं मैथुनं यत्र। कौतुकस्य निधानमूर्द्ध भाण्डागारमिव। शृङ्गारस्य वासगृहमिव, "पुंसः स्त्रियां स्त्रियाः पुंसि सम्भोगं प्रति या स्पृहा। स शृङ्गार इति ख्यातः कौशादिरसनायकम्॥" इत्युक्तलक्षणम्। विभ्रमस्य विलासस्य, कुलगृहमुत्पत्तिस्थानं, "भावोत्सुक्यकृताकारं वपुषो वचसश्च या। अनवस्थितचेष्टत्वं विभ्रमः परिकीर्त्तितः॥" इति भरतः। भवनन्दनस्य शक्तिविशेषस्य, प्रभावो यत्र सः।

एतस्मोऽयं प्रबोधेन पेशला रम्याः, प्रमदानामालापलताः प्रसृता कन्दर्पकेतु-संज्ञस्यन्देन सुतं विषयनाथस्य, अकरोत्। द्रवसिद्धितो नर्मसिद्धितः, [सार्थविभक्ति-लक्षणात्] निगलिते! उत्सवोपेक्षाशिलिते! द्रवसि [द्रु गतौ] यस्य मनस-प्रसाद उपकाराय चपलत्वादिति आशिङ्कयोपहसति; यथा—मया प्रेम्णा यद्यदसि तं मां परित्यज्य बालोत्पलाक्ष; ("द्रवो विद्रवनर्मणोः। वाचस्पतिरनलोऽपि" इति

किमेषा ?। स्तवकस्तव कर्णतः पतितोऽयं सुरेखे !। सुरया चिता सुरयाचितश्रीस्त्वमसि मत्ता। कलहे ! कलहैमकाञ्चीदामकर्षणैः स्मरमिवाह्वयसि। मलये ! मलयेप्सितं दृश्यैवाधिगताऽसि। कलिके ! कलिकेतुमिमां मुखरां मुञ्च मेखलां, शृणुमः कलवल्गकीकृतम्। मेखला मेखला न भवति,त्वमेव मुखरतया मुखरतया च। त्वयैतेऽत्र पतेदियमवन्तिसेना कुसुमोपहारे

हैमः) यद्वा—निगलिते ! एतदभिधाने ! द्रवसिद्धितो द्रावकौषधविशिष्टेषात्, द्रवसि। "यद्यप्यष्टगुणः अरो निगदितः पुंसोऽङ्गनानां सदा नो याति द्रवतां तथापि झटिति व्याधाविता सक्षमे। तत् स्याद्वैद्यसमप्रयोगविधिना सङ्क्षेपतो द्रावणम्॥" इति शान्तिदेवः। यथोक्तं द्रवसीति तां लक्ष्योक्त्याऽन्या प्रत्याह, एषा पुरोवर्त्तिनी, चपला चपलाभिधाना, किं चपलेव विद्युदिव, आचरति ? नात्रैक मतार्थत्वादिति भावः; यद्वा—एषा चपला चञ्चला, किमाचष्ट, पलायते ; [इण् गतौ"उपसर्गेभ्यायतौ" इति खल् परारेफश्च] यद्वा—चपलेव पिप्पलीव, आचरति, दयमेवौषधः सर्वदा द्रवतीति भावः। ("चपला त्वमलाविद्युत्पिप्पलीपिप्पलीषु च" इति विश्वप्रकाश इति दिक्)। हे सुरेखे ! तव कर्णतः स्तवकः पृथगुच्चः, अयं पतितः, त्वं न जानासि ? मत्ताऽसि ? इत्युपहासः। ("आतङ्कस्तु स्तवकः" इत्यमरः)। एतामेवोपहसति, सुरेखैवः, याचिता अर्थात् ब्रह्मणा उचिता योग्या, श्रीः सौन्दर्यैश्वर्यलक्षणा लक्ष्मीर्यं, सुरया मदिरया, चिता व्याप्ता तादृशी सती, मत्ताऽसि। हे कलहे ! कलहैमकाञ्चीदामकर्षणैः स्मरमाह्वयसीवाकारयसीव, पत्यतिरिक्तपुरुषाङ्गालोलत्वमुपहासाय। एनामुपहसति, मलये ! तन्नामिके ! मे प्रिये, त्वयी नाम्नी यस्य मलयः कामः, तदभीप्सितं दृश्य, दृश्येव दृष्ट्येव, अधिगताऽसि, त्वं पुरुषं सदाचैरामलयसीति भावः ; ("अभीष्टेऽभीप्सितं हृदयम्" इत्यमरः) यद्वा—मः शिवः, त्वयी मही यस्य मलयचन्द्रः, तथेप्सितं हरिणः तं, दृश्येवाधिगताऽसि मृगलोचनाऽसीति भावः, ("मः शिवचन्द्रमा देवाः" इत्यनेकार्थध्वनिमञ्जरी)। कलिके ! कलेः रतिकलहस्य, केतुं ध्वजं, यथा केतुना सेनादि द्योत्यते, एवमनया रतिकलहो द्योत्यते इति भावः, मुखरां वाचालां, मेखलां काञ्चीं, मुञ्च, त्यागे फलमाह, कलमव्यक्तमधुरं च, तद्वल्कीकृतं तत् शृणुमः। ("कलिः स्यात् कलहे सूरे कलिरव्यक्तमधुरे त्रिषु" इति विश्वप्रकाशः)। उत्तरयति, मे मम, मेखला काञ्ची, खला पिशुना, न भवति, सुखेन प्रेष्टेन, रतं यातीति सुखरतया; ; यद्वा—सुखेन वाक्यावसानसुकोपायेन, रतं यातीति सुखरतया; त्वमेव, सुखरतया

मुग्धा। तव कैतवैरलं, लवङ्गिके! वेपथुरेवाशयं व्यनक्ति। वहतीव हृतीरनङ्गलेखे! स्मरसायकानां तव वपुरक्षसम्। पिहिता-ऽपि हिताय ते उत्कलिकामङ्गोर्मिः। वदने वद नेत्रपेयकान्ती किमुपमानमिन्दुरप्युपयाति। वसतीव सतीव्रते! तव हृदि कोऽपि व्रतधा व्रतधारसारा वाचस्त्वानुभूताः। कुन्तलिके! करकाकरकालमेघखण्डतुलामयमुल्लसितोत्फुल्लमल्लिकामालभारी कुन्तलकलापः तव याति। केरलिके! पुरगोपुरगोचराः

तया वाचाखतया, खड्गा। ("मुखमुपाये प्रारम्भे प्रेष्ठे निःसरणाजयोः" इति हैमः। "पिशुनो दुर्जनः खड्गः" इत्यमरः)। काचिदाह, मुग्धेयमवलिसेना वपते लज्जते, अव कुसुमोपहारे पतेत्। [सम्भावनायां लिङ्]। तां प्रत्याह, लवङ्गिके! कैतवैरलं कैतवसाध्यं नास्तीत्यर्थः, वेपथुरेव अस्य एव, तवाशयं व्यनक्ति सात्त्विकाविर्भावात् त्वमेव अत्यसे मां किं वृथा वदसि? इति भावः; "स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका मताः॥" अनङ्गलेखे! तव वपुः [कर्तृ] स्मरसायकानां हृतीर्हननानि, [हन् हिंसागत्योः क्तिन्] वहतीव वतो-ऽक्षसम्। उत्तरमाह, तेऽप्युत्कलिकामङ्गोर्मिः पिहिता छन्ना, हिताय विरह-व्यानाविष्कारादर्थात् ते हिताय अत्यर्थाय; यद्वा—उत्कलिकामङ्गोर्मिः पिहिता-ऽपि हितवदाचरति हितायते; यद्वा—उत्कलिकामङ्गोर्मिः पिहितापि हि निश्चयेन, तायते लोकोपहासात् त्वां पालयतीत्यर्थः, [तायृ सन्तानपालनयोः] सन्तानः प्रबन्धः; यद्वा—पिहिताप्युत्कलिकामङ्गोर्मिः [कर्मकर्तृ] तायते स्वयमेव विस्तृता भवति, हि प्रसिद्धौ; [तनु विस्तारे, तनोतेर्यकीति विभाषात्वम्] यद्वा—उत्कलिकामङ्गोर्मिः पिहितापि हिता हृद्या, [हि गतौ हृद्यो च] धायते लोके गच्छति, प्रसृता भवति। हि मेघैः पेया कान्तिरस्य तस्मिन् वदने मुखे, किमिन्दुरूपमानमपि यातीति वद; पूर्वं तन्मुखमुपमानमिदानीमिन्दुरूपमानमपि यातीति सम्भावनं, मुखे विरहातिशयात् पाण्डुत्वाधिक्यद्योतनाय। उत्तरमाह, सतीनां व्रतमिव व्रतमस्यास्तत्सम्बोधनं, तव हृदये कोऽपि वसतीव, व्रतधा व्रतप्रकारेण, व्रतधारोऽग्निः, तत्सारा: बलवत्तराः, तव वाचोऽनुभूताः। ("व्रत-कोटिः स्वरुः ग्रन्थो दम्भोलिरग्निर्दयोः" इत्यमरः)। कुन्तलिके! उल्लसितोत्-फुल्लमल्लिकामालभारी तवायं कुन्तलकलापः, करकाकरकालमेघखण्डानाम्, आवली

श्यामले गीतध्वनयः, किमिव कल्पयसि ?। क्षणमीक्षणमीक्षणा-
दपि चटुलं चटुलम्पटं . सखीजनमायासयसि मुरलिके !।
स्तनता स्तनताडनेषु यत् मौख्यं तल्लब्धं स्मरता स्मरतापनोदनं
दयितेन दयितेन विमुक्ताऽसि किं मुह्यसि ? महतो महतो
हतमोहतमो दयितो दयितः स्मरति स्म रतिप्रियं तव
कौशलम्। नवनिशानखराणां नखराणां व्रणः स्मरजन्यां स्म
रजन्यां कुरुते ! न कुरुते रुजं किं ते ?। लोचनाभ्यां

यः श्यामेघखण्डः तस्य तुल्यां साम्यं, याति प्राप्नोति, ("वर्णोपमस्तु सादृश्यं" इत्यमरः) [श्यामशब्दोत्तर "इष्टकेषीकामालानाम्" इति ह्रस्वः]। पुरश्च गोपुरं द्वारं, तद्गोचरा गीतध्वनयः श्रूयन्ते, ["गोपुरं द्वारि पुर्यादि केवर्णसुरसेऽपि च" इति मेदिनी) किमिव कल्पयसि ? किं वा गायसि ? इदं वा कस्य कृते वेति किं कल्पयसि ? सर्वैः स्वप्नतयैव ज्ञायते इति त्वदर्थमेवेत्युपहासः। हे मुरलिके ! त्वं ["श्यामाध्वनोरत्यन्तसंयोगे द्वितीया] ईक्षणमीक्षणादृष्टिमीक्षणात्, चटुलं चञ्चलं, आर्द्रेऽनक्षरं, चटुलम्पटमपि प्रियवाक्यासक्तमपि, सखीजनमायासयसि त्वमपि विरहवेदनया मूर्च्छिताऽऽत्मानं वेदयसीति भावः। दयितेनाधीनेन, स्तनता ध्वनितं कुर्वता, सङ्केतार्थं पत्त्यादिशब्दं कुर्वता वा, स्तनमण्डलेषु सुरते चन्दनलालनौषधादिषु, यत् स्मरतापनोदनं स्मरतापनाशकं, मौख्यं लब्धं तत् स्मरताऽपि दयितेन पत्या, विमुक्ताऽसि, ("दयितः स्वामिकान्तयोः" इति धरणिः) एतादृश्येतादृशेन मुक्ता-ऽसीति को वेद तवापराधमिति ध्वनिः, अत एव वदति, किं मुह्यसि ? यत्नमेव कृतं पत्येत्यभिप्रायः; यद्वा—ममाश्यामयति, किं मुह्यसि ? स त्वद्गुणज्ञस्त्वां न त्यक्ष्यति। पूर्वं वर्णितमपि गुणं तत्प्रत्ययार्थं पुनर्वर्णयति, महतो महीयसः, महतस्त्वटतिरूपात् महीस्मरात्, हतमोहतमः हतो यया तया यादृशेन विधानरूपो मोहो यस्य सः, ततोऽतिशये तमप्, दयितः कान्तः, दयितः पतिः, रतौ सुरते, प्रियं तव कौशलं स्मरति स्म स्मृतवान्। ["स्मृ ञ्चे" इति भूते लट्]। हे कुरबके ! नवं निशानं मेजनं, तेन खराणां नखराणां नखानां, व्रणः क्षतं, स्मरस्य जनो बधूः रतिस्तस्यां रतौ, स्मरं जनयतीति [कर्मण्यण्। "अनिदमोर्य" इति ङ्यङिति यः, ङीप्] तस्यां कामोद्दीपिकायां वा, रजस्यां रात्रौ, रुजं पीडां, किं ते न कुरुते अपि ? [पूर्वत्रवट्। अथवा तृतीये] यद्वा—अरेऽयं जनः कामिनीत्यादिना वा, रुजं, चन्द्रकर्पूरगोशीर्ष

लोचनाभ्यां प्रोञ्छितास्त्रिजलनेत्रचन्द्रेण: चन्द्रेण: किं न पीयते ? प्रियसखि मदनमालिनि !। बिम्बाधरसदृक्षा सदृक्षायेच्छया विराजं कुरु मधुमदारुणमालवीकपोलतलसमानो रक्तमस्तलतया लतया त्वया विशेष: क: ?। कुररिके ! कथय कुररकुशाकेभ्य: ग्रस्याहुरम्। किशोरिके ! कारय किशोरकस्य प्रत्यवेक्षाम्। तरलिके ! तरलय कृष्णागुरुधूपपटलम्। कर्पूरिके ! पाण्डुरय कर्पूरधूलिभि: पयोधरभारम्। मातङ्गिके ! मानय मातङ्गमिश्रुयाचनाम्। शशिलेखे ! लिख ललाटपट्टे

नस्यचनाश्रयो नारीणां कामनुद्दीपयतीति सर्वं कामतन्त्रे, ["कामेव—" इति काधु:] ("कथा साहचर्यजाया अन्य: आक्षनके पुमान्। क्रियत्याख्यानिकोक्ष" इति विश्वलोचिनी। "स्त्रीवर्ग कथा पीयताम्" इत्यमर:)। सादपि मालिनीं प्रति तुलैव वक्ति, हे मदनमालिनि ! लोचनाभ्यां प्रोञ्छितोऽस्त्रिजलनेत्रचन्द्रेणो नेत्रैश्रो येन स:, चक्रवेत्यन्द्र:, किं न पीयते ? विश्वलङ्कार:, "सिद्धयेव विधानं यत् तामाकृतिमात्रकृत्रियाम्"। लोचनयोर्लोचनविधानं चन्द्रदर्शनेन साफल्य-द्योतनाय, नान्यकृतकामेवं स्वयमेव प्रियजनलोचनेत्यर्थ: भाव:; यथा—लोचनाभ्यां नेत्राभ्यां, प्रोञ्छितास्त्रिजलनेत्रचन्द्रेण:, चन्द्र: सुहृदश्चकोरोऽस्य स पति:, लोचनाभ्यां किं न पीयते ?। रक्तमस्तलतया रक्तमस्तोऽत एव मधुमदारुणमालवीकपोलतल-समान: ; यथा—रक्तमस्तलतया रक्तमस्तलतया, समान: शोभमान:, मालवी-कपोलतलसमानता रक्तमस्तलतया, बिम्ब एव बिम्बवत् अधरसदृक्षा सतया त्वया स्त्रीविशेष: ? न कोऽपीत्यर्थ:, यत: सदृक्षायेच्छया विराजं कुरु, यथा अधरदृश-स्त्रीविशेषस्तेनाविशेषो सदृक्षैकं नैकविधवाकीकरणेच्छयेत्यर्थ: तथाच-विरोध इति भाव:। कुररिके ! प्रत्यहमेव सञ्चिनुयोऽनानि, कुररकुशा-केभ्यो परिचयिष्यन्ति, अयं बालकश्चं, कोमलं बहुदूरं, अत्यर्थोत्तानय, देहि, ("अथ कुररकुशाकेभ्य:"। "कुररा: शाकभेदा: स्त्रिय:"। "अयं बालकश्चं बाल:"। "अङ्कुरो-ऽभिनवोद्भेदे बालके" इति चतुरर्थाभर:)। किशोरिके ! किशोरकस्य बालकस्य, प्रत्यवेक्षामवेक्षणम्। ("बाल: शिशोर:" इत्यमरोक्तेरुभयत्रापि। "अवेक्षा प्रतिपालना" इति च)। तरलिके ! तरलय विस्तारय। कृष्णागुरुविरचितधूपपटलम्, कर्पूरिके ! कर्पूरधूलिभि: पयोधरभारं पाण्डुरय। मातङ्गिके ! मातङ्गमिश्रुयाचनां मानय चन्द्रोदयं कुरु, पुन:

अग्निशेखाम्। केतकिके! सङ्केतय केतकीमण्डपम् द्रोहटम्। शकुनिके! देहि क्रीडाशकुनिभ्य आहारम्। मदनमञ्जरि! मञ्जरय सभामण्डपमदलीगृहम्। शृङ्गारमञ्जरि! सङ्घटय शृङ्गाररचनानि। सञ्जीविके! वितर जीवञ्जीवकमिथुनाय सरिचपञ्जरम्। पञ्जरिके! पञ्जरय कर्पूरधूलिभिः क्षत्रिम-केतकीकाननम्। सहकारमञ्जरि! सञ्जनय सहकारसौरभं व्यजनवातेन। मदनलेखे! लिख मदनलेखं मलयानिलाय। सुधालिके! देहि सुधालाजुरं राजहंसशावकेभ्यः। विलास-वति! विलासय मयूरशिशोरम्। तमालिके! परिमलय मलयजरसेन भवनवाटम्। कालिन्दिके! विकिर कस्तूरीदूर्वं काञ्चनमण्डपिकायाम्। प्रवालिके! सेचय सुकुमारसेन बाल-प्रवालशयनमित्यन्योऽन्यं प्रणयपेशलाः प्रमदानामालापकथाः शृण्वन् कन्दर्पकेतुमेकरन्धेन सह विस्मयमकरोत्।

सरचापलेन कुसुमेषुं कुसुमेषुः प्रार्थयत इति भावः। अग्निशेखे! जलाटपट्टे अग्निशेखां तिलकं, सरविशेषविधायेति भावः। केतकिके! केतकीमण्डपम् द्रोहटं सङ्केतय जानीहि, सङ्केतिकं कुरु। ("दोहटो गर्भमण्डपे। अग्निशेखे तथा गर्भे" इति हेमः)। शकुनिके! क्रीडाशकुनिभ्य आहारं देहि, ["धूलीरेणुविषेलाभ्यामोषौ"]। मदनमञ्जरीत्यादि। शृङ्गारमञ्जरि! शृङ्गाररचनानि सङ्कल्पयोपाहय। सञ्जीविके! जीवञ्जीवकाय सरिचपञ्जरं वितर देहि, ("जीवञ्जीवकोरकः"। "सरिचं कीचकं लघुम्" इति हलायुधः)। पञ्जरिके! क्षत्रिमकेतकीकाननं कर्पूरधूलिभिः पञ्जरय। सहकारमञ्जरीति। मदनलेखे! मलयानिलाय मदनलेखं मदनावस्थासूचकं लेखं, लिख। सुधालिके! इति। विलासवति! मयूरशिशोरं विशेषेण लासय नर्तय। ("शिशोरजघन्ये श्रेष्ठे" इति धरणिः)। तमालिके! मलयजरसेन चन्दनरसेन, भवनवाटं गृहमार्गं, परिमलय, ("वाटः पक्ष्म मार्गयोः" इति विश्वप्रकाशः)। कालिन्दिके! काञ्चनमण्डिकायां कस्तूरीदूर्वं विकिर विक्षिप, [कृ विक्षेपे]। प्रवालिके! सुकुमारसेन सुकुमारसेन, प्रवालानां पल्लवकेशानां, शयनं समूहं, सेचय, ("कुसुमं पीतसारेरं दुकूलं कुसुमाम्बरम्" इति धरणिः)।

मनस्यहो! भवनानामतिशायि सौन्दर्यम्। अहो! शृङ्गार-कलाकेलिकौशलम्। तथा ह्यमं तत्कालललीलावल्लविरलविमल-मालवीटप्रनकान्तिकान्तिदन्तिदन्तघटितो मणडपः, असावपि कनकप्रलाकाविनिर्मितयन्त्रपञ्जरसंयतः क्रीडाशुकः इत्यादि परिचिन्तयन् प्रविश्य व्याकरणेनेव सरक्तपादेन, भारतेनेव सुपर्वणा, रामायणेनेव सुन्दरकाण्डचारुणा, जङ्घायुगलेन विराजमानां, छन्दोविचितिमिव भ्राजमाननितम्बां, नक्षत्र-विद्यामिव गणनीयहस्तश्रवणां, न्यायस्थितिमिवोद्योतकर-स्वरूपां, बौद्धसङ्गतिमिवालङ्कारभूषिताम्, उपनिषदमिवानन्द-त्मकमुद्योतयन्तीं, द्विजकुलस्थितिमिव चारुचरणां, विन्ध्यगिरि-

---

प्रविश्य वासवदत्तां ददर्शेत्यन्वयः। व्याकरणेनेव पाणिनिप्रोक्ताष्टाध्यायिरूपेणेव, "तेन रक्तं रागात्" इत्युपलक्षितः पादोऽध्यायतुरीयांशः, तत्सदृशेन; पक्षे—रक्तपादेन लोहितचरणेन सह सरक्तपादं तेन। भारतेनेव सुपर्वणा शोभनपरिच्छेद-वृतेन; पक्षे—सुपर्वणा शोभनपर्वयुतेन। ("पर्वाणां पर्वपरुषी" इत्यमरः)। रामायणेनेव सुन्दरकाण्डेन चारुणा; पक्षे—सुन्दरकाण्डवच्चारुणा। ("काण्डं चावसरे वाणे नाले स्कन्धे च शास्त्रिनाम्। स्तम्बे दण्डे वर्गे च" इति धरणिः)। जङ्घायुगलेन विराजमानाम्। विन्ध्यगिरिमिवनितम्बां सुन्दरकटकाम्; ("कटकोऽस्त्री नितम्बोऽद्रेः" इत्यमरः) पक्षे—शोभनकटिपर्यन्तभागां, ("पर्यन्तितम्बः स्त्रीकट्याः" इत्यमरः)। छन्दोविचितिमिव भ्राजमाननितम्बां, तनुमध्यामिति छन्दः,—"स्यौ सलौ तनुमध्या"; पक्षे—भ्राजमानं तनुमध्यं यस्याः। नक्षत्रविद्या ज्योतिःशास्त्रमिव, गणनीयं हस्ते श्रवणं, श्रवणं श्रवणेन्द्रियं च यस्याः; पक्षे—गणनीयमत्युत्कृष्टतया श्रवणं यस्याः। न्यायस्थितिमिवोद्योतकरं वाचार्यं न्यायवार्त्तिककृतं, तत्स्वरूपां तदात्मिकाम्; विद्यातदुतोरभेदविवक्षायाम् विभुनिर्व्याकरणमितिवत्, भेदविवक्षायां तु—उद्योतकरेण स्वरूपं यस्याः, उक्तानुक्तदुरुक्तचिन्ताकृता वार्त्तिककृता स्वरूपं यथा प्रतिपादितरूपं, न तु स्खलितं भ्रष्टमित्यर्थः; पक्षे—उद्योतकरं प्रकाशकरं, स्वरूपं यस्याः, ("प्रकाशो द्योत आतपः" इत्यमरः)। बौद्धसङ्गतिमिवालङ्कारो धर्मकीर्त्तिकृतो ग्रन्थविशेषः, तेन भूषिताम्; पक्षे—अलङ्कारो भूषणं, तेन भूषिताम्। उपनिषदमिवेवानन्द-मयितारं ब्रह्मानन्दम्, उद्योतयन्तीम्; तदुक्तम्—"आनन्दो ब्रह्मणो रूपं तच्च मोक्षे

श्रियमिव सुनिसण्णां, तारामिव गुरुजनव्रतयोपशोभिनीं, शतकोटिमिव सुष्टिग्राह्यसमध्यां, प्रियङ्गुश्यामालतामिव प्रियदर्शनां, ब्रह्मदत्तमहिषीमिव सोमप्रभां, दिग्गजकरेणुकामिवानुपमां, वेलामिव तमालपत्रप्रसाधिताम्, अम्बरतलश्यामिव महाजवां वासवदत्तां ददर्श।

अथ तां प्रीतिविस्फारितेन चक्षुषा प्रियतः कन्दर्पकेतोर्जहार चेतनां मूर्च्छावेगः। तमपि पश्यन्ती वासवदत्ता समूर्च्छत्। अथ मकरन्दसखोजनप्रयत्नलब्धसंज्ञौ तावेकासनमलञ्चक्रतुः।

ततो वासवदत्तायाः प्राणेभ्योऽपि गरीयसी सर्वविस्रब्धपात्रं जलावती नाम कन्दर्पकेतुमुवाच—"आर्यपुत्र! नायं विस्रब्ध-

---

प्रतिष्ठितम्" इति; पक्षे—एकमुत्कृष्टम्, आनन्दनाद्वादम्। द्विजकुलस्थितिमिव चारु सुन्दरं, चरणनाचारी व्यालाम्; पक्षे—चारु रम्यं, चरणं व्यालाः, ("चरणोऽस्त्री बहुचादौ मूलि मोक्षे पदेऽपि च") । तारामिव हृदयस्थितगोपस्त्रीम्, शतकोटिमिव वज्रमष्टिमिव, मुष्टिग्राह्यो मध्यो मध्यदेशो यस्याः; पक्षे—मध्यमवयसं यस्याः, ("मध्यमं यौवनस्थं च मध्योऽस्त्री" इत्यमरः)। प्रियङ्गुश्यामालतामिव प्रियदर्शनां तन्वीमिताम्; पक्षे—प्रियं दर्शनं यस्याताम्। ब्रह्मदत्तमहिषीमिव सोमप्रभां तदभिधानाम्; पक्षे—सोमस्येव चन्द्रस्येव, सोमा रम्या वा, प्रभा यस्याः, ("सोमो जनीजरे चन्द्रे" इति विश्वः)। दिग्गजकरेणुकामिवानुपमां तदाख्याम्; ("करिण्योऽमूः करिण्या पिङ्गलाद्युपमा ग्रहात्" इत्यमरः) पक्षे—अनुपमामुपमारहिताम्। वेलामिव समुद्रतीरभूमिमिव, तमालपत्रैः प्रसाधितालङ्कृताम्; पक्षे—तमालपत्रं तिलकं, तेन प्रसाधिताम्, ("तमालपत्रं तिलकविल्वयोः" इत्यमरः)। अम्बरतलश्यामिव महाजवां तद्गामिनेत्राम्; पक्षे—महेन शीघ्रगमनेन, जवो यस्याः तद्गतिम्।

अथेति त्रयाणाम्। मकरन्देन सत्कृतोपचारेण, सखीजनेन सत्कृतोपचारेण, यथालब्धं लब्धसंज्ञौ तौ वासवदत्ताकन्दर्पकेतू, एकमनिलम्, आनन्दनलब्धजन्मानः।

सख इति। विस्रब्धपात्रं विश्वासस्थानम्। आर्यपुत्रेति। "आर्यपुत्रेति स्त्रीभ्यः

कथाया अवसरः, ततो लघुतरमेवाभिधीयसे। त्वत्कृते यादृशया वेदनाऽनुभूता, सा यदि नभः पत्रायते, सागरो मेलानन्दायते, ब्रह्मायते लिपिकरः, भुजगराजायते कथकः, तदा किमपि कथमप्यनेकैर्युगसहस्रैरभिलिख्यते कथ्यते वा। त्वयाऽपि राज्यमुज्झितं, किं बहुना? आत्मा सङ्कटे समारोपित एव। एषाऽस्मत्स्वामिदुहिता पित्रा प्रभातप्रायायां रजन्यां यौवनातिक्रान्तिदोषशङ्किना हठेन विद्याधरचक्रवर्त्तिनो विजयकेतोः पुत्राय पुष्पकेतवे पाणिग्रहणेन दातव्येति। अनयाऽप्यालोचितमद्य, यदि अभ्यर्हितं जनमादाय तमालिका नामच्छति, तदाऽवश्यमेव मया हुनवहे प्रवेष्टव्यमिति। तदस्याः सुकृतवशेन महाभाग! इमां भूमिमनुप्राप्तः, तदत्र यत् साम्प्रतं, तत्र भवानेव प्रमाणम्" इत्युक्त्वा विरराम।

अथ कन्दर्पकेतुः सप्रश्रयमानन्दसागरलहरीभिरापूत इव,

पतिः पत्नीजनेन वा" इति भरतः। त्वत्कृते त्वदर्थम्, अनया वासवदत्तया, या या वेदना अनुभूता सा सा यदि नभ आकाशः, पत्रवदाचरति पत्रायते, ["उपमानादाचारे" इति क्यङ्) अतिवैपुल्यार्थमिदमुक्तम्। सागरो मेलानन्दायते मसीपात्रायते, गाम्भीर्यार्थं चेदं, ("मेलानन्दो मसीपात्रम्" इति हारावली)। लिपिकरो लेखकः, ["दिवाविभा—" इति टः] ब्रह्मायते, चिरजीवितार्थमिदम्। कथको वक्ता, भुजगराजायते भुजङ्गश्रेष्ठप्रेषायते, योगशास्त्रप्रवेष्टलेलान्तरभावाभिप्रत्यार्थं, ग्रन्थशास्त्रार्थवपारावारीणत्वेन बहुसुखत्वेन बहुधाऽभिप्रायाविष्कारकर्तृत्वार्थं, वैद्यकशास्त्राचार्यत्वेन चिरञ्चवेदनयाऽस्या इयमवस्था, न ज्वरादिजन्येति वक्तृताथं चेदम्; तथा चोक्तं—"योगेन चित्तस्य पदेन वाचां मलं शरीरस्य तु वैद्यकेन। योऽपाकरोत् तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि॥" इति, तदाकल्पमन्यनेकैर्युगसहस्रैः कथ्यतेऽभिलिख्यते वा। सम्भावनाऽलङ्कारः, "सम्भावनं यदात्मं शक्तिमूहोऽन्यस्य सिद्धये" इति लक्षणात्। त्वयेत्यादि। पाणिग्रहणं विवाहः। अनया वासवदत्तया, आलोचितं चिन्तितं, यदभ्यर्हितं लक्षणयुक्तं जनम्। हुतवहे वह्नौ, प्रवेष्टव्यं प्रवेष्टव्यम्। महान् भागो भाग्यं यस्य तत्सम्बोधनं, ("भागो भाग्यैकदेशयोः" ति विश्वः)। साम्प्रतं युक्तम्। प्रमाणमुत्तरकर्त्तव्यतायामित्यर्थः।

अथ सप्रश्रयमानन्दसागरलहरीभिरापूत इव कन्दर्पकेतुः

भुवनत्रयराज्याभिषिक्त इव, भीतभीत इव, वासवदत्तया सह सम्मन्त्र्य मकरन्दं वार्त्ताऽन्वेषणाय तत्रैव नगरे नियुज्य भुजङ्गेनेव सदागत्यभिमुखेन मनोजवनाम्ना तुरगेण तया सह नगरान्निर्जगाम।

क्रमेण च जाङ्गलकवलनाभिलाषमिलितनिःशङ्ककङ्ककुलसङ्कुलेन, अर्द्धदग्धचिताचक्रसिमसिमायमानविकटकटहणाचटत्कटपूतनोत्तालवेतालरवभीषणेन, शूलशिखरारोपितशङ्कितवर्णकर्णनासिकच्छेद-रुधिरपटलपतित-भाङ्कारि-भस्मराली-भारभरितभूमिभागबीभत्सेन, कटाग्निदह्यमानापटुचटचटत्करोटी-

---

भीतभीत इवानुभूतपुरुषसङ्गेयं मा कदाचिदुद्विग्ना भूत, तया सति रसभेदः स्यादिति समय इवेत्यर्थः। सम्प्रत्ययं सविश्वासं, वासवदत्तया सम्मन्त्र्य मन्त्र्यः कामचारानुज्ञां विधाय तया सह रतिं कृत्वेत्यर्थः, सम्पूर्वो मन्त्रिः कामचारानुज्ञार्थकः। वार्त्ताऽन्वेषणाय; मकरन्द तत्रैव नगरे नियुज्य भुजङ्गेनेव सदागतिर्वायुः, तदभिमुखेन; पक्षे—सदा सर्वदा, गत्यभिमुखेन मनोजवनाम्ना तुरगेण तया वासवदत्तया सह, नगरान्निर्जगाम, दुर्गगमनादौ स्त्रीणामनधिकारात्, [अव "सहयुक्तेऽप्रधाने" इत्यप्रधाने तृतीया]।

क्रमेण शनैर्गमनवर्त्मेन निमेषमात्रादनेकशतयोजनं गत्वा विन्ध्याटवीं विवेशेत्यन्वयः। जाङ्गलकवलनाभिलाषेण मांसरसाभिलाषेण, मिलितं निःशङ्कं कङ्कानां पक्षिविशेषाणां, कुलं तेन सङ्कुलेन, ("जाङ्गलं जलदेशे स्याज्जाङ्गलं पिशितेऽपि च" इति विश्वः)। अर्द्धदग्धचिताचक्रे सिमसिमायमान एताडक् शब्दविशिष्टः, विकटो भयानकः, कटो मृतशरीरं, तत्तृष्णाचटुलकटपूतनानामुत्तालवेतालानां रवेण भीषणेन, ("कटः समयवन्धेऽपि तृणेऽपि मृतकेऽपि च" इति विश्वः)। शूलशिखरारोपितस्य शङ्कितवर्णस्य चोरस्य, वर्णनासिकेति [प्राण्यङ्गत्वादेकवद्भावः] तच्छेदरुधिरपटले वर्णनासिकच्छेदनिर्गतरुधिरपटले, पतिता भाङ्कारिभस्मराल्यो भाङ्कारोऽभक्तशब्दः, तद्युक्ता भस्मराल्यो मक्षिकाः, ताभिर्भरितम् [इत्यजलो न तु क्लान्तः] पूरितं, तादृग्भूमिभागेन बीभत्सेन, ("चोरः शङ्कितवर्णश्च कुसुमाद: प्रकीर्तितः" इत्युत्तरतन्त्रम्। "मक्षिका मक्षिका प्रेया भस्मराली च सा मता" इति शारावली)।

टङ्कारभैरवरवेण, शूलपाणिनेव कपालावलिभस्माङ्गिरावच्छिभुत-भुजगावरुद्धदेहेन, पुरुषातिशयेनेवानेकमस्तकलक्षणसेवेन, प्रलयानलवातेन गत्वा निमेषमात्रादेवानेकशतयोजनं प्रलयकालवेलामिव समुद्वितार्कसमूहां, नागराजक्षितिमिवानन्तमूलां, सुधर्मामिव स्वच्छन्दस्थितकौशिकां, सत्पुरुषसेवामिव बहुश्रीफलाढ्यां, भारत-समरभूमिमिव दूरप्ररूढार्जुनां, पुलोमकुलक्षितिमिव सहस्र-नेत्रोचितेन्द्राणिकां, शूलपाणिचित्तवृत्तिमिव फालितगणिकारिकां, सज्जनसम्पदमिव विकसिताशोकसरलपुन्नागां, शिशुजनलीला-

---

जटाग्निस्फुलिङ्गाग्निः, तेन दक्षनामापट्टचटचटशब्दरोटिर्मनुष्यग्रिरोऽस्थि, तस्याष्टहारेण भैरवरवेण भयानकशब्दविशिष्टेन, ("शिरोऽस्थनि कपरोटिः स्त्री" इत्यमरः)। शूलपाणिनेव शिवेनेव, कपालावलीत्यादि, शिवा गौरी, पक्षे—स्त्री। पुरुषेषतिशयो यस्य स महादेवः, तेनेवानेकमस्तकं राहुम्; पक्षे—वा, तत्कृतसेवेन। प्रलयकालवेलामिव समुद्वितोऽर्कसमूहः सूर्यसमूहो यस्याम्; पक्षे—अर्कौ हविर्भेदः, ("अर्कोऽहिमुकाख्योतः" इत्यमरः) "मदार" इति भाषायाम्। नागराज-क्षितिमिवानन्तः शेषः, मूलमादिकारणमस्याः; पक्षे—अनन्तानि मूलानि यस्याम्। सुधर्मामिव देवसभामिव, स्वच्छन्दं स्थितः कौशिक इन्द्रो यस्याम्; पक्षे—कौशिक उलूकः। सत्पुरुषसेवामिव बहुश्रीयुक्तैः फलैराढ्याम्; पक्षे—श्रीफलो बिल्वः। ("बिल्वे श्रीफलशैलूषौ मालूरश्रीफलावपि" इत्यमरः)। भारतसमरभूमिमिव दूरप्ररूढो-ऽर्जुनः पार्थो यस्याम्; पक्षे—अर्जुनो हविर्भेदः। ("इन्द्रद्रुः सक्तुकोऽर्जुनः" इत्यमरः)। पुलोमकुलक्षितिमिव सहस्रनेत्रायेन्द्राय, उचिता योग्या, इन्द्राणी यस्याम्; ["नयुतस्य" इति वप्] पक्षे—सहस्रनेत्रः सहस्रमूर्तेः, उचिता योग्या, इन्द्राणी शतावरी। ("शतावरी सहस्रेन्द्राणी शतवादिनी" इति रभसः)। शूलपाणी वैश्वानरो वैद्युतो वा, तच्चित्तवृत्तिमिव फालिता सफला, वैद्युतेऽग्नौ घनसम्पात् सुरतसुखसम्भवात्, सचिवानां वेश्यानाम्, चारित्र आचरितव्यवहारं वा यस्यास्याम्; [यद्यपि चात्रनिर्देशे खलु, इति। चर्चान्तरे चाक्पूर्वः। "प्रलयकालात्—"इतीवादः] पक्षे—सचिवारिका हविर्भेदः, ("श्रीपर्णसचिवमः स्यात् सचिवा सचिवारिका" इत्यमरः) जयपर्व इति प्रसिद्धः। सज्जनसम्पदमिव विकसिता पुष्टाः, अशोकाः शोकरहिताः, सरलाः उदाराः, पुरुषा नागा इव पुन्नागाः पुरुषश्रेष्ठा यस्यां शैलोर्वीकां

मिव क्रतधात्रीधृतिं, क्वचिद्राघवचित्तवृत्तिमिव वैदेहीमयीं, क्वचित् क्षीरसमुद्रमथनवेलामिवोज्जृम्भमाणामृतां, क्वचिन्नारायणशक्तिमिव स्वच्छन्दापराजितां, क्वचिद्वाल्मीकिसरस्वतीमिव दर्शितेक्ष्वाकुवंशां, लङ्कामिव बहुपलाशसेवितां, कुरुसेनामिवार्जुनशरनिकरपरिवारितां, नारायणमूर्त्तिमिव बहुरूपां, सुग्रीवसेनामिव पनसचन्दनकुमुदनलसेवितां, अविन्ध्यामिव सिन्दूरतिलकभूषितां प्रवालाभरणां च, कुरुसेनामिवोलूकद्रोण-

---

वा ताम्; ("स्यतरपदे व्याघ्र पुङ्गवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः॥" इत्यमरः) पक्षे—विकसिताः फुल्लाः, पद्माकाः सरजाः पुन्नागा यस्यां तां, ("पीतद्रुः सरलः पूतिकाष्ठम्"। "पुन्नागः पुरुषद्रुमः केसरी देवकुञ्जरः" इति द्व्योरप्यमरः)। शिशुजनलीलामिव क्रतां धात्र्या धृतिर्यया; पक्षे—धात्री आमलकी। राघवो रामचन्द्रः, तस्मिन्नर्पितामिव वैदेहीमयीं सीतामयीम्; पक्षे—वैदेही पिप्पली, ("वैदेही तोषणासीता-वणिक्स्त्रीपिप्पलीष्वपि" इति विश्वप्रकाशः)। क्वचित् क्षीरसमुद्रमथनवेलामिवोज्जृम्भमाणमनवरतं यस्यां ताम्; पक्षे—अमृता गुडूची, ("गुडूची तन्त्रिकाऽमृता" इत्यमरः)। क्वचिन्नारायणशक्तिमिव स्वच्छन्दा स्वयमा, अपराजिता पराजयरहिता ताम्; पक्षे—स्वच्छन्दा निरर्गल-प्रसूना, अपराजिता विष्णुक्रान्ता, ("विष्णुक्रान्ताऽपराजिता" इत्यमरः)। वाल्मीकि-सरस्वतीमिव दर्शित इक्ष्वाको राज्ञः, वंशः सन्ततिर्यस्यां ताम्; पक्षे—("इक्ष्वाकुः कटुतुम्बी स्यात्" इत्यमरः)। लङ्कामिव बहुपलाशैः राक्षसैः, सेवितां; पक्षे—पलाशो द्रुः। कुरुसेनामिवार्जुनशरनिकरैः परिवारितां; पक्षे—अर्जुनशरौ द्रुवृक्षविशेषौ, तयोर्निकरैः परिवारितां। नारायणमूर्त्तिमिव बहुरूपामनेक-स्वरूपाम्; पक्षे—बहुरूपां बहुपत्रां, ("रूपं तु श्लोकसन्दर्भोः। पत्राद्यावाद्यौ सौन्दर्ये नाटके नाटकादिके॥ यत्नावस्तौ स्वभावे च" इति हैमः)। सुग्रीवसेना-मिव पनसचन्दनकुमुदनलैस्तद्वदभिधानैर्वानरैः, सेवितां; पक्षे—पनसचन्दने द्रुौ, कुमुदं पुष्पं, ("पनसः कण्टकिफले कण्टके कपिकच्छिकोः"। "चन्दनं नलयोद्रुवे। चन्दनः कपिभेदे स्यात्"। "कुमुदं वेरवे रक्त पङ्कजे कुमुदः कपौ। देत्यान्तरे च दिङ्नाग-योगयोरपि कीर्त्तितः॥" इति मेदिनि विश्वप्रकाशः)। अविन्ध्यामिव सिन्दूरस्य तिलकेन भूषिताम्; पक्षे—सिन्दूरतिलको द्रुविशेषः, ("सिन्दूरस्तबभेदे स्यात्

प्रकुलिसनाथां धार्त्तराष्ट्रान्वितां च, यज्ञानजातिभूषितामप्यकुलीनवंशां, दर्शितामयामपि विभीषणां, सततहितपथ्यामपि प्रहस्तयुक्तां, षट्पदाकुलामपि द्विपदानाकुलां, द्विजकुलभूषितामप्यकुलीनवंशां विन्ध्याटवीं विवेश। अनन्तरं तमोनिद्रामादाय जगाम रजनी।

सिन्दूरं रक्तदूर्वके" इति विश्वः। "तिलकः सुरकः श्रीमान्" इत्यमरः) पक्षे—रक्तचन्दनादिचर्चा सिन्दूरचारुणं प्रोक्षितमर्घ्यजलादिभिर्विधीयमानैः, प्रवालाः प्रस्फुटकेशा विद्रुमा वा, आभरणं यस्यास्ताम्; पक्षे—प्रवालाभरणां नवपल्लवालंकाराम्। कुरुसेनाविशेषोत्कटदोषप्रकुलिभिस्तीक्ष्णदन्तिभानैर्वैरैः, सनाथाम्; पक्षे—उत्कटः कोविदः, दोषः खड्गः, प्रकुलिः पक्षिणामार्यः, तैः सनाथां, धार्त्तराष्ट्रैर्धृतराष्ट्रसुतैः, अन्वितां; पक्षे—धार्त्तराष्ट्राः पक्षिणः, ("धार्त्तराष्ट्राः खिलैतरैः" इति राजदंडवरुणेऽमरः)। यज्ञानजातिभूषितामुत्तमजातिभूषितामपि, न कुलीनं उत्तमकुलविशिष्टः, वंशः खलानो यस्यास्तामिति विरोधः; ("वंशोऽन्वयाः सन्ताः" इत्यमरः) यदा—न कुलीनमकुलीनमकुलम्, वंशो यस्यां यस्याः; ("वंशो वेणौ कुले गर्वे पृष्ठास्थ्यवयवेऽपि च" इति विश्वमेदिनी) परिहारस्तु—यज्ञानी महामहा, जातिर्मालती, ताभ्यां भूषितां, न कुलीना वंशा वेणवो यस्याम्, ("यज्ञानस्तु महामहा"। "सुमना मालती जाति:" इति हलायुधेऽमरः)। दर्शितमभयं यस्यामीदृशी यया साहस्रमपि विशेषेण भीषयतीति विभीषणेति विरोधः; दर्शितमभयं नवदम्, यमया हरीतक्यो वा यया विभीषणा जनमञ्जरादिचर्चादिति परिहारः, ("यमयं नवदं क्षेम्यम्"। "यमया त्वक्षया पथ्या" इति हलायुधेऽमरः)। सततं हितं पथ्यं यस्यामपि यज्ञाध्वरोन्मिश्रानपि, प्रहस्तयुक्तामिति विरोधः; सततं हिता यात्रा, पथ्या हरीतक्यो यया सा, [हि यतौ, स्तः, सप्तम्यर्थात् यात्रार्थे:] प्रहस्ता युक्ता यस्याम्, ("प्रहस्ताङ्के लम्बयुक्तौ" इत्यमरः)। षट्पदैर्भ्रमरैः, व्याप्तामपि द्विपदैर्नृभ्यैः, अनाकुलां, असङ्कीर्णामिति भावः, यत् तु अमरः षट्पदेषु पदत्वसद्भावादिति भाव इति तन्निरस्तम्; औचित्यपूरा तद्धा पूर्वसद्धां बाधते इति विरोधानुद्धाराच्च, न हि त्रिपुरो द्विपुरस्यपदेशं लभते; यदा—द्विपानां इलिनां, दानेन मदजलेन, अम्बाम्, षट्पदैर्भ्रमरैः, व्याप्ताम्। द्विजकुलैश्च भूषितामप्यकुलीनवंशां, ब्राह्मणकुलस्य सर्वोत्कृष्टतया विरोधः; परिहारस्तु—द्विजकुलैः पक्षिसमूहैः, भूषिताम्। अनन्तरं तमोनिद्रां तमश्चन्द्रमसोः, निद्रामादाय रजनी रात्रिः, जगाम।

क्रमेण च कालकेवर्त्तेन तमिस्राऽऽनायं प्रक्षिप्य गगनमहासरसि सजीवशफरीनिकरे इवापक्षिप्यमाणे तारामत्स्ये, रत्नांशुकपटे, विकसत्प्रबुद्धबिसलताशरयन्त्रकानुगतशतपत्रपुष्पकमलनाले, मकरन्दबिन्दुसन्दोहनिर्भरपानमत्तमधुकरसान्द्रमन्द्रझङ्कारैः स्वधर्ममिव पठति विकचकमलाकरभिक्षौ, तपोबलेनेव कालेन तिमिरबीजेष्विव मधुकरेषु कुमुदचक्रेषु मधुरसकर्दमितपरागपङ्केषु घनघट्टमानदलेषु भ्रमरेषु व्याजात् पङ्कजे घूर्ण्यमानेषु, रजोमुर्मुरसनाथमधुकरपटलानुगतोद्दण्डपुण्डरीकव्याजाद्रूपपटलमिव भगवते किरणमालिने प्रयच्छन्त्यां कमलिन्यां, रजनीबधूकरतलहतोच्छलित-पतत्प्रभात-मुसलाहति-क्षतान्तरे उलूखले इव चन्द्रे कण्डनकीर्णेष्विव तण्डुलेषु तारागणेषु मौक्तिकेषु, सन्ध्याताम्रमुखेनेव वासरवानरेण नभस्तरुमारोहता शाखाभ्य इव क्रमिताभ्यो दिग्भ्यो विकचप्रसूने

क्रमेणोक्तविशेषणयुक्तेषु तारादिषु चन्द्रकेतुर्वासवदत्तश्च सह खलाग्रहे सुखापेक्षत्वतः। कालेत्यादि।—केवर्त्तो धीवरः, आनायो जालं, ("केवर्त्ते दाशधीवरौ"। "आनायः पुंसि जालं स्यात्" इति द्वयोरप्यमरः)। रत्नांशवः एव रत्नांशुकाः, [स्वार्थे कन्] रत्न एव पटाः यस्य तस्मिन्; रत्नांशुकं रत्नवस्त्रं, पटो वसनं यस्येति च। विकसत्प्रबुद्धबिसलतेव शरयन्त्रकं तास्रपत्रीपुष्पकमध्यवस्त्रं, तेनानुगतं शतपत्रं कुशेशयं, तदेव पुष्पकं तेन सनाथे, "बिसं" इति भाषायाम्। मकरन्दबिन्दुसन्दोहनिर्भरपानमत्तमधुकराणां सान्द्रैर्मन्द्रैश्चोरैः, मन्द्रस्वने: स्वधर्मं पठतीव विकचे किमतरैश्चे विकसिते च, कमलाकरभिक्षौ, ("मन्द्रस्तु मन्थरे" इति भरतकारयोऽमरः। "शतपत्रं कुशेशयम्" इति वनौषधिवर्गे च)। तपोबलेनेत्यादि।—तपोबलः कर्मफलं, ("कर्मफलं तपोबलः" इत्यमरः) घूर्ण्यमानेषु [टुघूर्ण भ्रमणे]। रजोमुर्मुरेत्यादि।—किरणमालिने सूर्याय। रजनीत्यादि।—बधूकरतलाघातः, कलान्तरे खण्डितमध्यभागे, नाम्नि कलशः, किन्तु मुसलाघातस्थानाकार एव दृश्यते इति द्योतनाय कलान्तरत्ववर्णनं, कलशेत्यादि। सन्ध्येत्यादि।—सन्ध्येव ध्यानस्थैर्य, ध्यानार्थं वृक्षं यत्र तादृशेन ध्यानस्थानदेव, ध्यानमुक्तत्वात्

एव तारागणे चन्द्रमण्डले फले च निपतति, तारागणशालितण्डुलशबलनभोऽङ्गणं स्फुरदरुणतरुणचूडाचारुवदने वासरजकवाकौ चरितुमवतरति, मल्लक्रुतिप्रहृष्टो वारुणीसमागमात् द्विजपतिरेष पतिष्यतीति हसन्त्यामिवाखण्डलककुभि, अरुणकेसरिकराघातनिहतान्धकारकरीन्द्रुधिरधारामिरिव, उदयगिरि-शिखर-निर्झर धौतधातु-धारामिरिव, तुङ्गतुरङ्गखरखुरपुटपाटितपद्मरागच्छटाभिरिव, केसरिकरतलाहतमत्तमातङ्गोत्तमाङ्गसङ्गलदसृप्रसारिणीरिव, उदयाचलकूटकोटिप्ररूढजपाकुसुमकान्तिभिरिव, त्रिभुवनकार्य्यसम्पादकप्रभानुरागरसैरिव रक्तमण्डले, ताराकुमुदग्रहणाय प्रसारितहस्ते एव कुङ्कुमरागारुणे प्राचीविलासिन्याः, पूर्वाचलभोगीन्द्रफणोपले, गगनेन्द्रनीलतरुकनककर्किसलये, नभोनगरप्राचीरकनककुम्भे,

---

मल्लजातीयनिहतये। स्फुरदरुण एव सूर्य्यसारथिरिव, तरुणचूडा तया चारुवदने, स्फुरत्यारुण्यया रक्तया, तरुणचूडया चारुवदने क्रकवाकौ चरितुं भक्षयितुं, तारागण एव शालितण्डुलं तेन शबलं नभोऽङ्गणमवतरति, [मेघा वर्षतीतिवत् प्रसिद्धेश्चरते: कर्म लोपात्तम्]। मल्लक्रुते: प्रहृष्ट एव द्विजराजचन्द्रः, वारुणी पश्चिमदिक्, तत्समागमात् पतिष्यति इति हसन्त्यामिवाखण्डलककुभि पूर्वदिशि, मया सह यदा सङ्गतस्तदाभयोः समवयस्कतायाऽऽसीत्, इदानीं त्वपराङ्गना उपभुक्ताऽपि प्रवयस्यासीदयमपि क्लान्तस्तथा चारुधाराऽत्योत्सुक्यादापतिष्यतीति भावः, तथा च यस्मुखस्त्रीभाव्मा परित्यक्त यातस्तत् सुखं नाप्नातीत्युपहासः, उक्तं चाश्वत—"बालोपभुक्ता बलवानधाति पतिं सुधाङ्गं तरुणी करोति। प्रौढा जरां निश्चितमेव सूते हृदा नितान्तं बलवीरहानिम॥" इति ; द्विजराजो ब्राह्मणश्रेष्ठः, वारुणी मदिरा, पातष्यति ब्राह्मत्वमेष्यति। रक्तमण्डलेऽरुणमण्डले, भास्करे उदयमारोहतीत्यन्वयः। करीन्द्रत्यादि। धातुर्गैरिकः। पद्मरागो मणिः। असृ रुधिरं, ("रुधिरेऽसृक्स्रवोक्षितान्नम" इत्यमरः। "प्रसारिणी प्रणालिका" इति हारावली)। कूटः शृङ्गम्। भोगी लोकानां भीतिः। ताराकुमुदेत्यादि। फणोपले फणाप्रस्तरे। गगनमाकाश एव, इन्द्रनीलतरुकनककर्किसलये सुवर्णपल्लवे, राजभवनादौ लम्बितुं शक्ये,

तप्तलोहकुम्भाकारे, प्राचीललाटतटकुसुम्भाम्बुबिन्दौ, सन्ध्यावनलतैककुसुमे, मञ्जिष्ठारक्तपट्टसूत्रसङ्गे, सन्ध्यारागगुणगुम्फिते, प्राचीकाञ्चनदीनारचक्रे इव, वासरविद्याधरसिद्धगुटिके इव, धातुरागारुणदिग्गजपादतलानुकारिणि विभावरीतिमिरतस्करे भास्करे उदयमारोहति, माञ्जिष्ठचामरे इव दिग्गजेषु, महाभारतसमरभूमिरुधिरोद्गारे इव कुरुक्षेत्रेषु, सुरराजशरासनकान्तिलेपे इव जलदच्छेदेषु, काषायपटे इव शाक्याश्रममठिकासु, कौसुम्भरागे इव ध्वजपटपल्लवेषु, फलपाके इव कर्कन्धूषु, कुङ्कुमच्छटारसे इव व्योममहासौधाङ्गणस्य, सञ्चरदरुणजवनिकापटे इव कालनर्त्तकस्य, बालप्रवालभङ्गारुणे प्रसरति बालातपे, क्षणेन च चाटुचटुलचक्रवाकहृदयशोकसन्तापहरणादिव, दहनसमर्पिततेजःप्रवेशादिव, दिननाथकान्तोपलानलसङ्गादिव, उष्णमानमुष्णरश्मेराश्रयति रश्मिसञ्चये कन्दर्पकेतुः सर्वरात्रजागरणपरवशाहारशून्यशरीरतया निश्चेतनोऽनेकयोजनशतभ्रमणखिन्ना वासवदत्तयाऽप्येवंविधया सह लतागृहे मन्दमारुतान्दोलितकुसुमपरिमललुब्धमुग्धपरिभ्रमद्भ्रमरझङ्कारमनोहरे तत्कालागतया निद्रया गृहीतो निःस्पन्दकरणग्रामः सुष्वाप।

तव रेखागणयत्यायात् तदना। नभ इत्यादि।—प्राचीरं नगरप्रान्ते कण्टकादिवेष्टनं, ("प्राचीरं प्रान्ततो वृतिः" इत्यमरः)। प्राचीललाटतटे कुसुम्भाम्बुबिन्दौ मञ्जिष्ठारञ्जनजलबिन्दौ, ("स्यात् कुसुम्भं करिभिरिष्टं मञ्जिष्ठारञ्जनमित्यपि" इत्यमरः)। दीनारचक्रं निष्कचक्रं, ("दीनारेऽपि च निष्कोऽस्त्री" इत्यमरः)। तस्करे मोषके, ("दस्युतस्करमोषकाः" इत्यमरः)। एतादृशे बालातपे प्रसरति। दिग्गजपोले माञ्जिष्ठं मञ्जिष्ठारक्तं, चामरमिव, ["तेन रक्तम्" इत्यण्]। सुरराजशरासननिम्नदण्डः। काषायं काषायरक्तम्। शाक्यो बौद्धभेदः। मठिका "मठी" इति भाषायाम्। कर्कन्धूर्बदरी, ("कर्कन्धूर्बदरी कोली" इत्यमरः)। जवनिका तिरस्करिणी, ("प्रतिसीरा जवनिका स्यात् तिरस्करिणी च सा" इत्यमरः)। प्रवालो विद्रुमः। क्षणेन क्षणारम्भे सूर्यस्य, रश्मिसमूहं उष्णिमानमाश्रयतीत्यन्वयः। दिननाथकान्तोपलं सूर्यकान्तमणिः। निःस्पन्दकरणग्रामः खलविषयपङ्कपासनर्थेन्द्रियवर्गः।

ततो वणिजोव प्रसारिताम्बरे, महादावानले इव सकल-काष्ठोद्दीपिनि पतङ्गमण्डले मध्यन्दिनमारूढे कथमपि कन्दर्प-केतुः प्रियया विनाकृतं लताग्रहमवलोक्योत्थाय च तत इतो दत्तदृष्टिः क्षणं विटपेषु, क्षणं लताऽन्तरेषु, क्षणमन्धकूपेषु, क्षणं शुष्कपर्णराशिषु, क्षणं तरुशिखरेषु, क्षणमाकाशे, क्षणं दिक्षु विदिक्षु च भ्रममनवरतविरहानलदह्यमानहृदयो विललाप —"प्रिये! वासवदत्ते! देहि मे दर्शनं, किं परिहासेनान्तरिताऽसि? त्वत्कृते यानि मया दुःखान्यनुभूतानि तेषां त्वमेव प्रमाणम्। हा प्रिय! मकरन्द! पश्य मे देव-दुर्विलसितं, किं मया न ज्ञातमवदातं कर्म? अहो! दुर्विपाका नियतिः, अहो! दुरतिक्रमा कालगतिः, अहो! ग्रहाणा-

---

तत ऊर्ध्वमिन्द्रोत्तरम्। पतङ्गमण्डले सूर्यमण्डले, नभोमध्यमारूढे सतीत्यन्वयः। वणिजोव प्रसारिताम्बरे प्रसारितवस्त्रे; पक्षे—अम्बरमाकाशम्। काष्ठनिस्वनं, काष्ठा दिक्, दीपिनि प्रकाशके दाहके च, ("पतङ्गो पक्षिसूर्यौ च"। "अम्बरं व्योम-वाससी" इत्यमरमाध्यमरः)। अथ कन्दर्पकेतुर्दैवेनेति कर्तृपदमध्याहार्यम। प्रियया विनाकृतं लताग्रहमवलोक्य विललापेत्यन्वयः, [विनार्थोगे "पृथग्विनानानाभिः" इति तृतीया]। विरहादुन्मादं वर्णयति। परिहासेनान्तर्हिता खादिति। क्षणं विटपेषु वृक्षविशेषेषु, क्षणं लतान्तरेष्वन्विष्यन्, तत्र तामनुपलभ्य ब्रूते, ननु नेयं परिहासेनान्तरिता पूर्वं, मया नेयं विप्रलब्धा, सत्यङ्मदाग्रहानभिज्ञा क्षुण्णशान्तां शान्ता तादृशानुरागा सेयं शिरोरुहदहनो भीषणे प्रदेशे कथं मां परित्यज्य स्थास्यतीति। मानुषीष्वेतादृशरूपानुपलम्भान्नागकन्येति कैश्चिन्नागेव वा न नीता स्यादिति क्षणमन्धकूपेषु। क्षणं शुष्कपर्णराशिषु सा क्वाप्यमृत्युयोगात् तादृशोग्रया वा तत्रैव पर्णापगतलीलया भीरुत्वेन भयस्थाने एव परित्यक्ता स्यात्। अथवा सुरेन्द्रया कैश्चिद्विद्याधरिद्धारिण्या विद्याधरादिना वा अपहृता स्यादिति क्षणं तरुशिखरेषु, क्षणमाकाशे, क्षणं दिक्षु विदिक्षु च। कुतोप्यनुपलब्धादनवरतविरहानलदह्यमानहृदयः अत एवापगततर्कः आह, प्रिये! इत्यादि।—दैवदुर्विलसितं भाग्यदुर्विपाकम्। अवदातं शुद्धं, [दैप् शोधने, कर्मणि क्तः] ("अवदातं तु विमले मनोज्ञे सितपीतयोः" इति हैमः)। अहो! नियतिर्दैवम्, दुर्विपाका, ("दैवं दिष्टं भागधेयं भाग्यं स्त्री

मतिकटुकटाक्षनिरीक्षणम्, अहो! विसदृशफलता गुरुजनाभिषाम्, अहो! दुःखप्रायानां दुर्निमित्तानां च फलितं, सर्वथा न किञ्चिदगोचरो भवितव्यतानां, किं न सम्यगागमिता विद्याः? किं न यथावदाराधिता गुरवः? नोपासिता वक्त्रयः? किमधिचिक्षिपा भूदेवाः? किं न प्रदक्षिणीकृताः सुरभयः? किं न कृतं शरणेष्वभयम्?" इति बहुविधं विलपन् दक्षिणेन कानने निर्गत्य नव्यनडवलदलनलिनीनिचुलपिचुलविदुलबकुलेन, प्रचुरचिरबिल्वखिखाटजकुटजकरञ्जोपकण्ठेन, सोत्कण्ठ-

---

नियतिर्विधिः" इत्यमरः) दैवनियत्योः पर्य्यायतया पुनरुक्तिरियं वैचित्र्येण। कालगतिः दुःखेनातिक्रमो यस्याः। कटु क्रूरम। गुरुजनाभिषानजान् परित्यज्य यातोऽपि सुकृतिभोग्यान् भोगान् लभस्वेत्येवंरूपाम्; स्रष्टा चेयं रीतिरर्जुनदारार्थाभिमन्युविलापे महाभारते; विसदृशफलता। दुःखप्रायानित्यादि। भवितव्यतानां शुभमशुभं वा भागीधरो नाविषयः, तथा च भवभूतिः,—"प्रायः शुभं च विदधात्यशुभं च जन्तोः सर्वंकषा भगवती भवितव्यतैव" इति। किं विद्या ज्योतिर्नीतिप्रमुखाः, न सम्यगागमिताः? न सम्यक् परिशीलिताः? यदाराध्या दुर्मुहूर्त्ते प्रक्षिप्तं नीतिविरुद्धं चाव स्थितमिति भावः। यथावत् यथाम्नायम्; उदनयेऽप्यभयदात्वेति। किं भूदेवा द्विजाः, अधिचिक्षिपाः? तिरस्कृताः? तदुक्तं—"अतप्ततोयं गतायुषं ब्राह्मणान् हेटि भारत" इति; तेन किं वा समेधमवज्ञा? इति भावः, ("अथजन्मभूदेवबाडवाः" इत्यमरः)। किं सुरभयो गावः, न प्रदक्षिणीकृताः? अथेन्द्रमुपजायतुर्लोकां सुदक्षिणां सुरभी दिवीयो मार्गेणां चेत्तुनप्रदक्षिणीकृत्येव यातस्तया अतः, एवमस्तमपि किं गोभिः अतः? इति भावः। किं शरणेषु शरणागतेषु, अभयं न कृतम्? येन नामापि कस्मिन् प्रियादानेन विरहानलाद्य भायते इति भावः। [दक्षिणेनेत्येतद्वलम्] कानननिर्गत्य ["एतया दिशा" इति दिशा]। निर्गत्य कञ्चीपाल्लेन क्षतिपयदूरं गत्वा नव्यनिधिनवपल्लविनत्यः। नव्या नवा वनना:, नवदाम्बभयानि, नलिन्य पद्मिन्यः, निचुलाः छिन्नजाः, पिचुला भाषुलाः, विदुलाः परिव्याधाः, बकुलाः केसरा यत्र तेन। ("नवस्तु वनना:", "नरकट" इति ख्यातम्। "उमीरनलिकायाम्। अभयं नवदम्", "खस" इति ख्यातम्। "नलिनीपद्मिनीमुखाः", "जलो पिचुलभाषुको", "भाउ" इति ख्यातम्। "द्वौ परिव्याधविदुलौ",

भृङ्गराजरसितसुन्दरसुन्दरीवनेन, वितततेवव्रततिव्रातावरण-तरुणवरुणवृक्षबदरबहुभृङ्गरोलेन, गोलाङ्गूलभालगलमधुच्छत्र-मधुपटलरसासारसिक्ततरुतलेन, तालहिन्तालपूगपुन्नागकेसर-घनेन, घनसारमल्लिकाकेतककोविदारमन्दारबीजपूरजम्बीर-जम्बुगुल्मगहनेन, अप्रत्यूहदात्यूहकुहरितभरितनदीनल-

"वेत" इति ख्यातम। "यष्ठ केसरे वकुल:", "बौरसरी" इति ख्यातम। "निचुलो हिज्जलोऽम्बुज:", "असवेन" इति ख्यातम। "अमृतफल" इति ख्यातम इत्यन्ये। इति सप्रपञ्चममर:)। प्रफुल्लेक्षिरिबिल्वै: करञ्जै:, बिल्वै: शैलूषै:, वटजै: पर्णसधैर्मुनिगृहै:, कुटजेहेमभेदै:, कहोपकण्ठेन, ("क्षिरविल्वो नक्तमाल: करञ्जस्य करञ्जके"। "मुनीनां तु पर्णशालोटजोऽस्त्रियाम्" इति द्वयोरप्यमर:। "कुटजो दधिभेदे स्यादगस्त्यद्रोणपोरपि" इति विश्वप्रकाश:, "कोरया" इति भाषायाम्)। सोत्कण्ठभृङ्गराजरसितेन सुन्दरं सुन्दरीवनं यत्र तेन, ("सुन्दरी तरुणिभारी-भिदो: स्त्री रुचिरेऽन्यवत्"। "भृङ्गराजस्तु विज्ञेय भीमधौ पक्षिभेदके" इति धरणि:)। विततानां वेवल्लतीनां व्रातो व्यूह:, आवरणं येषां तादृशास्तरुणा नवीना:, बहुवाल्लिशाखा:, तेषां स्कन्धे सञ्जाता भृङ्गरोला: कीटा: पक्षिणो भ्रमरा वा यत्र तेन, ("वल्ली तु व्रततिर्लता"। "बरणे बहव: सेतस्त्रिशाखा:" इति द्वयोरप्यमर:। "भृङ्गरोल: पक्षिभेदे कीटभेदे च षट्पदे" इति धरणि:)। गोलाङ्गूलीत्यादि।—गोलाङ्गूलो वानर:, ("गोलाङ्गूल: प्लवङ्गश्च कौश: शाखामृग: कपि:" इत्युत्पलिनी)। तालस्तरुराज:, हिन्तालो द्वीपोऽब्धिस्थलो हिन्ताल:, [पृषोदरादि:] पूग: क्रमुक:, पुन्नागो देवकुसुम:, केसरी नागकेसर:, तैर्घनेन, ("तरुराजाह्वयस्ताल:", "ताड" इति ख्यातम्। "पूग: क्रमुको गुवाक:", "सुपारी" इति ख्यातम्। "पुन्नागे पुरुषस्तुङ्ग: केसरो देवकुसुम:", गुर्जरदेशे "देवरा" इति ख्यातम्, इति विश्वप्रकाशे। "केसरो नागकेसर:" इति हैम:)। घनसारो दधिभेद: कर्पूरश्चन्द्रो वा, मल्लिका हंसालिपूर्व्यो वा, केतकं, कोविदारो युगपत्रक:, मन्दारोऽर्क: पारिजातको वा, बीजपूर: फलपूर:, जम्बीरो मरुवक:, जम्बू:, गुल्मा: स्तम्बा:, तैर्गहनेन, ("कुलाल्लक: पुष्पफलो घनसार:" इति हारावली। "घनसारस्तु कर्पूरे दधिभावसंपारदे" इति हैम:। "मल्लिको हंसभेदे स्यात् तृणपूर्व्ये तु मल्लिका" इति रुद्र:। "कोविदारे चमरिक: कुद्दालो युगपत्रक:", "कचनार" इति ख्यातम्। "मन्दारवृक्षकोरवा: सुन्दरश्च", "मदार" इति ख्यातम्। "मन्दार: पारिजातक:", "कल्पतरु" इति ख्यातम्।

निकुञ्जेन, पुञ्जिताकुण्ठकण्ठकलकण्ठाध्यासितोद्दामसहकार-पल्लवेन, चपलकुलायकुक्कुटकुटुम्बसंवाहितोत्कटविटपेन, कोरक-निकुरुम्बरोमाञ्चितकुरबकराजिना, रक्ताशोकपल्लवलावण्यलिप्य-मानदग्धदिशा, प्रविकसितकेसररजोविसरधूसरिमभरेण, पराग-पिञ्जरमञ्जरीमुह्यमानमधुकरमञ्जुझिञ्जितजनितजनमुदा, मद-जलमेचकितमुचुकुन्दस्कन्धकाण्डकथमाणनिःशङ्करिकटविकट-कण्डूतिना, कतिपयदिवसप्रसूतकुक्कुटीकुटीरीकृतकुटजकोटरेण, चटकसञ्चार्य्यमाणचटुलवाचाटचाटकैरक्रियमाणचाटुना, सह-चरीचारणचुञ्चुचतुरचकोरचञ्चुना, श्रेलेयसुकुमारतरशिलातल-सुखशयितशशकशिशुना, भेकालिकाशिफाविवरविस्रब्धविवर्त्त-मानगोधेरराशिना, निरातङ्करङ्गुणा, निराकुलनकुलकुल-

"मन्दारः पारिजातकः। पञ्चैते देवतरवः" इति देवतरवः। "फलपूरो बीजपूरः", "बिजौरा" इति ख्यातम्। "सहकारः प्रसूनेषुः फलिताम्रतरुः। आम्रोऽपि", "महुवा" इति ख्यातम्। "अपक्वाण्डे सलवणौ" इति षट्खलक्षमरः)। अपत्यद इत्यादि।—प्रत्यूषो विघ्नः। पुञ्जीकृतेनाकुण्ठकण्ठः कलकण्ठः कोकिलः, तेनाध्यासितो सहाममहकारपल्लवो यत्र तेन। चपलेन कुलायकुक्कुटकुटुम्बेन संवाहितो मर्दितः, उत्कटविटपी यत्र तेन। कोरकेत्यादि।—निकुरुम्बः समूहः, कुरबको रक्तसहा-वहा, "लाल कटसैरैया" इति भाषायाम्। विसरः समूहः। मुचुकुन्दो वृक्षभेदः, ("मुचुकुन्दो वृक्षभेदे मुनिदेत्यविशेषयोः" इति विश्वः)। कटः गण्डस्थलः। कतिपयदिनप्रसूतकुक्कुट्या कुटीरीकृतं कुटजकोटरं निष्कुटी यत्र तेन। चटकः कलविङ्कः, ("चटकः कलविङ्कः स्यात्"। "पुमपत्ये चाटकैरः" इति वृषोदरमरः)। [चटकाया ऐरक्] वाचाटो बहुभाषी, ["बालमाटचौ बहुभाषिणि" इत्याटच्]। सहचरीचां सञ्चारचेष्वभिविष्टैः, चतुरचकोरैः पक्षिभिः, चुञ्चुना विदेन, ["तैन वित्तचुञ्चुवचसी"]। श्रेलेयं ("कालानुसार्य्यवहारस्य पुष्पशैलजयोरपि तु। श्रेलेयम्" इत्यमरः)। भेकालिका सुवहा, ("भेकालिका तु सुवहा" इत्यमरः, "निवारी" इति ख्यातम्। "भिक्षा जटायां वरति मांसिकायां च मातरि" इति विश्वप्रकाशः) गोधेरः ["गोधाया ढ्रक्" इति ढ्रगन्तः] ("स्यो गोधेरगोधार-गोधेया गोधिकाऽजे" इत्यमरः, "गोह" इति ख्यातम्)। राशिः समूहः, ("आम्रिकायाः पुञ्जराशौ"

केसिना, कनकोकिलकुलकवलितसहकारकलिकोद्गमेन, सङ्कारारामरोमन्थायमानचमरीयूथेन, श्रवणहारिसलीलगिरिनितम्ब-निर्झर-निनाद-निद्राण-मन्द्रायमान-करिकुल-कर्णताल-दुन्दुभिना, समासन्नकिन्नरीगीतरवरज्यमानरुरुविसरेण, क्वचित्हरितहरिद्राद्रवरज्यमानवराहपोतपोत्रपालिना, गुञ्जापुञ्ज-गुञ्जज्जालकजालेन, दंशनकुपितकपिकपोतनखकोटिपाटित-पाटलकोटपुटसङ्कुलेन, कुलिशशिखरखरनखरप्रचयप्रचञ्च-चपेटपाटित-मत्तमातङ्गकुम्भस्थल-रुधिरच्छटाच्छुरितचारुकेसर-भारभासुरकेसरिकदम्बेन, महासागरकच्छोपान्तेन कतिपय-दूरं गत्वाऽतिचपलवीचिप्रचयतया ताम्रबाहुदण्डदोर्दण्डखण्ड-परशुविडम्बनापण्डितं, वारुणीविजयपताकाभिरिव, शेषकुल-निर्मोकमञ्जमञ्जरीभिरिव, शशाङ्कपरिशेषपरमाणुसन्ततिभि-

---

दृत्यमरः) रङ्कुमृगः, ("रङ्कुश्वररौहिषाः" इत्यमरः)। रोमन्थायमानाः चर्वितमात्मनश्च पुनश्चर्वणं रोमन्थः, ["आत्मनो रोमन्थतपोभ्यां वर्त्तिचरोः" इति क्यङ्। ङित्त्वा-दात्मनेपदम्] चमरो मृगभेदः। श्रवणहारि सलीलं गिरिनितम्बानां निर्झरनिनादेन निद्राणं करिकुलं तस्य मन्द्रायमानः कर्णतालो दुन्दुभिर्येन तेन। रुरुर्मृगभेदः। क्वचिता हरिता आभा, न तु शुक्ला, या हरिद्रा तद्द्रवैः रज्यमाना वराहपोतानां पोत्रपालिर्मुखायपालिर्येन तेन, ("पोत्रं वक्त्रं मुखायच शूकरस्य हलस्य च" इति विश्वप्रकाशः। "पालिः पङ्क्तिप्रदेशयोः" इति विश्वः)। गुञ्जानां काकचिञ्चीनां, पुञ्जे गुञ्जज्जालकजालं यत्र तेन, ("गुञ्जाऽपि पटहे प्रोक्ता काकचिञ्चां फलध्वनौ" इति विश्वप्रकाशः। "घोण्टे काकडिकायां च जालकः परिकीर्त्तितः" इति हारावली)। दंशनेत्यादि।—पाटलकोटः श्वेतरक्तः कोटविशेषः। कुलिशशिखरं वज्रायम्; केसरभारः स्कन्धकेशसमूहः; भासुरं दीप्तिमत्, ["भञ्जभास—" इति घुरजन्ता]; कदम्बकं समूहः। अतिचपलवीचिप्रचयतया अतिचञ्चलतरङ्गसमूहतया, ताम्रबाहुदण्डो दोर्दण्डो भुजदण्डो यस्य तादृशः, खण्डपरशुरिव; तद्विडम्बनापण्डित-मदनुकरणपण्डितं, ("भूतेभः खण्डपरशुः" इत्यमरः)। वारुणी मदनशेर्व, विजयपताकाभिरिवेत्यादिना भावः। शेष इत्यादि।

रिव, लक्ष्मीलीलाऽऽतपंपणधाराभिरिव, जलदेवताचन्दनविच्छित्तिभिरिव, फेनराजिभिरुपात्तरामणीयकम्, अपरमिव गगनमवनिमवतीर्णम्, अर्णवच्छलादुच्छलच्छीकरकणनिकरैर्नभसरान् मुक्ताफलैरिव विलोभयन्तम्, अभयाभ्यर्थनागतानेकसपक्षक्षितिधरभरितकुक्षिभागं, सगरसुतशताखातम्, उत्खातपारिजातकाम्, अभिजातमणिरत्नाकरं, करिमकरकुलसङ्कुलं, शकुलकुलकवलनाभिलाषसञ्चरच्चक्रचक्रम्, अस्खलितमतिमिङ्गिलकुलं, कूलकन्दली-वलयाचल-विलुलितवेला-तरलितलवली-नवङ्गमातुलुङ्गगुल्मम्, ऊर्मिमारुत-प्रसारिततरलतोत्ताल-तालहिन्ताल-तालोतरलित-जलमानुषमिथुनमृदित-सलिलपुलिन-बालशैवालं, प्रवालाङ्कुरकोटिपाटित-मुखखिन्नशङ्खनखशिखालिखित-तटलेखं, खगेश्वरगात्रपत्ररथपटलकलिलसलिलम्, अद्याप्यनिमग्नमन्दरमथनसंस्कारमिवावर्त्तभ्रान्तिभिः, सापस्मारमिव फेनैः, ससुरामोदमिव वेलाबकुलगन्धैः, सरोषमिव गर्जितैः, सखेदमिव निश्वसितैः, सभ्रुकुटीभङ्गुरमिव तरङ्गैः, सालानस्तम्भमिव राम-

---

निर्मोकः ("सर्पो भुजङ्गनिर्मोको" इत्यमरः)। जलतिः समुद्रः। लक्ष्म्या लीलार्थं क्रीड़ार्थं, यदातपत्रम् "आतिपन" इति भाषायां, तद्धारामिरिव। विच्छित्तिश्चमत्कारः। रामणीयकं रमणीयता। अपरमित्यादि। सगरो राजा, खातं [खनु अवदारणे क्तः, "अनुदात्त—" इत्यात्वम्]। पारिजातो देवतरुः। अभिजातानां शुद्धानां, मणीनां रत्नानां चाकरः। करी गजश्चरो गणः, मकरश्च, तयोः कुलेन, करिरूपमकरकुलेन वा, सङ्कुलम्। शकुलो मत्स्यभेदः. नक्रः कुम्भीरः। अस्खलितं चञ्चलं, तिमिं मत्स्यं, गिलतीति तिमिङ्गिलः महामत्स्यः, ["मूलविभुजादित्वात्" कः, "अचि विभाषा" इति ङीष्, "गिलेऽगिलश्च" इति मुग्] तस्य कुलं यत्र तम्। कूलमित्यादि।—लवली लताभेद इति केचित्, फलमित्यपरे, "छरफारेवड़ी" इति प्रसिद्धं, मातुलुङ्गो बीजपूरः, ("बीजपूरो मातुलुङ्गः" इत्यमरः)। प्रवालो विद्रुमः, पाटितं विदारितं, शङ्खनखाः क्षुद्रशङ्खाः, ("क्षुद्रशङ्खाः शङ्खनखाः" इत्यमरः)। खगेश्वरो गरुडः। अपस्मारो रोगः। सुरा मद्यम्। ("आसवं

सेतुना, कुक्षीनसौकुक्षिमिव लवणोत्पत्तिस्थानं, व्याकरणमिव विततस्त्रोनदीकृत्यबहुलं, राजकुलमिव दृश्यमानमहापार्श्वं, हस्तिबन्धमिव वारिगतानेकनागमुच्यमानफूत्कारं, विश्वामित्र-पुत्रवर्गमिवाब्जोजचामरमत्स्योपशोभितं, सत्पुरुषमिव गोत्रा-श्रयं, साधुमिवाच्युतस्थितिरमणीयं, सुनृपमिव सज्जनक्रमकरं, कृतमन्युमिव करतोयाप्लुतमुखं, विरहिणमिव चन्दनोदक-सिक्तं, विलासिनमिव नर्मदानुगतम्, उद्धृतकालकूटमपि प्रकटितविषरागिम्, अतिवृद्धमपि सुन्दरीपरिहृतकण्ठं, सुरोत्पत्तिस्थानमप्यसुराधिष्ठितं जलनिधिमपश्यत्।

बन्धस्तम्भः" इत्यमरः)। कुक्षीनसौ राक्षसौ, तयोरुत्पत्तिस्थानं। व्याकरणमिव विततानि स्त्रीस्त्रीविकारकार्याणि, नदीसंज्ञा तत्कार्याणि, ह्रस्वसंज्ञाकार्याणि, बहुलं सप्तम्या बहुलमित्यादि; पक्षे—विततानां स्त्रोनदीनां पत्नीभूतानां नदीनां, कृत्यैस्तरङ्गाधरणादिरूपैः, बहुलम्। राजकुलमिव महापार्श्वं महासालः; पक्षे—पार्श्वं तीरद्वयान्तरम्। [बन्ध बन्धने, अधिकरणे घञ्] हस्तिनो बन्धस्तम्भोऽत्र हस्तिबन्धः गजबन्धनस्थानमिव, वारिगतैर्बन्धनरज्जुगतैः, तदर्हैः, अनेकनागैर्गजैः, मुच्यमान-फूत्कारं, (पानीये वारि विख्यातं वारि बन्धनरज्जुषु" इति धरणिः) ["वसिवपियजि-राजिव्रजिमदिहनिधामिधादिवारिभ्य इञ्" इतीञ्] पक्षे—वारि जलं, नागाः सर्पाः, (अमरस्तु—"वारो तु गजबन्धनी" इति दीर्घान्तं बन्धनस्थानवाच्यमाह, तन्मते तु नैतदुपपद्यते, कोषान्तरेष्वबन्धे। विश्वामित्रपुत्रवर्गमिव अब्जोजः कमलैः, चामरै-र्मत्स्यैः उपशोभितम्; पक्षे—अब्जोजचामरं ग्रैवालं, ("ग्रैवालं ग्रैवाला-ब्जोज चामरं जलनीलिका" इत्यमरलिपी)। सत्पुरुषमिव गोत्रं वंशः; पक्षे—पर्वतः। साधुमिवाच्युता अक्षता, स्थितिर्मर्यादा, तया रमणीयम्; पक्षे—अच्युतस्य विष्णोः, स्थित्या रमणीयम्। सुनृपमिव सज्जनानां क्रमकरं व्यवहारकरम्; पक्षे—सज्जा नक्रा मकरा यत्र तम्। कृतमन्युमिव कृतक्रोधमिव, करतोयेन पाणिस्थजलेन, आप्लुतं चालितं, मुखम्; पक्षे—करतोया नदी, ("करतोया सदानीरा" इत्यमरः)। विरहिणमिव चन्दनस्योदकेन सिक्तम्; पक्षे—चन्दना नदीविशेषः, चन्दनसम्बन्धि जलं वा। विलासिनमिव नर्म क्रीडा, तां ददाति तामिरनुगतम्; पक्षे—नर्मदा नदी, ("नर्मदा सोमोद्भवा" इत्यमरः)। उद्धृतः कालकूटो

अचिन्तयच्च—"अहो! मे कृतापकारेणापि विधिनोपकृतिरेव कृता यदयं लोचनगोचरतां नीतः समुद्रः; तदत्र देहं मुत्सृज्य प्रियाविरहाग्निं निर्वापयामि। यद्यप्यनातुरस्य देहत्यागो न विहितः, तथाऽपि कार्यः, न खलु सर्वः कार्यमकार्यं वा करोति इति। अस्मिन् संसारे केन किं वा न कृतम्? तथा हि, गुरुदारग्रहणं द्विजराजोऽकरोत्। पुरूरवा ब्राह्मणधनतृष्णया विननाश। नहुषः परकलत्रदोर्दण्डो महाभुजङ्ग आसीत्। ययातिर्विहितब्राह्मणोपाणिग्रहणः

ङ्गाऽङ्गली यस्मात् तमपि, प्रकटितो विषस्य क्ष्वेड्स्य, राशिर्येन तमिति विरोधः; विषं जलमिति परिहारः। अतिरङ्गमतिस्त्रविरमपि, सुन्दरीभिः स्त्रीभिः, परिवृतकण्ठमिति विरोधः; अतिरङ्गं महीयांसं, सुन्दरी रत्नभेदः, कण्ठं समीपदेशः इति परिहारः, ("कण्ठो गले गजध्वानै समीपेऽपि प्रकीर्तितः" इति विश्वः)। सुरासम्बन्धादयो मद्यं वा, तदुत्पत्तिस्थानमपि ताभ्यामनधिष्ठितमिति विरोधः; यद्वा—सुरस्य ब्रह्मणः, उत्पत्तिर्यस्मात् सुरोत्पत्तिर्विष्णुः, तस्य स्थानमपि, असुरैरधिष्ठितमिति परिहारः।

अचिन्तयदित्यादि।—यत् यतः, यस्मिन्विषे राघवेणारण्यवियुक्ता कान्ता विना, सोऽयं लोचनगोचरतां नीतः। तदत्र देहमुत्सृज्य शरीरत्यागं कृत्वा, तत्कृतसमाचरणासहत्वादिति भावः, प्रियाविरहाग्निं निर्वापयामि तेनाथ कान्ताविरहाग्नेर्यो निर्वापितः, अहं तु शरीरमुज्झितवानिति भावः। "एति जीवन्तमानन्दो नरं वर्षशतादपि" इति प्राचीनगाथया आत्मघातनिषेधाच्च, यद्यपीत्यादि।—आतुरस्य तु मरणं "दुश्चिकित्सोमहारोगैः पीडितस्तु महानपि। प्रविशेज्ज्वलनं दीप्तं कुर्यादनशनादिकम्॥" इत्यादि सुश्रुतमेव। "अवश्यम्भाविनो भावा भवन्ति महतामपि। नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः॥" "अपथे पदमर्पयन्ति हि श्रुतवन्तोऽपि रजोनिमीलिताः" इत्यादिना भवितव्यतावश्यत्वं मन्वान आह, तथाऽपीति।—उभयमपि करोतीति भावः। अस्मिन्निति।—किमकार्यं न कृतमित्यर्थः। द्विजराजचन्द्रः, गुरुदारग्रहणं बृहस्पतिभार्यायास्तारायाः ग्रहणं, तया सह सुरतं, तत्र बुध उत्पन्न इत्यादिपर्वणि कथा; पक्षे—द्विजराजो ब्राह्मणश्रेष्ठः, श्रुतिस्मृत्याद्यध्ययनसम्पन्नः, गुरुदारग्रहणं गुर्वङ्गनासम्भोगम्। पुरूरवा राजा, वयःशैशे ब्रह्मबलमदात्, तत एव नष्ट इत्यपि भारते। नहुषो राजा, परकलत्रदोर्दण्डेन्द्राणां साभिलाषी, महाभुजङ्गः सर्पः, आसीत्, ("आसुषो दोर्दण्डो मतः" इति रत्नकोषः) इत्यर्थः

पपात। सुद्युम्नः स्त्रीमय इवाभवत्। सोमकस्य प्रख्याता जन्तुबधनिर्घृणता। पुरुकुत्सः कुत्सित आसीत्। कुवलयाश्वोऽश्वतरकन्यामपि जहार। नृगः ब्रह्मस्वासतामगमत्। नलं कलिरभिभूतवान्। संवरणो मित्रदुहितरि विलक्षतामगात्।

दोषदूषिते मधोनि नहुष इन्द्रपदे स्थितस्तत इन्द्राण्यां साभिलाषोऽभूत्; "यद्यपूर्वाङ्गनाकेढ़ो मां समयेऽवधास्यसि तदा खोक्रियते मया" इत्यभिहितो महर्षीन् याने नियुज्य "सर्प सर्प" इति त्वरमाणोऽगस्त्येन "सर्पी भव" इति शप्तः इति हरिवंशे; ब्रह्महत्या ज्ञानान्धतया महर्षिपीडनं चोन्नमनेन। ययातिः राजा, शतब्राह्मणोपाधियुक्तः शतदेवयानीपाधियुक्तश्च:, पपात, तारुण्यादिच्युतः; ययातिर्भृगुसुतायां देवयान्यां परिचारिकायां शर्मिष्ठायामप्यासक्तो देवयान्या भार्गवाय निवेदितेन शप्तः "प्रवया भव" इति; अतिक्रामुकत्वेन वयोऽतिक्रमप्राप्तिर्ध्वनिता। सोमकस्यैतदभिधानस्य, जन्तोस्सन्तानः; पुरुस्य, बधेन निर्घृणता; यथे—जन्तवः शरीरिणः; सोमकस्य शतस्त्रीष्वेकस्यां जन्तुसंज्ञः पुत्र उत्पन्नः, स कदाचित पिपीलिकया दष्टोऽरुदत्, ततः सर्वाजन्मातरोऽरुदन्, ततोऽस्य पुरे महानाक्रन्द आसीत्, तत् श्रुत्वा राज्ञा पुरोहितः पृष्टः "सन्तु मे बहवः पुत्राः कथम्?" इति तेन जन्तुर्दष्टो पुत्रस्य तदुत्पाताच्च सर्वाः सगर्भाः संक्रन्दात्तः अतः पुत्रास्त्वया अवश्यमिति भाव्यते, ("जन्तुर्जन्तुशरीरिणः" इत्यमरः) एतेन वयो महापातकिनो वर्णिताः। कुवलयाश्वो राजा अश्वतरकन्यामश्वतराख्यानर्षिकन्यामपि, जहार, कुवलयाश्वो भार्यायां मदालसायां प्रणीतायामश्वतविद्वेषः तन्निर्बाधमश्वतरपुत्र्यां तदुत्पन्नः पिङ्गे आख्यातः, पुत्रमित्रत्वान्मयानिर्मितां मदालसां तत्रायपयत् सः। न भक्षयात् अतः कोऽपि विघ्नः केनापि भूतले। या ब्रह्मसृष्टेरित्येतद्विधृत्य अरक्षोहितः॥ मनुजो नामकन्यामप्यजहार मदालसाम्। ज्ञानान्धतां ध्वनयितुमिदमाह कृपात्मनः॥ अज्ञानादपि यस्मात् पतति क्षयति ध्रुवम्। इति प्रदर्शयन्नाह नृपस्य ब्रह्मवासताम्॥ नृगो राजा, ब्रह्मवासतां सरटत्वम्, अगमत्, ("सरटः ब्रह्मवासः स्यात्" इत्यमरः) "नृगेण पुष्करे तीर्थे गा द्विजेभ्यः श्रुताः पुरा। तस्याज्ञानाद्विलक्षैका क्षपिता मिश्रितास्त्वभवत्॥ अपराधादतस्तेन शप्तः सरटतामयात्॥" नलं राजानं, कलिस्तुर्ययुगः, अभिभूतवान्; कालेन कलिना सोऽपि पुण्यश्लोकोऽतिपीडितः। इति संक्षोदयसूचे नलाख्यानं पुरातनम्॥ संवरणो मित्रदुहितरं प्रति सूर्यसुतां प्रति; यथे—मित्रस्य सुहृदः, दुहितरं, अगात्।

दशरथ इष्टरामोन्मादेन मृत्युमवाप। कार्त्तवीर्य्यो गोब्राह्मण-पीड़या पञ्चत्वमयासीत्। युधिष्ठिरः समरशिरसि सत्यमुससर्ज। शान्तनुरतिव्यसनाद्विपिने विललाप; इत्थं नास्त्यकलङ्कः कोऽपि, तदहमपि देहं त्यजामि"।

इति विचिन्त्य कुररखरनखरशिखरखण्डितपृथुरोमविलम्, अविरलशकुलकुलशल्कजलनकुलोच्चारं, क्रोष्टुकुलोत्सृष्टविकट-कर्कटकर्परपरम्परापरिगतोपान्तम्, अतितरलतरङ्गरयलुलित-चटुलशफरकुलकवलनकृतमतिनिभृतबकशकुनि-निवहधवलित-परिसरम्, अतिचपलजलकपिकुलविहरणलुलितसलिलकण-निकरजनित-पवनरयपरिमिलितशिशिरतरम्, अनुदिवस-निपतदतितरुणवनमङ्क्षगवलशिखरलिखितविषमतटम्, अन-

दशरथ इति।—मृगयायां कृतस्य तपस्विनः पितुः "यथा पुत्रवियोगादायुर्मृतिरेवं पुत्रमोक्षान्मृतिर्भवेत्" इति शापाद्रामविरहेण मृतिः; मृगयाव्यसनेन तपस्वि-वधादपि ध्वनितः। कार्त्तवीर्य्यसहस्रबाहुः, गोब्रह्मदग्निगः, ब्राह्मणस्य जमदग्नेः, पीड़या वधः, अनेनैवापराधेन रामेण निहतोऽर्जुनः। युधिष्ठिर इति। शान्तनुरिति। मोक्षान्मृतिर्भवेन्मोक्षो वने च परिदेवनम्। कन्दर्पकेतुः कन्दर्पतामुपलम्भकमुक्तवान्। तदहमपि देहं त्यजामि।

इति विचिन्त्य पुलिनमासन्नादित्यवयः। कुररा उत्क्रोशाः, तेषां खरनखर-शिखरैः खण्डितपृथुरोमबिलं भूमिबिलम्। ("उत्क्रोशकुररौ समौ"। "पृथुरोमा ऋषौ मत्स्यः" इत्यमरः)। अविरलानि प्रकुलकुलस्य मत्स्यविशेषकुलस्य, शल्काानि यस्य तादृशाः, जलनकुलानामुच्चारा यस्य तत् ("शल्के शकलवल्कले" इति "उच्चारावस्करौ समौ प्रकृत्" इति चामरः)। क्रोष्टुकुलोत्सृष्टाः शृगालकुलत्यक्ताः, विकटा कर्कटानां कर्परपरम्पराः कपालपरम्पराः, ताभिः परिगतोपान्तं व्याप्तोपान्तम्। ("स्यात् कर्परः कपालोऽस्त्री" इत्यमरः)। अतितरलतरङ्गरयेण वेगेन, लुलितं चटुलं यत् शफरकुलं तत्कवलने कृतमतिरत एव निभृतो मन्दः, चेष्टाशून्यः, बकशकुनिनिवहेन धवलितपरिसरम्। अतिचपलेति।—("शिशुमारो जलकपि-श्चन्द्री चाभिपुच्छकः" इति शब्दरत्नावली)। अनुदिवसं निपतन्नतितरुणो यो वन-महिषाणां गवलः शृङ्गं तेन लिखितानि विदारितानि, विषमतटं

चरत-चरदसितसुखचरण-विहग-निवह-मधुर-निनद-मुखरितम्, अहिमकरचरण-रुचिर-जलमनुज-मयन-मुदित-जलधरचितलम्, अतिवहल-मदजलसबल-करटतट-करिवरगत-निपतितमधुकर-विकृतिरतिकरम्, अतिजवन-पवनविधुतजलधिजल-पटल-विघटननिपतितमणिगणपरिगतपरिसरं, जलनिधिभुजगनिर्मुक्त-निर्मोकपट्टमिव, दर्पणमिव वसुन्धरायाः, स्फटिककुट्टिममिव वरुणस्य, विपुलं पुलिनजलमासासाद। ततः कृतस्नानादि-र्जलमवतरितुमारेभे शरीरत्यागाय।

अथ सानुशयेषु ग्राहेषु, निर्मत्सरेषु मत्स्येषु, अक्षुद्रेषु क्षुद्रेषु, वञ्चलेषु कच्छपेषु, अक्रूरेषु नक्रेषु, अभयङ्करेषु मकरेषु, अमारेषु शिशुमारेष्वाकाशसरस्वती समुदचरत्—"आर्ये कन्दर्प-केतो! पुनरपि तव प्रियया सह सङ्गमो भविष्यत्यचिरेण, तत् विरम मरणव्यवसायात्" इति। तदुपश्रुत्य मरणादिरराम। पुनः प्रियया समागमेच्छया शरीरस्थितिहेतुमाहारं चिकीर्षु-

("गवलं माहिषं शृङ्गम्" इत्यमरः) अत्र गवलप्रयोगो यवलाख्यं तदन्यशृङ्गम्। अनवरतं चरन्तोऽसितसुखचरणा भार्तराष्ट्राः, तेषां निवहस्तस्य मधुरनिनादैर्मुखरितम्। ("राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः। मलिनैर्मेक्षिकाख्यास्ते भार्त-राष्ट्राः सितेतरैः॥" इत्यमरः)। अहिमकरः सूर्यः, तस्य चरणैरिव किरणैरिव, रुचिरं भासुरं, जलमनुजानां जलमनुष्याणां, मयनेन मुदितं जलगतं जलालग्नं, धरचितलं यत्र; यद्वा—अहिः सर्पः, मकरो जलजन्तुभेदः, तयोश्चरणेन भ्रमणेन, रुचिरं पीताधानादिरहितं, जलमनुजमयनेन मुदितं जलधरचितलं यत्र। अतिबहलमदजलसबलः करटो गण्डो येषां तादृशकरिवरगतेषु निपतितमधुकराणां विकृतिभिः शब्दैः, रतिकरम्। ("आकैभगण्डौ करटौ" इत्यमरः) करट इत्यपि पाठोऽर्थस्त्वभिन्नः। अतिजवनोऽतिवेगवान्, पवनेन विधुतजलधिजलपटलाद्विघटितो सन्विगतो यत्र तादृशः, परिसरो यस्य तम्। ("जवनस्तु जवाधिके" इत्यमरः)। जलनिधीत्यादि। तत इत्यादि।

आकाशसरस्वती आकाशवाक्, समुदचरदुत्थिता, [अत्रार्थबलात् "उदचरः" इत्यनेनैव न]। तत्स्वरूपमाह, आर्येत्यादि।

मैनाकसागरकक्षोपान्तभुवं जगाम। अथ तत्र दूतः परिभ्रमन् फलमूलादिना वने वर्त्तमानः कियन्तं कालं निनाय कन्दर्पकेतुः।

एकदा कतिपयमासापगमे काकलीगायन इव सस्वनिस्वगानदः, सन्ध्यासमय इव नक्तिंचरनीलकण्ठः, कुमारमयूर इव समूढगरुत्मा, मदातपक्षीव प्रशमितरजःप्रसरः, तापस इव धृतजलदकरकः, प्रलयकाल इव दर्शितानेकतरणिविभ्रमः, निरुपद्रुतकाननोद्देश इव घनोत्सुकितसारङ्गः, रेवतीकरपल्लव इव श्लिष्टधृतिकरः आजगाम वर्षासमयः। निर्भिन्नमेघनीलोत्पलकानने क्रीडामरसौव, नभसि स्मरस्य रत्नवीथीव, जलदलक्ष्मीमातङ्गकन्यानर्त्तनरङ्गरिव, नभःसौधतोरणमालिकेव,

---

एकदा वर्षासमय आगतमिति सम्बन्धः। काकलीगायनः कलसूक्ष्मगानसदृशं। सस्वनं निम्नं नीचं, गभीरं वा, गानं ददाति तादृशः; पक्षे—सस्वनाः परिपूर्णध्वनाः, निम्नगा नद्यः, नदाश्च यत्र। ("काकली तु कले सूक्ष्मे"। "निम्नं गभीरं गम्भीरम्" इति वैजयन्तीकरः)। नीलकण्ठः शिवः; पक्षे—मयूरः। कुमारमयूर इव सम्यगूढः शरजन्मा षडाननो येन; पक्षे—समूढानां पुञ्जीभूतानां, शराणां जन्म यत्र। ("समूढः पुञ्जिते भुग्ने सम्योळाते धृतेऽपि च" इति विश्वः)। रजो धूलिः; पक्षे—हितोयो गुणः। तापस इव तपस्वीव, धृतो जलदो जलप्रदः, करकः कमण्डलुर्येन; पक्षे—धृता जलदाः करका वर्षोपला येन। ("करका मेघवाचि स्त्रियां करका च कमण्डलौ। दाडिमेऽपि च करकं करी च करकः स्मृतः॥" इति विश्वः) वर्षासु करकावर्षणं कविसम्प्रदायः। प्रलयकाल इव दर्शितोऽनेकतरणीनां सूर्याणां, विभ्रमो येन; पक्षे—तरणिर्नौः। ("स्त्रियां नौस्तरणिस्तरिः" इत्यमरः) विभ्रमो भ्रमणम्। निरुपद्रुतकाननोद्देश इव घननत्वात्, घना नीलोत्सुकिताः सारङ्गा हरिणा यत्र; पक्षे—घनेन मेघेन, उत्सुकिताः सारङ्गाश्चातका यत्र। ("चातके हरिणे पुंसि सारङ्गः प्रवरे त्रिषु" इत्यमरः)। रेवतीकरपल्लव इव श्लिष्टो बलरामस्य, धृतिकरो धैर्याधायकः; पक्षे—श्लिष्टा वर्षाणां, धृतिकरः प्रीतिकरः। इन्द्रधनुर्लता रराजेति सम्बन्धः। निर्भिन्ने विकसिते, मेघे एव नीलोत्पलकानने क्रीडासरसीव। नभसि कुसुमसरस्य रत्नवीथीव रत्नवल्लिसौधीव। जलदलक्ष्मीमा

प्रवसता निदाघेन दिवः पयोधरे दत्ता स्मरणाय नखक्षता-वलीव, गगनलक्ष्मीरत्नरशनामालेव, नभोमन्दारतरुसुन्दर-कलिकामालेव, रतिनखमार्जनरत्नशलाकेव, रत्नशुक्तिरिव कुसुमकेतोरिन्द्रधनुर्लता रराज। अतिवेगनिपीतजलधिजल-शङ्खमालामिव बलाकाच्छलादुद्गच्छदृश्यत जलदः। पीतहरितः क्षणासु केदारिकाकोष्ठिकासु समुत्पतद्भिर्जतुशबलैरिव ददु-र्नेयद्युतिरिव चिक्रीड वर्षाकालः। रविदीपकज्वलनिचयनिभे निकषोपले इव, मेघसमयसुवर्णकारनिकषितसुवर्णलेखेव तडिद-शोभत। विरहिणां हृदयं विदारयितुं करपत्रमिव कुसुमा-

---

मातङ्ग्य चण्डालमेदस्य, तस्या सेव नर्तको तस्या रज्जुः समाकर्षणरज्जुः, चण्डालकन्या रज्जुनवलम्ब्य नृत्यति। ("चण्डालप्लवमातङ्ग दिवाकीर्त्तिजनङ्गमाः" इत्यमरः)। नख इति। प्रवसता निदाघेनोष्णोपगमेन, स्मरणाय दिवो द्यौः, पयोधरे स्तने मेघे च, दत्तानि नखक्षतानीव। "चिरोत्पन्नप्रवासेन प्रीतिर्गच्छेत् पराभवम्। रागाग्रतन-संस्थानि यदि न स्युर्नखक्षतम॥" इति वात्सायनम्। ("निदाघ उष्णोपगमः"। "द्यौर्दिवौ द्वे स्त्रियामस्त्रम्" इति द्वयोरमरः)। गगनलक्ष्म्या रत्नरशनेव काञ्चीव। ("स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा" इत्यमरः)। नभोमन्दारस्य देवतरु-विशेषस्य, सुन्दरकलिकामालेव। रतिरित्यादि। अतिवेग इति शङ्खपाने हेतुः; बलाकाच्छलादिवकण्ठिकामिषात्, उद्गच्छदृश्यत। ("बलाका विस-कण्ठिका" इत्यमरः) बकजातिविशेषः। केतवापकृतिरलङ्कारः,—"केतवापकृतिर्व्यक्तौ व्याजाद्यैर्निकृते पदैः" इति लक्षणात्। क्षणासु क्षपासु, सदूर्वासित्यर्थः, जाति-त्वमस्त्रावादिग्रहणसार्थक्यम्; क्वचित् क्षणास्विति पाठः, तत्र क्षणसंकृतास्त्रित्यर्थः, केदारिका एव कोष्ठिकास्तासु, ["केदारकोष्ठाभ्यामलच्यत्वे" ञलि रूपम्] "क्यारो" इति भाषायां, यज्ञादिनिमित्तं क्रीडासाधनं स्वल्पविशेषः, "कोढा" इति च, पीतहरितवर्णैः, जतुशबलैर्लाक्षारङ्गैः, नयी युक्तनीतिः, तच्छास्त्रकर्तृभिरतुरङ्गैः, चतुरङ्गसाधनेषु सत्यत्र नयशतसाधनभूतैर्हस्त्यश्वादिभिरिव समुत्पतद्भिः, दर्दुरैर्भेकैः, वर्षाकालश्चिक्रीड। [जातुशैरिति पाठे "विभारे सपुजतनोः पुक्" इत्यत्र पुगागमश्च]। रविरिति।—निकषोपलमाह्यः, ("आकरो निकषोपलम्") "कसौटी" इति भाषायाम्। विरहिणामिति।—करपत्रं क्रकचं, ("क्रकचोऽक्रो

युवत्य क्रकचच्छदमशोभत। जलददारुणि लोलतडिल्लताकर-पत्रदारिते पवनवेगनिर्धूतास्तूर्णचया इव जलरेणवो बभुः। विच्छिन्नटिग्वधूहारमुक्ता इव, खरपवनवेगभ्रामितघनमेघघरट्टघट्टनसञ्चूर्णिततारानिकरा इव, त्रिभुवनविजिगीषोर्मकरध्वजस्य प्रस्थानलाजाञ्जलय इव करका व्यराजन्त।

अनन्तरमखञ्जखञ्जरीटे, अकुञ्चितक्रौञ्चसञ्चारे, निर्भरभारद्वाजद्विजवाचाटविटपे, पटुप्रभप्रभाते, भ्रान्तशुककुलकलमकेदारे, प्रवेशिकावेशिकराजहंसे, कंसारातिदेहद्युतिद्युतले, हंसतूलतुलितजरज्जलमुचि, सान्द्रीकृतेन्द्रमदकामुकमुदि, मधुरमधुतृणवीरुधि, सुरससारसरसितसारकासारे, शोभनकसेरु-

---

खरपवनम्" इत्यमरः) "आरा" इति भाषायां, क्रकचपत्रं केतकपुष्पम। ("द्वीपिदलं तूषिपुष्पं जम्बालं क्रकचच्छदम्" इति द्वारावली)। लोलतडिल्लताकरपत्रदारिते जलददारुणि मेघकाष्ठे, पवनवेगनिर्धूताः कम्पिताः, चूर्णचया इव जलरेणवः क्षौद्राः, बभुः शुशुभिरे। विच्छिन्नेति।—घनो मेघ एव, घरट्टः "जाँता" इति भाषायां, पुरुषप्रेरणानिरपेक्षो जलादिद्रव्यभ्रमणसाधनः। करका वर्षोपलाः।

अनन्तरं अस्तमनारम्भे कन्दर्पकेतुः स्त्रियामयौ पुंस्कां पाञ्चालिकां, मन स्त्रियामुद्धारिकीयतिति तां करेण पस्पर्शेति सम्बन्धः। अखं वर्णयन्नाह।—अखञ्जाः सदृशयः, [खञ्जि गतिवैकल्ये]। अकुञ्चिते विस्तृते। निर्भरं भारद्वाजद्विजैर्वाचाटविटपे, भारद्वाजवाचाटं विटपेष्वारोप्यते, तेन खञ्जानामाकृष्टारोप्य "साधादनभिसम्बन्धात् सम्बन्धिषु परिषदः। यत्र सा खञ्जरी नाम" इति काव्यालङ्कारे। पटुप्रभं सुन्दरं, प्रभातं यत्र। भ्रान्तं भ्रमणविशिष्टं, शुकुलं ताद्दग् शब्दमानां शालीनां, केदारं क्षेत्रं यत्र। प्रवेशिका वावेशिका आगन्तवः, राजहंसा यत्र, ("सुरावेशिक आगन्तुः" इत्यमरः)। कंसारातिदेहद्युति श्यामशरीरतुल्यकान्ती, द्युतले। हंसवत् तूलं हंसतूलं, तत्तुलिते जरज्जलमुचि पुराणमेघे, जलसंयोगजातं नवत्वं जलायोगजातं जरत्त्वं बोध्यम्। सान्द्रीकृता घनीकृता, इन्द्रमदकामुकानां शुना, मुत् प्रीतिर्येन तत्। ("मुगदंशस्य शुनको वागयुक्करभेदकौ। चाक्षमत्तस्य कपिलः स्यादिन्द्रमदकामुकः।" इत्यु-

कान्दलुब्धपोत्रिपोत्रीतस्खातनटडागे, चकितचातके, मत्तरमात्स्य-
पुत्रिकापात्रिपटलमधुरध्वनिविहितमुदि, कादम्बितकादम्बे, कञ्जु-
द्विषि, प्रहृतबिसप्रसूने, विरलवारिदे, तारतरतारके, चारु-
चन्द्रमसि, स्वादुतरसरःसलिले, स्फुरितशफरचक्रकवलन-
निभृतबकानीके, सूक्ष्ममण्डूकमण्डले, मङ्काचितकञ्जुकिनि, काश्चन-
च्छेदगौरश्रालिग्रालिनि, क्रोशदुत्क्रोशे, सुरभिगन्धिमौगन्धिका-
गन्धहारिहरिणाक्षे, कुमुदामोदिनि, कौमुदीक्षतमुदि, निर्बर्हं-
बर्हिणि, निःकूजत्कीचष्टिके, धृतधार्त्तराष्ट्रे, हृष्टकलमगोपिका-
गीतसुस्थितमृगयूथे, कथीक्षतयूथिके, स्नायमानमालतीमुकुले,
बन्धुकबान्धवे, सञ्जातसुजातके, विसूत्रितमौक्तामधनुषि क्षीर-
काश्मीररजःपुञ्जपिञ्जरितदशदिशि, विकस्वरकमले शरत्समया-

कलिनी)। मधुरा मधुतृणीकृत यव। ("खड्गपत्री मधुतृणनिशुंधुतर्णतः" इत्यमरः)। सुरसं सारसानां रसितं सारस्वत्वं यव नाडक्, कासारः सरी यव तव। ("कासारः सरसी सरः" इत्यमरः)। शोभनकसेरुकन्दकुशानां पोत्रिणां वराहाणां, पोत्रेणोत्खनिः, उत्खातस्तटाल्लडागो यव तस्मिन्। ("क्रोडः पोत्री किरिः किटिः" इत्यमरः)। चकितालूनाः संयमिता वा, चातका यव। [चक्र इत्यो प्रतीघाते च]। सत्स्यरिति।—मत्स्यपुत्रिका जलपिप्पीलः। कादम्बो नीपवृक्षः, कादम्ब इति पाठः क्वचित्, कदम्बः। ("कादम्बः कलहंसः स्यात्" इत्यमरः) "बतक" इति ख्यातम्। प्रहृतानि विसप्रसूनानि यस्मिन् तत्। ("विसप्रसूनराजीव-पुष्करान्यादहाणि च" इत्यमरः) बकानीकं बकसमूहः। मृगो निर्बर्हः। कञ्चुकी सर्पः। सौमस्यिकं कङ्कारम्। ("सौमस्यिकं तु कङ्कारम्" इत्यमरः)। हरिणाक्षो वायुः। ("पृषदश्वो गन्धवहः" इत्यमरः)। कुमुदे "मदिः निर्बर्हाः शक्तिपिच्छाः, बर्हिणो यव तत्र। कलमगोपिका शालिसंरक्षिका। यूथिका चाकीदिति ख्यातायामेवोक्ता। बन्धुको बन्धुजीवकः, ("रक्तबन्धूको बन्धुजीवकः" इत्यमरः) "दुपहरिया" इति ख्यातम्। विसूत्रिते सौमस्-त्रमिति पाठस्तद्वत्। काश्मीरं कुङ्कुमम्। विकस्वरं विकसितम्। ("विकासी तु विकस्वरः" इत्यमरः)।

पथे कन्दर्पकेतुः परिभ्रमन् शिलामयीं पुत्रिकां दृष्ट्वा कौतुकेन मोहेन शोकावेगेन मम प्रियानुकारिणीति करेण पस्पर्श।

अथ सा सृष्टमात्रा शिलास्वभावमुत्सृज्य पुनर्वासवदत्तास्वरूपमापेदे। तामालोक्य कन्दर्पकेतुरमृतार्णवमग्न इव सुचिरमालिङ्ग्य पप्रच्छ—"प्रिये वासवदत्ते! कथय किमिदं वृत्तान्तम?"। उदिता सती सा दीर्घमुष्णं च निःश्वस्य कथयितुमारेभे।

"आर्यपुत्र! अपुण्यायाः मम मन्दभाग्यायाः कृते महाभाग! उज्झितराज्य एकाकी प्राकृतजन इव वाङ्मनसयोरगोचरं दुःखमनुबभूव। अथोपवासादिना क्षामतरो मूलफलादिनाऽऽर्यपुत्र आहारं करोतीति विचिन्त्य फलान्वेषणायोपवनतरूनवलोकयन्ती कतिपयपदमगोचरमगच्छं, क्षणेन च तरुगुल्मान्तरितक्रियमाणकायमानकनिकेतनं, विरच्यमानेश्वरगृहम्, अवतार्यमाणकण्ठारकम्, आरभ्यमाणपटकुटीकं, व्यवस्थाप्यमानवेश्मनिवेशं, श्रूयमाणतुरङ्गक्षेपायतं, वाद्य-

---

अथेत्यादि।

एकाकी चमत्कारः। ["एकादाकिनञासहाये"] ("एकाकी त्वेक एकवः" इत्यमरः)। प्राकृतजन इव नीचजन इव। ("प्राकृतस्तु पृथग्जनः" इत्यमरः)। वाङ्मनसयोरिति ["अचतुर—" इत्यच्प्रत्ययान्तो निपातः। अथेत्यादि।—चमत्कृतं मात्रा। क्षणेन सेनासन्निवेशं सेनाशिविरं, दृष्टेति चिन्तयन्तीं मां प्रति सेनापतिभणितमिति सम्बन्धः। तरुगुल्मान्तरितं क्रियमाणं रच्यमानं, कायमानिकैः "कामार" इति प्रसिद्धैर्नीचजातिपुरुषैः, निकेतनं पटमण्डपं यत्र तम्। ("निवेशः शिबिरोद्वाहविन्यासेषु प्रकाशितः" इति विश्वप्रकाशः)। विरच्यमानं विशेषेण रच्यमानम्, ईश्वरस्य सेनापतेः, गृहं यत्र तम्। अवतार्यमाणमश्वादेर्भूमावुत्तार्यमाणं, कण्ठारकं "कण्ठालो" इति दाक्षिणात्यभाषायां प्रसिद्धं वस्त्रपावादिव्यापनार्थं वस्त्रादिनिर्मितं पात्रम्। व्यवस्थाप्यमानः यथास्थाने स्थाप्यमानः, वेश्मनां निवेशो यत्र तम्। श्रूयमाणं क्षेपायतं यत्र तम्। ("क्षेपा क्षेपा च निःस्वनः" इत्यमरभरतौ)। वाद्य-

मानविश्रमढक्काग्रतपुष्करम्, अन्विष्यमाणस्वादुसलिलाशयम्, उद्दिश्यमानविपणिकेतुवंशं सेनासन्निवेशमपश्यम्। किमयं ममान्वेषणाय तातस्य व्यूहः समायातः? आहोस्विदार्य्यपुत्रस्य? इति विचारयन्तं मां प्रति चारकथितवार्त्तः सेनापतिर्धावितः। ततः किरातसेनापतिस्ताडश एव सेनान्वितो मृगयागतः सोऽपि धावितः। अनन्तरं चिन्तितं मया, यद्यहमार्य्यपुत्राय कथयामि तदा स एकाक्येभिरेव हन्तव्यः, अथ न कथयामि तदैभिरहं घातनीयेति चिन्तावसरे एव द्वयोः सेनयोर्युद्धमभवदेकामिषलब्धयोर्गृध्रयोरिव।

ततः प्रवृत्तप्रतिश्यायसघनसारदुर्दिनच्छन्नदिनकरकिरणे,

सनादिः पूर्वमुदिता। वाद्यमानं विश्रमनामकं ढक्काग्रतं पुष्करं वाद्यविशेषो यत्र सम्, [ढक्काविशिष्टो विश्रमशब्दस्त्वण्ड एवेति स्पष्टं भाष्यप्रदीपे] ("स्यादग्रयः-पटहो ढक्का" इत्यमरः। "पुष्करं पङ्जे व्याधि पयःकरिकरायधोः। औषधद्वीपविहग तीर्थराजोरगान्तरे॥ पुष्करं तूर्य्यवक्त्रे च खाण्डे खड्गफलेऽपि च॥" इति विश्वप्रकाशः)। उद्दिश्यमान उत्पाद्यमानः, विपणयो पण्डवीथिकायां, केतुर्यत्र; [दिश अतिसर्जने] यद्वा—उद्दिश्यमानः केतोरस्मिन् भागेऽवीक्ष्य आवास इति ज्ञानार्थमुद्देशविषयीक्रियमाणः, केतुर्यत्र। आहोस्वित् संशयेऽव्ययमुदायः। चारेण गूढपुरुषेण, कथिता वार्त्ता इत्यादौ यत्रे तादृशचारकथितवृत्तान्तः, ("चारश्च गूढपुरुषः" इत्यमरः)। किरातसेनापतिः। ("भेदाः किरातशबर पुलिन्दा म्लेच्छजातयः" इत्यमरः)। मृगयाया आखेटार्थम्, आगतः। ("आखेटो मृगया स्त्रियाम्" इत्यमरः)। अनन्तरं द्वयोरेकदैवागमनोत्तरम्। एकामिषलब्धयोः। ("आमिषं पलले लोभे सम्भोगोत्कर्षयोरपि। आमिषं सुन्दराकार-भूषादिविषयेऽपि च॥" इति विश्वप्रकाशः)।

तत एवं रचयति सति रचभूमौ, वाद्यमटनस्थाने इति यावत्। योधाः समभैकाग्र्यच्छेदेन, दिशां धनुषां च जीवद्भ जीवायाः प्रत्यञ्चायाश्च, आकृष्टिमाकर्षणं, चक्रुरिति सम्बन्धः। चक्रुरतिशयोक्तिरलङ्कारः, पूर्वनिपातप्रकरणनित्यत्वे लक्ष्यलक्षणातिशयोक्तिः, "लक्ष्यलक्षणातिशयोक्तिषु पौर्वापर्य्यव्यतिक्रमः" इति ज्ञापकात्। प्रवृत्ता यः प्रतिश्यायसघनात् प्रगाढसलिलः, घनसारो माघमासस्तस्मात्, तेन दुर्दिनं मेघच्छन्नदिनं, तेन छन्नदिनकर-

रणकर्मविशारद-द्विरददन्तद्वयोत्क्षिप्त-सुभटक्षणश्लिष्यमाणविद्याधरविभ्रमे, समरदर्शनसञ्चरदनेकगगनसञ्चरचारणचक्रवाले, वेताल-समाक्रान्तस्कन्ध-कबन्धचक्रक्रियमाण-चारुप्रचारे, चारुभट-खड्गखण्डित-द्विरदपाद-समाप्त-पिशाचौकर्णीलूखलाभरणकौतुके, समुत्पतदतिनिनदनान्दीके, क्रान्दिशीकभीरुणि, रणखले शृगालप्रार्थनीयेष्वामिषांपखण्डेष्विव जिह्मगदष्टेष्विव शरीरेष्व-नास्थां कलयन्तः समं द्विषां धनुषां च जीवाकृष्टिं योधाश्चक्रुः। त्यागिन इव दानवन्तः, मार्गणसम्पातममृष्यन्तः, समृद्धविलासिन इव शृङ्गारशोभिताः सद्वेमकक्षाश्च, सदारामा इव कदली-राजिताः सद्विजाश्च, निशा इव नक्षत्रमालोपशोभिताः, दिवसा इवोल्लसत्प्रकरा महासृगा बभुः। उत्क्षिप्ता इव क्षमां मुञ्चन्तः, पयोधय इवावर्त्तशोभिताः सोर्मयश्च, उद्यानदेशा इव समल्लिकाकाः, कुलगृहा इवाभिनवभाण्डहारिणः, रत्नाकरा

द्विरणे सति, गौणे आसारदुर्दिने ; ("धारासम्पात आसारः।" "मेघच्छन्नोऽर्क दुर्दिनम्" इति हलायुधामरः)। रणकर्मणि विशारदश्चतुरः, द्विरदो हस्ती, तेन दलद्वयोत्क्षिप्तः सुभटः शूरः, तेन क्षणं श्लिष्यमाणः आश्लीयमाणः, विद्याधरविभ्रमो देवयोनिविशेषविशिष्टभवो येन तस्मिन् सति। समरदर्शनार्थं सञ्चरदनेकगगन-सञ्चरचारणानां देवकुशीलवानां, चक्रवाले मण्डले सति। ("चारणाश्च कुशीलवाः"। ("चक्रवालं तु मण्डलम्" इति हलायुधामरः)। चारुभटखण्डितद्विरदपादेन समाप्तं सम्यक् प्राप्तं, पिशाच्याः कर्णे यल्लूखलाभरणं तत्कौतुकं यत्र। समुत्पतन्निति निनद एव नान्दी नाटकादौ प्रयुज्यमानः काव्यार्थसूचकः श्लोको यत्र। ["नप्तृनृत्व" इति कप्। "न क्षपि" इति ङत्वनिषेधः]। तथा च भरतः,—"आशीर्नमस्क्रिया-रूप-श्लोकः काव्यार्थसूचकः। नान्दीति कथ्यते"। क्रान्दिशीको भयपलायितः। ("क्रान्दिशीको भयद्रुतः" इत्यमरः)। भीरुः। ("भगाले जम्बुके भीरुः शूरे त्रे दानवान्तरे" इति विश्वः)। जिह्मगः सर्पः। ("जीवा ज्यायां धनुर्भूम्यो-र्मौर्वीभिन्नितकक्षिषु" इति विश्वप्रकाशः)। त्यागिन इव दातार इव, दानं मदजल-वितरणं, मार्गणानां बाणानां याचकानां च, सम्पातमसहन्तो महाशना गजाः, रेजुः। ("महाशनः पुष्करिदीर्घनाकतौ" इति शब्दरत्नावली)। उत्क्षिप्ता इवाभ्यवस्थितचित्ता

इव सदेवमनुजयः, लोका इव सेन्द्रधृतयः सुरङ्गाश्च विरेजुः। कर्णाभ्यां श्रुतपरपरिवादाभ्यां, खलोदयसाधुविपत्तिसाक्षिभ्यामक्षिभ्यां, मूर्ध्ना चाख्यानेऽपि नमता विमुक्तोऽहमिति हर्षादिव ननर्त्त चिरं कबन्धः। ततः कृतपरिहासेनेव चक्षुः पिदधता, परापवादश्रवणभीरुणेव श्रोत्रवृत्तिं स्थगयता, सोन्मादेनेव वायुवेगविक्षिप्तेन पलितकुरणेनेव सुरयोषिताम्, अन्धकुरणेनेव योधानां, तिमिरेणेव समरप्रदोषस्य, पतितेनेव विमुक्तगोत्रेण, मीमांसकदर्शनेनेव तिरस्कृतदिगम्बरदर्शनेन, सत्पुरुषेणेव विष्णुपदावलम्बिना रणजेन रजसा जजृम्भे। क्वचिद्राम इव रावणवधमकरोत्। क्वचित् कृष्ण इव नरकच्छदमकार्षीत्। क्वचिद्बौद्धसिद्धान्त इव क्षपितश्रुतिवचनश्रवणोऽभवत्। क्वचित् क्षपणक इव कटाक्षतो बभूव। क्वचिदाकृष्टितोरुभङ्गः सुयोधन इव पर्यसि विवेश। क्वचित् भरतखण्डगतो भौम इव चिराय श्वसन्नासीत्। क्वचित् कर्ण इव विकृतवीक्षित-

---

इव, क्षमां क्षान्तिं दृष्ट्वा च। तुरङ्गा अश्वाः, विरेजुः। ("खलस्त्वेऽस्त्री क्रियायुक्तमपसूर्ते-ऽक्षीवरम्" इत्यमरः) इदं कबन्धनर्त्त, श्रुतपरपरिवादाभ्यां परापवादाभ्यां साक्षी साक्षाद्द्रष्टा। ["साक्षाद्दृष्टरि संज्ञायाम्" इति साधुः]। अज्ञाने अज्ञानखण्डाने, नमता। ततो रजसा अजृम्भे प्रादुर्भूतम्। [जृभि गात्रविनामे, आत्मे धः]। कृतपरिहासेनेव चक्षुः पिदधता आच्छादयता, लोकप्रसिद्धमेतत्। वायुरास्तरो वाक्षस्य। योधानां भटानां, पलितकुरणेन। ("पलितं जरसा भौक्लाम्" इत्यमरः) ["वाक्षुभन" इति वरणे ल्युन्। "अवर्णेवर्ण—"इति मुम्]। समरप्रदोषस्य रणरजनीमुखस्य। पतितेन इव महाभारतकिनेव, विमुक्तगोत्रेण च भीष्मः, भीष्मा पृथ्वी। आकृष्टित ऊर्वोर्भङ्गो येन; पक्षे—खण्डनात्, भङ्गः वराजयः। भरतखं भरतस्थान्। चिराय चार्त्तिस्वरमुद्दश्य भीमारण्य नाम्नश्चक्रीपर्व-पलिखण्डमण्डनपाठकाः; अक्षोपपत्तिस्तु तेषां क्षतौ द्रष्टव्या; पक्षे—("चिराय चिरदात्राद चिरस्येति चिरायेक्षाः" इत्यमरः)। विकृतवीक्षितं विकृतो-

सर्वाङ्गः शक्तिमोक्षमकरोत्। ततो विध्वस्तध्वजपटं, पतत्पताकं, च्युतचापचामरापीडं, स्खलत्खड्गं निधनमवाप सैन्यम्।

अनन्तरं यच्छाश्रमस्थेन मुनिना पुष्पादिकमादायागतेन प्रतिपन्नब्रह्मचर्येण त्वत्कृते ममायमाश्रमो भग्नोऽतः शिलामयो भवेति शप्ताऽहम्। क्षणेन च वराकीं बहुदुःखमनुभवन्तीं मां विलोक्यार्य्यपुत्रकरस्पर्शावधिं शापान्तमकरोत्"।

ततः कन्दर्पकेतुः सममागतेन वासवदत्तया च सह स्वपुरं गत्वा यथाहृदयाभिलषितानि सुखान्यनुभवन् कालं निनाय।

इति मङ्काविसुवन्धुविरचिता वासवदत्ता समाप्ता।

मृतं, सर्वाङ्गं यस्य, शक्तेर्वर्जस्य, मोक्षं त्यागम्; पक्षे—शक्तेर्वासवदत्ताया अनीघायाः, मोक्षं घटोत्कचे त्यागम्। ("शक्तिरायुधभेदे स्यादृष्टाद्यादौ बले स्त्रियाम्" इति हेमचन्द्रः)। निधनं मरणम्। ("मरणं निधनोऽस्त्रियाम्" इत्यमरः)।

प्रतिपन्नब्रह्मचर्येण ज्ञातब्रह्मचर्येण। शप्ता [शपॅनिन्दा-]। क्षणेन च वराकीं बहु दुःखं भवदियोगजम्, अनुभवन्तीं मां विलोक्य शापं शिलामयत्वरूपम्, आर्य्यपुत्रस्य करस्यर्शोऽवधिरन्तोऽस्य तादृशमकरोत्। "नागरोक्त्याऽऽर्य्यपुत्रेति नाथोक्त्या च प्रयुज्यते" इति भरतः।

ततः कन्दर्पकेतुः सुतं वासवदत्तासङ्गसमकालम्, आगतत्वेन मकरन्देन, वासवदत्तया च सह स्वपुरं कुसुमपुरं, गत्वा हृदयं मनोऽनतिक्रम्य यथाहृदयं मनोऽनुरूपम्, अभिलषितं येषु तानि सुखानि सम्भोगप्रकारसम्बन्धीनि, अनुभवन् कालं निनाय। ("चेतो हृदयं स्वान्तं हृन्मानसं मनः" इत्यमरः)।

वासवदत्तामधिकृत्य कृता आख्यायिका वासवदत्ता। ["अधिकृत्य कृते ग्रन्थे" इत्यर्थे टड्ढाञ्चः। तस्य "तदाख्यायिकाभ्यो बहुलम्" इति लुप्] वासवदत्ताऽऽख्यायिका समाप्तेति पाठस्तु भ्रममूलकः।

वासवदत्ताव्याख्या समाप्ता।